॥अथश्रीललिताखंडप्रारंभः॥

॥ल०॥ श्रीगणेशायनमः॥अथब्रह्मांडपुराणोक्तललिताखंडप्रारंभः॥ज्ञानानंदमयंदेवं
॥१॥ निर्मलंस्फटिकाकृतिं॥ आधारंसर्वविद्यानांहयग्रीवमुपास्महे॥१॥अस्तुनश्रेय
सेनित्यंवस्तुवामांगसुंदरं॥यतस्तृतीयोविदुषांतुरीयंतुपुरंनमः॥२॥आनंदचि
न्मयंदेवमव्यक्तंव्यक्तरूपिणं॥अनाद्यंसांबमीशानंपापघ्नमनुसंदधे॥३॥
श्रीअगस्त्यउवाच॥भगवन्निंदिरानाथचतुर्भुजजगत्प्रभो॥नित्यज्ञानानुसं
धानसमस्तकरुणाकर॥१॥हयग्रीवततोसर्वविद्याधरमहोदय॥भवतोक्ताब्रा
ह्मणानांक्षत्रियाणांविशामपि॥२॥शूद्राणामपिचाचाराआश्रमाणांचसर्वशः॥श्री
शास्त्राणांपरमंसर्वंत्वत्तआकर्णितंमया॥३॥देव्यामाहात्म्यमखिलंचंडिका ॥३॥
याहयानन॥ब्राह्म्यादिमातृवृंदस्यमाहात्म्यंचोपवर्णितं॥४॥समस्तदेवता

ब्रूहि दैवैः पूज्या का वद देवता ॥ कास्या देव्याः प्रसादेन सर्वत्र विजयो भवेत् ॥ ५ ॥ को दे
वीं मनसा स्मृत्वा भुक्तिं मुक्तिं भवेन्नरः ॥ यत्तु भुक्तिकरं दैवं न तन्मुक्तिं प्रयच्छति ॥ ६ ॥
यत्तु मुक्तिप्रदं दैवं न तद्भुक्तिप्रदं भवेत् ॥ श्रीहयग्रीव उवाच ॥ उभे ते भुक्तिमुक्ती
च या दातुं देवता प्रभुः ॥ सा भवेल्ललिता देवी शक्तिचक्रैकनायिका ॥ ७ ॥ सा सा
क्षात्परमं ब्रह्म तया सृष्टं जगत्त्रयं ॥ न येव नाथयंत्तोमी ब्रह्मविष्णुमहेश्वराः ॥ ८ ॥
भंडासुरेण महता पीडितं भुवनत्रयं ॥ पातुमेव परं ब्रह्म ललिता तनुमास्थि
ता ॥ ९ ॥ अगस्त्य उवाच ॥ कोयं भंडासुरो नाम कुत्रास्य वसति प्रभो ॥ केन वा
निहतः सोभूत्कस्य पुत्रः स दानवः ॥ १० ॥ केन ध्वस्तं जगत्सर्वं केन वा परिपा
लितं ॥ एतत्सर्वं विस्तरेण कथय त्वं हयानन ॥ ११ ॥ श्रीहयग्रीव उवाच ॥ अथै

॥ल०॥ दुमुकुटः श्रीमान्दक्ष्यपुत्र्यानिषेवितः ॥ नंदिभृंगीमहाकालप्रमुखैर्गणमंड
॥२॥ लैः ॥ १२ ॥ सनकाद्यैश्चयोगींद्रैः सेव्यमानोऽव्ययः शिवः ॥ आस्थानमंडपेदेव्याः
सत्यासार्धंसिंहासने ॥ १३ ॥ उवासभगवानीशः कदाचित्करुणानिधिः ॥ तत्रसत्या
सहालापंतत्कालोचितमीश्वरः ॥ १४ ॥ कुर्वाणः शंभुरास्थानेकियंतंचित्क्षणं
स्थितः ॥ तस्मिन्नेवांतरेव्योम्निदक्षस्यवसतिंप्रति ॥ १५ ॥ चलतांदेवसैन्यानाम
श्रोषीद्घोषमीश्वरी ॥ जिज्ञासमानाघोषस्यकारणंशिवभामिनी ॥ १६ ॥ प्रेषया
मासतद्वार्ताज्ञानायगणमेककं ॥ सगत्वारभसा — गीव्योमसंचारचंचुकः ॥ १७ ॥ ॥श्री॥
ज्ञात्वाचहेतुंतत्रस्थंपुनःसत्यांगणाग्रणीः ॥ आगत्यपरमेशानंवंदित्वासतीम ॥२॥
पि ॥ १८ ॥ उदेविज्ञापयामासभक्तिनम्रीभवच्छिराः ॥ देवीत्वदीयजनकः श्रेष्ठोद

क्षप्रजापतिः॥१९॥हवनंकर्तुमारेभेतेनाहूतादिवौकसः॥प्रयांतिसहसेनाभि
स्तदाज्ञावशवर्तिनः॥२०॥तेषांप्रचरतामेषोघोषःप्रादुरभूद्दिवि॥घोषस्यका
रणमिदमितितूष्णींबभूवह॥२१॥अथदेवीसतीश्रुत्वापितुर्यज्ञमहोत्सवं॥
अत्यंतकौतुकाविष्टाप्रोवाचेदंजगन्मयं॥२२॥यथायंवल्लभःप्राहभृत्योमेपि
तुरुत्सवं॥अतस्तत्रमहोत्साहोवर्त्ततेचंद्रशेखरे॥२३॥चिराद्द्रक्ष्यामिमद्बंधू
न्श्वश्रूमातॄंश्चशंकर॥भ्रातॄंश्चभ्रातृपुत्रांश्चस्कस्तिग्धांश्चसमाकुलान्॥२४
तस्मान्मामनुजानीहिबंधून्यज्ञक्रियोत्सवं॥दृष्टुंयास्यामिशीघ्रंतेनिकटंचंद्र
शेखर॥२५॥इतिदृष्टःशिवोदेव्याप्राहगंभीरयागिरा॥नगंतव्यंत्वयातत्र
पुरादेव्यस्तिकारणं॥२६॥वयमिष्टप्रदानित्यमनिष्टार्थनिवारकाः॥विश्वा

॥ ल० ॥ धिकाजगत्पूज्याः सत्यज्ञानस्वरूपिणः ॥ २७ ॥ कृतकृत्यास्मसर्वत्र स्वात्मानं
॥ ३ ॥ दपरायणाः ॥ इतिकृत्वाप्रणंतुंमांदेवाः सर्वेसमागताः ॥ २८ ॥ तन्मध्येतवता
तोपिदक्षोदुरभिमानवान् ॥ मयिजामातृताबुध्यामन्नमस्कामाहृतः ॥ २९ ॥ अ
हंतुसर्वसामान्यंकुशलंहृष्टवांछिवे ॥ नमस्कारोमदेवोश्वशुरत्वेपिनोकृतः ॥ ३० ॥
ममकोवानमस्कार्योविद्यतेभुवनत्रये ॥ ईर्ष्याकलहकोपेषुत्वयिमेपरमानति
॥ ३१ ॥ अतःप्रमेतरेक्वापिननमस्कारवाहनं ॥ इत्थंस्थितेमयाताततस्तवांतःक्रो
धमूर्छितः ॥ ३२ ॥ यत्किमप्यवदंनैवमयिनिंदासमाचरन् ॥ अंतर्विदग्धमाना ॥ श्री ॥
त्मागतोदक्षोनिजंगृहं ॥ ३३ ॥ तस्मात्तदातस्यमुखेविकारमहमैक्षिषं ॥ दोरा ॥ ३ ॥
त्म्यंचभवत्तातेदृष्टादुरभिमानता ॥ ३४ ॥ तस्मात्तेनैवदोषेणत्वांचमांचाभिवर्जय

तु ॥ उत्तानबुद्धिभिर्मूढैः पामरैरमरैः सह ॥ ३५ ॥ यज्ञकर्मसमारंभे मद्दूषया निरर्थकं ॥
तस्मात्त्वं तत्र मा गच्छ यदि यासि निजेच्छया ॥ ३६ ॥ तर्हि गच्छ मदुक्तं ते पश्चाद्देवफलि
ष्यति ॥ इत्युक्ते शंकरे प्राह सती दाक्षायणी पुनः ॥ ३७ ॥ एवं चेत्तर्हि कर्तव्यं मया तस्य
मतो धनं ॥ त्वन्निंद्या चेत्सतति तदा मम पितुः क्षयः ॥ ३८ ॥ यथा स्ववित्तदोषेणात्र
यिनो दूषणं वदेत् ॥ यथाहूयात्त्व यज्ञे त्वां सत्कारं वितरिष्यति ॥ ३९ ॥ तथा बोधयित
व्योमे ताता दूष्याय संकटात् ॥ वृथमेध महाकूपे भयं निंदा भये शिव ॥ ४० ॥ पतं ते
तारयिष्यामि तातं बहुभिरुक्तिभिः ॥ न जानाति भवच्छक्तिमवधूतत्वदर्शनात् ॥ ४१ ॥
भस्मन्यैवाग्निमाच्छिन्नं बोधयिष्यामि तं गुरुं ॥ तस्मान्मामनुजानीहि प्रणामस्ते
महीयसे ४२ इत्युक्तवत्यसौ देवी शंकरेणानुमोदिता ॥ अनिच्छता तु भाव्यात्तु जवेनोद्दंतुमैहत ॥ ४३ ॥

॥ल०॥ तस्यां गंतुं प्रवृत्तायां पितुर्यज्ञमहोत्सवे ॥ शैलादिनासमादिष्टास्तत्सहायान्महागणाः ॥४४॥
॥४॥ महाकालो महाकर्णो घंटाकर्णः कलापवान् ॥ कुंभोदरो निकुंभश्च नीलग्रीवो मृगांतकः ॥४५॥
ऊर्ध्वकेशः केतुमाली तंदुलः करलोचनः ॥ सोमको नीलबाहुश्च भैरवः कालभैरवः ॥४६॥
स्वच्छंदभैरवश्चान्य उद्द्युतो विश्वधस्मरः ॥ अलर्कः सिंहकेतुश्च मणिमान्मणिकंधरः ॥४७॥
रतेश्वरा गणाश्चैवा महाश्वरा महौजसः ॥ सती देव्याश्च रक्षार्थे प्रेषिताः शस्त्रपाणयः ॥४८॥
राद्येकैकस्य कद्रुहवेनगणनाथाः सहानुगाः ॥ शैलादिनापि निर्दिष्टाः सतीसंरक्षणोत्सुकाः ॥४९॥
काचनेन विमानेन वायुवेगतुरंगिणा ॥ दाक्षायणी समचलत्व्योममार्गेण सत्वरं ॥५०॥ विमा ॥श्री॥
निकैर्देवगणैश्चारणैरप्सरोगणैः ॥ स्तूयमाना महादेवी विमानेनाचलद्दिवि ॥५१॥ तस्याः ॥४॥
संख्यः सतीदेव्या बह्व्यः सर्वांगशोभनाः ॥ कक्षाचीचामरं तालवृंतं कनकपादुके ॥५२॥

मुक्ताजालकरंडं च तथाभूषणपेटिकां ॥ वहंत्य केलिचतुराः प्रायेभ्योपि चवत्स
लाः ॥ ५३ ॥ मनोविनोदनप्रायकथाबंधविचक्षणाः ॥ तातस्य भवनं यांति तां देवीम
नुवव्रजुः ॥ ५४ ॥ उल्लिखत्केतुमालाभिस्ततश्चेतश्च वारिदान् ॥ घंटाघंयाघणत्का
रैः पूरयन्ति खिलो दिशं ॥ ५५ ॥ स्कवर्णभूषिताशेषगात्रो मेरुसमाकृतिः ॥ स्कवर्ण
इव खेखेलन् विमानोश्वैश्च चालह ॥ ५६ ॥ आघूर्णपक्षियस्तत्र च कंदुर्भास्करं
प्रति ॥ आर्भालस्य चकंतस्यादक्षचक्षुरथो स्फुरत् ॥ ५७ ॥ प्रतीपरवपवनः प्रवृत्तः
प्रणदन्निव ॥ धूमायंते स्म सकला दिशः पांसुविरूषिताः ॥ ५८ ॥ इत्यादिकं किलोत्पा
तमवलोक्य मुहुर्मुहुः ॥ शंकमानापि सा देवी गता तातनिकेतनं ॥ ५९ ॥ तत्रापश्य
द्यज्ञवाटे स्वस्मॄ मातृंश्च बंधवान् ॥ इंद्रादीनपि गीर्वाणान् ब्रह्मादींश्च प्रजापतीन् ॥ ६० ॥

॥ल०॥ अग्निंयममसृकूपंचपाशिनंपवनंतथा॥ धनदंसोममादित्यंवसून्नह्रौचचार
॥५॥ णाव्॥६१॥ सिद्धकिंन्नरगंधर्वान्यज्ञवाटस्थितास्ततान्॥ शचींस्वाह्रांचधूमजांनी
मृद्धिंचसन्नतिं॥६२॥ अन्याश्चामरनारीभिरप्सरोभिःसहेक्षत॥ नानाविधैर्यज्ञपा
त्रैःप्रयोगकुशलैर्द्विजैः॥६३॥ परीक्षकैःसदस्यैश्चऋत्विग्भिःकर्मतत्परैः॥ मंत्र
ध्वनितनिर्नादंपापमंत्रस्यघोषणैः॥६४॥ सांगैश्चैवप्रयाजानुयाजैःस्वाहाकृतै
स्तथा॥ वौषट्कृतैर्वषट्कारैस्तोत्रैःशास्त्रैश्चसामभिः॥६५॥ पुरोनुवाक्ययाज्याभिः
कर्मभिश्चातिशोभनैः॥ पत्नीसंयाजकृत्यैश्चपशुसंज्ञपनैरपि॥६६॥ दर्भसंवेष्टि ॥श्री॥
तैर्यूपैःसचषालैश्चशोभितं॥ यज्ञवाटंसमालोक्यप्रीतासाद्दक्षनंदना॥६७॥ अपश्यं ॥५॥
तीविविधाश्चर्यैर्वि।निवेश्यबहिर्गयान्॥ आप्ताभिःप्राणतुल्याभिःसर्वाभिःसहसंगता॥६८॥

पितुरंतिकमायेदेवृथादुरभिमानिनः॥ ६९॥ इतिश्रीब्रह्मांडपुराणेउत्तरभागेललि
तोपाख्यानेप्रथमोध्यायः॥ १॥ श्रीहयग्रीवउवाच॥ तामायांतींपितादृष्ट्वाबहुभ्रुकु
टिनिष्ठुरं॥ अवज्ञायतिरस्त्रीनेवदनंसमधारयत्॥ १॥ सर्वेषुबंधुषुप्रीतिंविधायच
पुनःपुनः॥ तस्यांजामातृदोषेणभर्त्सनामपितेनिवान्॥ २॥ अवेहिपापेपापिष्ठेभर्ता
रमनुजग्मुषी॥ अकुलीनंचितागारदिग्धवेषंकपालिनं॥ ३॥ यद्यपित्वंमनस्कृता
तथापित्वविनिंद्यसे॥ भर्तुरेवहिदोषेणसदाचारविरोधिनः॥ ४॥ मिथ्याभिमानीमि
थ्यैवाहंकारीशक्तिगर्हितः॥ तापसाकारसंछन्नोधूर्तःपरमदांतिकः॥ ५॥ अवधू
तःपराभूतःसदाचाररतैर्जनैः॥ अशेषंचापिचारित्रमशिवंवेषकल्पितं॥ ६॥ अशि
वंवसतिस्थानंवहेछिवइतीर्यते॥ अज्ञोकष्टंतथाजातःप्रसिद्धःशिवइत्यसौ॥ ७॥

॥ रु० ॥ ममतामोहयत्येषः तपोदंभेनभूयसा नाहंराः परिणेतातेमयामोहादुपार्जितः ॥
॥ ६ ॥ ॥ ८ ॥ तद्दोषाद्भवतीदुष्टा गोर्क्षीरंभ्व— नयथा ॥ गच्छगच्छगृहंपत्युर्जीतंजातंममाप्रि
यं ॥ ९ ॥ केनाहूतासिनायाताभवतीभिक्षुकिंकरी ॥ इत्याद्यैः परुषैर्वाक्यैर्मेभिभि
न्नश्चंद्रुर्मतिः ॥ १० ॥ तुतोद बहुधा दक्षः पुत्रींजामातृदोषतः ॥ इतिसाभर्त्स्यमाना
पि गुरुणातेनदोषिणा ॥ ११ ॥ अनुपाधिकृपासिंधुरंबावचनमब्रवीत् ॥ तात
किंतेव्यवसितंअहोकष्टमुपस्थितं ॥ १२ ॥ केनोपदिष्टो दुर्मार्गो मूलनाशकर
स्त्वयं ॥ तवनष्टानिभाग्यानि नष्टंतवमहद्यशः ॥ १३ ॥ प्रजापत्यधिकारोपि ॥ श्री ॥
कथामात्रावशेषितः ॥ ब्रह्मन्यास्त्वंकुलेजातः नातोपिकुलपांसनः ॥ १४ ॥ त्वत्सं ॥ ६ ॥
गदोषादखिलानष्टाः सर्वेपिसज्जनाः ॥ योयज्ञोयज्ञभोक्ताचायश्चयज्ञफलंशिवः ॥ १५ ॥

योयष्टायोजगद्दष्टातन्निंदसिदुराशय॥शिवइत्यक्षरद्वंद्वसमितंयस्यकी
र्तनं॥१६॥स्मरत्तामपिकैवल्यंतन्निंदसिदुराशय॥आत्मारामास्तपोनिष्ठा
ज्ञानाग्निप्लुष्टकल्मषाः॥१७॥यन्नमस्यंतिमुनयःतन्निंदसिदुराशय॥अष्टा
भिर्मूर्त्तिभिर्यस्यशश्वद्विश्वंविजृंभते॥१८॥तंविशुद्धंचिदाकारंनिंदसिदुशि
खामणिं॥अहोपापमहोपापंशांतंशांतंहतंहतं॥१९॥किमत्रबहुवक्ष्यामिप
तितोस्यंधकूपके॥समूलोन्मूनकरीमिनांदुर्बुद्धिमंजसा॥२०॥विमुच्यंतस
माह्वयसत्कुर्वन्क्रतुमाहर॥नचेदयंकृतोयज्ञःस्वाभिचानोभविष्यति॥२१॥
उपास्यदेवतांशंभुंअनादिनिधनंशिवं॥अपास्यक्रियतेयज्ञःधिक्कष्टंतवकौशलं
॥२२॥यदिस्थैर्यंस्ववंशस्यस्वस्यवाकर्त्तुमिच्छसि॥तदापूजयतंदेवमन्यथात्वद्धतोधुना॥२३॥

॥ लु ४ ॥ सहस्राकोटिसंख्यातगणनाथस्य तस्यवै ॥ एक भृत्यक्षणक्रोधं नसहेत च
॥ ७ ॥ राचरं ॥ २३ ॥ इत्युक्तवत्यां सत्यां सो बहुभ्रुकुटिनिष्ठुरः ॥ पुनर्वाग्भिस्तीक्ष्णैस्तां
ततक्ष दुराशयः ॥ २५ ॥ अथ सा जगदीशानी क्रुद्धाभाष्य दुराशयं ॥ त्वत्संगदोष
दुष्टं स्वं वपुस्त्यक्तुं भवचक्रने ॥ २६ ॥ ईदृशस्त्वं शिवद्रोही वपुरेतत्त्वयार्जितं ॥
अतस्त्वत्कुलनाशाय तत्त्यजामि विगर्हितं ॥ २७ ॥ क्रोधाग्निनाति महता धक्ष्या
मि त्वा मिहाधुना ॥ अथापि पितृतामीश्य शममेव व्रजाम्यहं ॥ २८ ॥ सराव जग
दीशस्ते शिक्षां सम्यक्करिष्यति ॥ इत्युक्त्वा सा सती देवी तत्र योगे समास्थिता ॥ २९ ॥ ॥ श्री ॥
बद्धपद्मासनाधीरा नासाग्रन्यस्तलोचना ॥ सर्वाणींद्रियचक्राणि सन्नियम्य मुकु ॥ ७ ॥
मुकु ॥ ३० ॥ योगेनात्मानमुत्स्रष्टुमुद्युक्ता साब्रवीत्सरवीं ॥ अयि भद्रे जगन्नाथ

पार्श्वयात्यविशंकिता॥२३॥ अन्याभिसाममाल्लीभिसत्यंचसकल्लेगणैः अ
हेतुरस्वामिनोवाक्यमवधार्यसमागता॥२४॥ फलंचप्राप्तवत्यस्मिनूतरमात्मस्था
म्यदोवपुः॥ नकेवलंपितुःकोपात्कारणांतरमस्तिमे॥२५॥ पुराकल्पेहिम
वतासार्धकोटिवत्सरान्॥ मयितप्तंततस्तीक्ष्णंदुष्करंयत्सुरासुरैः॥२६॥ तदा
हंतस्यसांन्निध्यंसंप्राप्तप्रीतमानसा॥ वरंवृणीष्वभद्रंतेतपसातेस्मितोषिता॥२७॥
इत्युक्तेहिमवानाहभक्तिदुर्भरमानसः॥ यदित्वंमयिसंतुष्टापूर्णकारुण्यवर्षि
णी॥२८॥ ममपुत्रीभवक्वापिजन्मानिमेनयेशिवे॥ इत्युक्तेतेनगिरियाभक्तिन
म्रेणासरव्यहं॥२९॥ तथास्तुतवपुत्रीत्वंयास्यामीत्यब्रवंतदा॥ तस्यैषसमयःप्रा
प्तःतस्यशैवाशिरोमणेः॥३०॥ भवेयंदुहितापापंममेतज्जन्मनाकृतं॥ अयंव

॥ ल० ॥ रधांजलिः शंभोर्भूयो भूयो नमस्कृतिः ॥ ३९ ॥ मह्या चावदनं शंभुं त्वं मे प्राणस
॥ ८ ॥ मासखी ॥ अतस्त्वया सखीभिश्च पराभिर्ममवैशमं ॥ ४० ॥ अवलोक्य न क
र्तव्यः शोको मनसि कश्चन ॥ पश्चात्प्रासजनि तस्मात् हिमवंतो महीयसः ॥
४१ ॥ संप्राप्य मोमनःशोकं सकलं त्यभिथ प्रियाः ॥ इत्युक्त्वा तां प्ररुदतीं योगं
देवी समास्थिता ॥ ४२ ॥ मूलाच्चिदग्निमुद्दिप्य नासाग्रेन्यस्तलोचना ॥ तेने वव
ह्निना सर्वं निजगात्रम दीपयत् ॥ ४३ ॥ कर्पूरदीपवत्तन्व्या वपुर्योगाग्निनाद्भु
तं ॥ न किंचिदपि तत्रासीदवशिष्टं रजोपि वा ॥ ४४ ॥ न भस्म न च संस्थानं देह ॥ श्री ॥
स्यास्य विलोकितं ॥ केवलं ज्योतिरुत्तस्थौ दिनदीपितभास्करं ॥ ४५ ॥ ततक्ष ॥ ८ ॥
णेन तज्ज्योतिरंतर्हिमगमद्दिवि ॥ तत्रस्थानां सदस्यानां तदद्भुतमिवाभवत् ॥ ४६ ॥

गत्वाचाकाशमार्गेणतुषाराद्रेः सधर्मिणीं ॥ मेनांभामस्कचारित्रामाससादस्व
जन्मने ॥ ४७ ॥ शैलेंद्रस्यकुलेश्रद्धं उच्चैःकर्तुंमहेश्वरी ॥ भूषयामाससमेनायाः
गर्भंविश्वत्रयंप्रसूः ॥ ४८ ॥ पितृभिर्यापुरादत्ताशैलेंद्रायमहात्मने ॥ अयोनिजा
महाभागासागर्भेतामधारयत् ॥ ४९ ॥ देवीचांद्रीकलेवासौगर्भक्षीरोदधेरिव
तस्याःपवित्रयंतीचमेनायावृद्धिमागमत् ॥ ५० ॥ यथायथोदरेदेवीववृधेशैल
धा योषितः ॥ तंतथामहत्तेजः मेनायाःसमदीप्यत ॥ ५१ ॥ ससागरांसविपिनांधार
यन्नपिसोद्यगां ॥ नसशाकोंबिकागर्भंधुकोंधर्तुंस्वबल्लभां ॥ ५२ ॥ युगपत्प्रोत्थिता
नेकभास्करद्युतिसंनिभः ॥ तेजोराशिःप्रववृधेमेनायागर्भवैभवात् ॥ ५३ ॥ तेजो
विशेषमालोक्यतस्यातुहिनपर्वतः ॥ वरप्रदानंसफलंमन्यतेस्मांबिकाकृतं ॥ ५४ ॥

॥रु०॥ गर्भभारालसांकांतांपांडुगंडस्थलोज्वलां ॥ आनीलचूचुकोदारकुचमंडलशोभि
॥९॥ नीं ॥५५॥ तस्यद्वलित्रयीभंगस्पष्टरोमावलीलतां ॥ इषच्चरणविन्यासस्खलितनि
श्वासखेदिनीं ॥५६॥ अलसालससंचारस्निग्धतारकलोचनां ॥ गर्भखेदसमुद्भू
तस्वेदबिंदुमनोहरां ॥५७॥ सखीभिः शतसंख्याभिः प्रियालापविनोदनैः ॥ अ
न्वास्यमानामसकृत्सखिहस्तावलंबितां ॥५८॥ तांदृष्ट्वाघनसंतोषोवंशमेनेप्रति
ष्ठितं ॥ लग्नेशुभतरेकालेताराचंद्रबलोज्वले ॥५९॥ पंचग्रहेषूच्चेषुशुभदृष्टिषुभू
यसा ॥ असूतसाभगवतीमेनात्रैलोक्यमातरं ॥६०॥ दिशः प्रशान्तमायाताः प्रसन्नं ॥श्री॥
सकलंपयः ॥ प्रमोदभरितालोकाजातंचविमलंनभः ॥६१॥ देवदुंदुभयोनेदुःन ॥९॥
नृतुश्चाप्सरोगणाः ॥ पुष्पवृष्टिश्चवसुधाजातादेवकरार्पिता ॥६२॥ अकस्मादेववा

नंदभरितं भुवनत्रयं ॥ सा तु रत्नशलाकेव शशिरेखेव शोभिता ॥ ६३ ॥ स्वमातरम
लंचक्रे भासमानेन तेजसा ॥ अंकादंके गिरिस्त्रीणां व्रजंती लालनाशतैः ॥ ६४ ॥
माणिक्यदीप्यरेखेव वर्धमाना व्यराजत ॥ अंतःपुरे हिमवतो बहुस्त्रीजनसंकुले
॥ ६५ ॥ शशिरेखेव नक्षत्राणि विडंब्याप्तिसा बुभौ ॥ तामालोक्य गिरिश्रेष्ठो मज्जंनि
वमुदंबुधौ ॥ ६६ ॥ अंके निवेश्य मुहूर्तं लालनामकरोद्गिरिः ॥ दीर्घाक्षमिंदुखंडाभ
निटलं कुटिलालकं ॥ ६७ ॥ मुखं स्वदुहितुर्दृष्ट्वा न तृप्तिमगमद्गिरिः ॥ इत्थं सा वर्धमा
ना साभवनेष्टथिवी मृतः ॥ ६८ ॥ मेनाकसोदरी मेनां विश्वश्लाघ्यां वितेनुषी ॥ कला
नुल्लापैरमृतस्पंदिभिश्चित्तहारिभिः ॥ ६९ ॥ कर्णेरसायनं तस्य दुदुहे साकुमारिका
बाला नवोत्पलश्यामा स्निग्धकांति मनोरमा ॥ ७० ॥ संचारिण्या वसुभुभेह रिन्निला

॥ल०॥ भ्रमपुत्तली॥ क्रमेणगिरिकन्याभिःसार्धंशैशवशोभना॥ ७१॥ कृत्रिमैःपुत्रिकैः
॥३०॥ क्रीडांकंदुकैश्चसमातनोत्॥ प्रालेयपर्वतस्तस्यानामाभिजनमातनोत्॥ ७२॥
पार्वतीत्येवयत्तुंसाअशेषाघविनाशनं॥ सापार्वतीसहालीभिःक्रीडाभेदविनो
दिनी॥ ७३॥ पित्रोरेकास्पदंप्रेम्णांपारकेलितनानिच॥ गंगासैकतदेशेषुस्वयु
रेश्चापिसानुषु॥ ७४॥ अलक्तकांकितैःपादन्यासैःपावितमेदिनी॥ चचारगिरिरा
जस्यवेश्मनिक्रीडनाकुला॥ ७५॥ क्रमेणशैशवंबालामुंचतीवपुषिस्वके॥ कंदर्पा
हंक्रियासूलकंदंयौवनमाददे॥ ७६॥ स्वभावादरुणौतस्यानवपल्लवकोमलौ॥ सौ ॥श्री॥
भाग्यरेखाविन्यासैर्व्यक्तीकृतगुणोल्बणौ॥ ७७॥ संचारेषुमहींचक्रेकुंकुमैरुदकै ॥३०॥
रिव॥ सिंचंतौचंद्रिकाशुद्धनखकांतिविराजितौ॥ ७८॥ मणितूपुरवाद्येनहंससंतो

गत्वाथाकाशमार्गेणतुषाराद्रेः सधर्मिणीं॥ मेनांनामसुचारित्रामाससादस्व
जन्मने॥४७॥शैलेंद्रस्यकुलंशुद्धं उच्चैःकर्त्तुंमहेश्वरी॥ भूषयामासमेनायाः
गर्भेविश्वत्रयंप्रसूः॥४८॥पितृभिर्यापुरादत्ताशैलेंद्रायमहात्मने॥अयोनिजा
महाभागासागर्भेतामधारयत्॥४९॥देवीचांद्रीकलेवासौगर्भक्षीरोदधेरिव
तस्याःपवित्रयंतीचमेनायावृद्धिमागमत्॥५०॥यथायथोदरेदेवीववृधेशैल
था योषितः॥तत्तथामहत्तेजःमेनायाःसमदीप्यत॥५१॥ससागरांसविपिनांधार
यन्नपिसोद्यगां॥नसशाकोविकागर्भयुक्तांधर्त्तुंस्ववल्लभां॥५२॥युगपत्प्रोत्थिता
नेकभास्करद्युतिसंनिभः॥तेजोराशिःप्रववृधेमेनायागर्भवैभवात्॥५३॥तेजो
विशेषमालोक्यतस्यातुहिनपर्वतः॥वरप्रदानंसफलंमन्यतेस्मांबिकाकृतं॥५४॥

॥ ल० ॥ गिनां चेतः परमाणुरिवागतः ॥ ८७ ॥ अन्योन्यममृतानंदावन्योन्याश्लिष्टमंडलौ
॥ ३३ ॥ उच्चचूचुकताचारुनिबिडौ सोनिरंतरौ ॥ ८८ ॥ दोर्मूलकूलकषतां प्राप्तावन्योन्य
वृद्धिभिः ॥ यौवनद्विपनाथस्य कुंभाविव मनोहरौ ॥ ८९ ॥ कामराजाभिषेकाय कल
॥ शाविव सोदकौ ॥ तद्देहकांतिसरसि क्रीडाकोकद्वयोज्वलौ ॥ ९० ॥ मनोज्ञहार
लतिकापरिवेषमनोहरौ ॥ महेश्वरमनःक्षीरसिंधुमंथनमंदरौ ॥ ९१ ॥ सौभाग्य
रत्नदेहस्य सुवर्णकलशद्युती ॥ परियाहेन महता विवताविव पुष्करं ॥ ९२ ॥
उपर्युपर्युच्छ्रयया चुंबुकौ तुंबकाविव ॥ वसुधाधरेकन्याया वद्धाते पयोधरौ ॥ श्री ॥
॥ ९३ ॥ शिरीषदामकोमल्यं हसंताविव तद्भुजौ ॥ अनंगदोलासौवर्णशृंखला ॥ ३३ ॥
कांतिमापतुः ॥ ९४ ॥ प्रातर्विकस्वरांभोजस्वाधिकांतिमनोहरः ॥ निषिंचंति

वल्लौहित्यधाराभिः ककुभां कुलं ॥ ९५ ॥ महेशपाणिग्रहणसौभाग्यप्रथमोचितः
रत्नांगुलीयकच्छायावर्धिष्णुनिजरक्तिमः ॥ ९६ ॥ सौभाग्यरेखारुचिरसौ रुरुचे
पार्वतीकरः ॥ आमृष्टशंखसुभगारेखंकंठनालीत्यराजत ॥ ९७ ॥ शरदिंदुसम
छायं संनतभ्रूलतेक्षणं ॥ तिलपुष्पसमं नासापुटं दंतमनोहरं ॥ ९८ ॥ कलाला
पमधुस्रोतसंतर्पितजगज्जनं ॥ मणिदर्पणसमच्छायकपोलफलकोज्वलं ॥ ९९ ॥
नवप्रवालरुचिरस्निग्धपाटलाधरपल्लवं ॥ मृगांकशकलौदारललाटललिताकृ
ति ॥ १०० ॥ चक्रचूडालकं तस्याः वदनं रुरुचे रुचा ॥ धम्मिल्लस्तस्या श्यामता
पिच्छभ्रमभेदकः ॥ १०१ ॥ कुटिलो वर्वरस्निग्धः सुगंधः शोभनद्युतिः ॥ विडंबयामा
स घनपिंछं चापि शिखंडिनो ॥ २ ॥ एवमारूढतारुण्या संपूर्णा सकलैर्गुणैः ॥

॥ल०॥ चिक्रीडगिरिराजस्यमंदिरेजगदंबिका ॥१०२॥ इतिश्रीब्रह्मांडपुराणेहयग्री अ० २
॥१२॥ वागस्त्यसंवादेललितोपाख्यानेद्वितीयोध्यायः॥२॥ श्रीअगस्त्यउवाच ॥ तुरगव
दनःश्रीमन्सर्वविद्याकलानिधे ॥ सतीविसृष्टदेहांतांश्रुत्वाकिमकरोच्छिवः॥१॥
किंकृतवान्महेशानोदक्षंप्रतिदुराशयं ॥ अथवाशांतिमगमत्स्वभावात्करुणाम
यः॥२॥ श्रीहयग्रीवउवाच ॥ यदामुक्तासतीदेहंहिमवंतंसमाश्रिता ॥ सादेवीज
गतांमाताशंकरस्यसधर्मिणी ॥३॥ तदातस्याःसखीवृंदंसमस्ताश्चगणेश्वराः
दक्षप्रजापतेर्यज्ञवाटात्कैलासमाययुः॥४ अथनिर्विण्णमनसोभीतभीताःपदेपदे ॥
दुर्वृत्तांतमिदंवक्तुंसख्यःसत्वरमागताः॥५॥ शून्येनैवविमानेनतेसर्वेपिगणेश्वराःअ ॥श्री॥ ॥१२॥
त्यंतमाकुलचांताःप्रपन्नाःपरमेश्वरं ॥६ बाष्पायमाननयनाःतासख्यश्चंद्रमौलये

षदायिनी ॥ ध्यातव्यौयोगिनांहृदंतरेतःचित्तसरोरुहे ॥७९॥ अपुष्टातांरुचिंतस्या
श्वरयोःसंनतभ्रुवः ॥ जंघाकांडौमनोजन्मतूणीरसदृशप्रभौ ॥८०॥ तस्याबबंध
तश्चवक्षःबंधूनांसहचेतसा ॥ कदलीदंडसौभाग्यनिरहंकारकारकौ ॥८१॥ कंद
र्पगजमूर्धन्यशुंडाकांडसमद्युती ॥ महेशतद्दयोदग्रगजबंधमहाद्रुमौ ॥८२॥
कंदर्पस्यजगच्चक्रविजयस्तंभसंनिभौ ॥ पार्वत्यामांसलावूरूपरांशोभामपुष्यतां
॥८३॥ कांचीकलापस्कभगःकरिमस्तकसन्निभः ॥ स्वनितंबादिवोच्छिद्यतत्पित्रार्पित
गौरवः ॥८४॥ गारुत्मतशिलाशैलकटकश्रीकोतिकृतः ॥ नितंबोजगदंबायाःप्रवृ
द्धिंपरमांययौ ॥८५॥ बलित्रयेयारुचिरारोमावलिर्मनोहरा ॥ गंभीरनाभिकुहरांत
स्यामध्येलतावभौ ॥८६॥ शंकरस्यापिमैश्वर्यमिवतन्मध्यमाश्रितं ॥ अथवायौ

॥ ७० ॥ रधरोत्तरैः ॥ १५ ॥ नित्यं रत्नस्य लालाटतत्स्येव मित्रतां ॥ ते जाते कोपसंरक्ते लोक अ ३
॥ ३२ ॥ नाथस्य लोचने ॥ १६ ॥ तस्य क्रोधसमुत्साहं विलोक्य त्रासविह्वलाः ॥ इतस्ततो गृह
क्रोडे गणनाथा विलिल्यिरे ॥ १७ ॥ पलायितेषु सर्वेषु गणनाथेषु तद्रुषा ॥ कथं कथंचि
द्वीरात्मानं दीनातिकमत्यजत् ॥ १८ ॥ सोपि नंदे पुरस्थातुं ज्वलत्क्रोधस्य कूलिनः ॥ अ
शक्नुवं तस्य पश्चाभागं निभृतमाश्रितः ॥ १९ ॥ अकंपित मही सर्वा रुद्रमुद्वीक्ष्य शंकरं ॥
अंतर्दधे सहस्रांशुरतित्राससमाकुलः ॥ २० ॥ अपतन्गगनात्ताराः समघूर्णंत चार्ण
वाः ॥ त्रस्तं चराचरमभूत् क्रोधशालि निशूलिनि ॥ २१ ॥ अथ देवो महादेवो ललाटतट
संभवं ॥ एकं स्वेदमयं बिंदुं नखाग्रेणाक्षिपत्क्षितौ ॥ २२ ॥ तत उत्तस्थिवानेवो लौ ॥ श्री ॥
कद्यस्मरविग्रहः ॥ कालाग्निरिव दीप्तांगो वीरभद्रो गणेश्वरः ॥ २३ ॥ बद्धभृकुटि ॥ ३२ ॥

रूर्ध्वोडभित्तिभेदक्रुदुन्नतिः ॥ दीप्ताक्षश्चोर्ध्वकेशश्च भगवानंतको यथा ॥ २४ ॥ स
तु प्रणम्य चंडीशं अष्टांगस्पृष्टभूतलः ॥ वीरभद्रो भक्तिपूर्वमिदं विज्ञापयद्वचः ॥ २५ ॥
देवदेव जगन्नाथ मया किंतु विधीयतां ॥ अहं विधेय सर्वेषु नियोज्यो नाथ कर्मसु
॥ २६ ॥ त्वत्प्रसादप्रभावेन न किंचिद्दुष्करं मम ॥ कंपयामि महीं कृत्स्नां किं कुर्यामध
रोत्तरां ॥ २७ ॥ किं वा पिबामि सप्ताब्धीन् किं गिलामि जगत्त्रयं ॥ तव भ्रूवल्लिचलनात्
असाध्यमपि साधये ॥ २८ ॥ इति विज्ञापितस्तेन संरुद्रो वाच मूचिवान् ॥ गच्छ दुष्ट
स्य दक्षस्य यज्ञं मर्दय निर्दयः ॥ २९ ॥ मम द्रोही नित्यमेषो मम दूषयातत्परः ॥ पापी दु
रभिमानी च तथा गर्वोद्धतथा मदः ॥ ३० ॥ तस्मात्तस्य क्रतुध्वंसं कृत्वा भूयश्च मां व्र
ज ॥ इत्याज्ञावचनं लब्ध्वा चंद्रमौलेर्ज्वलत्क्रुधः ॥ ३१ ॥ वीरभद्रश्च कैलासान्निर्जगा

॥३१॥ मम महाजवः ॥ तस्यैव रोमकूपेभ्यो दीप्ताग्निटललोचनात् ॥ ३२ ॥ कर्णाभ्यां चैव नासाभ्यां अ ३
॥३४॥ अस्याद् दृग्द्वयं करात् ॥ उत्थितानां बहवो घेक घस्मराः प्रथमेश्वराः ॥ ३३ ॥ सहस्रलक्षसंख्या
ताः सहस्रांशुसमप्रभाः ॥ सहस्रयुगभर्त्तारः सहस्रायुधनिस्वनाः ॥ ३४ ॥ पिबंत इव च
व्योम वीक्षंत इव मेदिनीं ॥ यक्षत इव भूतानि वीरभद्रं समन्वयुः ॥ ३५ ॥ गणं द्रुसेनामह
ती वीरभद्रप्रदर्शिताः ॥ समावव्रेय यज्ञवाटं दक्षस्यात्यंतदुर्मतेः ॥ ३६ ॥ कल्यांताग्निशिखि
ज्वालाकलापैरंबुधः पयः ॥ यज्ञस्थानं तथा वेगाद्वेष्टितं प्रथमेश्वरैः ॥ ३७ ॥ तमापतंतमा
लोक्य वीरभद्रं महाबलं ॥ विप्रेक्षरमराः सर्वे हाहेति क्रंदनातुराः ॥ ३८ ॥ केचिद्द्रवंति ॥ श्री ॥
मूर्छंति केचित्क्रंदंति भूरिशः ॥ इतस्ततस्तु केप्यन्ये पलायनपरायणाः ॥ ३९ ॥ ध्रुवोप ॥ ३४ ॥
भुज्जड्डुमुखं यज्ञपात्रकदंबकं ॥ ऋत्विग्भिः सहसा त्यक्त्वा कां दिशीकाः प्रतस्थिरे ॥ ४० ॥

देवीमुक्तां तमखिलं प्रोचुर्गद्गदया गिरा ॥ ७ ॥ देवीं श्रुत्वा महेशानो योगत्यक्तकले
वरां ॥ अत्यंतधीरचित्तोपि सद्यः शोकमन्वभूत् ॥ ८ ॥ अथाभिभूय नं शोकं मुग्रः
त्रैलोक्यघस्मर ॥ हृदये नीलकंठस्य महाकोपाग्निरुत्थितः ॥ ९ ॥ अपकारपरं द
क्षमाति दुर्भीषणोद्धतं ॥ उद्दिश्य तु महाशब्दो जज्वाल क्रोधपावकः ॥ १० ॥ दक्षवंशम
हारण्यमूलच्छेदकुठारिका ॥ ईशस्य निटलक्रोडे भ्रूकुटी पयभृंजवत् ॥ ११ ॥ प्रस्फोर
चमुकुस्फीततत्तवपल्लवपाटलं ॥ तस्याधरदलं शंभोर्निश्वासपवनाहतं ॥ १२ ॥ प्रसुर
स्वेदबिंदूनि प्रज्वलंतीव तेनैनसा ॥ अंगानि वृषभांकस्य ज्वालारूपाणि चाभवन् ॥
१३ ॥ उदग्रकोपज्वलितेतस्य मूर्धनि जाह्नवी ॥ उद्भूतबुद्बुदश्रेणी ताड्यमानेव चा
भवत् ॥ १४ ॥ अंगभूषणतां प्राप्ताः पुष्टाः पुन्नगपुंगवाः ॥ विवेष्टंते स्म रभसा स्वैर्भोगै

॥ल०॥ चदंतान् तस्यत्वपातयत् ॥ तस्मात्पूषाप्रपिष्टाशी यस्मादेषोत्थदंतकः ॥४९॥ दंतनि
॥३५॥ र्भेदसंजातः रुधिरोक्षितविग्रहः ॥ तदाविवस्वान्प्रबभौ पूर्वाद्रिरुदयन्निव ॥५०॥ न
मुत्सृज्य दीनार्थाशं भिन्नदंतं नपातितं ॥ वीरभद्रोनिवेगेन जग्राह रजनीकरं ॥
॥५१॥ तं पातयित्वा धरणौ मृगयोतमिवद्विपः ॥ पादेनातिकठोरेण पुष्पपेषं पिपेषह ॥
॥५२॥ यथाकलावशेषोयमत्यंतं क्रुशतां व्रजेत् ॥ तथा पिपेष पादेन वीरभद्रोनि
शाकरं ॥५३॥ अथ नेतस्तुतिस्तस्य कुनापीयपरोचिथा ॥ तयास्तुत्याचक्रप्रीतः
तं मौलौ समधारयत् ॥५४॥ अतएव महेशानश्चंद्रचूड इतीर्यते ॥ अथ सरस्व ॥श्री॥
तीदेवीं भीतिभृष्टविपंचिकां ॥५५॥ गृहीत्वा वीरभद्रस्तु नाशिकामच्छिनद्द्रुतं ॥ ॥१९॥
अथाग्नेर्बाहुयुगुलं खड्गेनैव व्यदारयत् ॥५६॥ ईदृशं तं समालोक्य वीरभद्रं

महाद्भुतं ॥ चक्रमुद्यम्य हस्तेन चक्रपाणिः समुत्थितः ॥५७॥ आरूढो गरुडं प
क्षक्षेपविक्षिप्तसागरं ॥ दिव्यास्त्रशरवर्षेण वीरभद्रमवाकिरत् ॥५८॥ वीरभ
द्रश्च कोपेन स्यंदने महति स्थितः ॥ अस्त्रज्वालाकलापेन दहन्निव तमभ्यधा
त् ॥५९॥ तयोरन्योन्यतुमुलः प्रकंपितजगत्त्रयः ॥ संग्रामस्तु महानासीत् मत्तयो
रिव हस्तिनोः ॥६०॥ कोपाट्टहासनिनदैः पूरयंतौ दिशो दश ॥ भ्राम्यंतावतिगर्जं
तौ भर्त्सयंतौ परस्परं ॥६१॥ दिव्यान्यस्त्राणि मुंचंतौ क्षोभयंतौ जगत्त्रयं ॥ हस्त
लाघवमत्यंतं सूचयंतौ पराक्रमं ॥६२॥ चक्रतुः प्रथनं घोरं चक्रपाणिगणेश्व
रौ तयोरुद्दीप्तसंरंभं वीरभद्रे जयं पुनः ॥६३॥ पश्यन्योनिर्विनिश्चित्य तस्य सा
रथितामगात् वीरभद्रस्य तं कोपं श्वतुरश्वतुराननः ॥६४॥ निजसारथिकृत्येन

॥ल९॥ प्रममार्ज मुहुर्मुहुः ॥ सूततामाकलय्यास्य कृप्रीतः पद्मजन्मनि ॥ ६५ ॥ वीरभद्र
॥३५॥ श्चक्रभृत्तौ युद्धमुद्धतमातनोत् ॥ पिनाकशार्ङ्गनिर्घाताः प्रचंडातपकारिणः ॥
॥ ६६ ॥ विश्वं प्रोर्णुनुवुः शश्वद्धियाद्यागाढरंहसः ॥ शरैरजेयमालोक्य वीरभद्रं जना
र्दनः ॥ ६७ ॥ तत्राक्षिपत्सहस्रारं चक्रं लोकभयंकरं ॥ घूर्णमानं नभश्चक्रे तदा
लोक्य स दर्शनं ॥ ६८ ॥ व्यात्तेन निजवक्त्रेण वीरभद्रः समागिलत् ॥ नष्टे चक्रे
वीरभद्रं बभाषे गरुडध्वजः ॥ ६९ ॥ वीरभद्र महावीर स्थाने तव पराक्रमः ॥
स्थाने त्वया कृता शिक्षा दक्षस्याथ दुरात्मनः ॥ ७० ॥ साक्षान्महेश्वरस्यांगमू ॥श्री॥
र्त्तोसि भवनेशितुः ॥ तव शौर्यं महावेगं सोढुं लोके क ईश्वरः ॥ ७१ ॥ अप्रसक्त ॥३६॥
नियातं यन्मम चक्रं गलिष्यसि ॥ वज्रादपि महावेगं तत्त्वया गिलितं हठात् ॥ ७२ ॥

अहो दुष्टेन दक्षेण नाशितं कुलमात्मनः ॥ वयं न ह्याहितत्संगादिति तेषामभूद्वचः
॥ ४१ ॥ इंद्रो मयूरवेषेण भीतभीतः पलायितः ॥ यज्ञस्तु मृगरूपेण धावन्नत्यंतका
तरः ॥ ४२ ॥ वीक्षितो वीरभद्रेण प्रधावन्ननुधावता ॥ तूणीमुखात्समुद्धृत्याशित
मेकं शिलीमुखं ॥ ४३ ॥ तेन यज्ञस्य मूर्धानं चकर्त चतुरक्रमः ॥ मृगरूपस्य यज्ञस्य
पतितस्य महीतले ॥ ४४ ॥ बहुरक्तावरुधिरं पुरोडाशकृवासिनं ॥ क्रतुध्वंसीति
तेनैव नाम वीरस्य पप्रथे ॥ ४५ ॥ यज्ञं हत्वा च यज्ञस्थानं हंतुं प्राविशदंतरं ॥ तत्राप
श्यद्वीरभद्रो रौद्रः कोपकृताशनः ॥ ४६ ॥ दहंतं निवहं शश्वद्विश्वमादित्यं पुरतः स्थितं ॥
अनूरुसारथियुते रथे तिष्ठंतमंजसा ॥ ४७ ॥ सहस्रांशुस्तथा केशेष्वग्रहीदुग्र
विक्रमः ॥ केशेष्वाकृष्य तं भूमौ पातयित्वा दिवाकरं ॥ ४८ ॥ ताडयित्वा कपोलौ

॥८०॥ भोश्व माभेदमवधारय ॥ शंभोराज्ञामसैवाज्ञा दक्षे मदेयनिर्दयं ॥ ८१ ॥ इत्युक्त्वा वी
॥१७॥ रभद्रं तं विष्णुनाप्रभविष्णुना ॥ निर्वृत्तमेव समराद्धिनाथ के णमास्वता ॥ ८२ ॥ निवृ
त्तमानेगोविंदे धातारं स्वस्य सारथिं ॥ प्रीत्या समोदिदेशात्मप्रसादस्यैकभाजनं ॥ ८३ ॥
अथ प्रविश्य निःशंकं वेश्म दक्षप्रजापतेः ॥ अट्टहासमातेने — मूर्छितायेन तद्गताः ॥
८४ ॥ अपतन्नतिविभ्रान्ताः तस्य पादे मुनीश्वराः ॥ अकुर्वंस्तु नयस्तस्य केचित्स्तोत्रं
पदे पदे ॥ ८५ ॥ उपेक्षितान्दुराचारान् विप्रान्विभ्रासविह्वलान् ॥ यागशालागतं
दक्षं वीरभद्रः समासदत् ॥ ८६ ॥ गच्छन्नेव कठोरेण तर्जयन्वचसा मुहुः ॥ करालेन ॥श्री॥
कृपाणेन शिरस्तस्य समाच्छिनत् ॥ ८७ ॥ यजमानस्य पत्नी तो लपंती मुक्तकुंतला ॥१७॥
पादे निपतितो भीरुमवधूतभयंकरः ॥ ८८ ॥ भिन्नं तस्य दुराशस्य दक्षस्य स्रुतशो

णितं ॥ मूर्धानमग्नौ चिक्षेप भक्षयेत्येव भर्त्सयन् ॥ ८९ ॥ सोपि वैतातदहनः पूर्वं ल्लूनभु
जद्विपः ॥ शिरछेदभयाद्भूयो भक्षयामास नतच्छिरः ॥ ९० ॥ अथ दक्षस्य याः पत्यस्ताः
सर्वा भीतिविह्वलाः ॥ उत्तानपाणयो मुक्तकेश्यो गद्गदभाषिताः ॥ ९१ ॥ प्रस्खलपद
विन्यासाः किंकर्तव्यसमाकुलाः ॥ विभ्रष्टभूषणशता विमुक्ताश्रुपयः कणाः ॥ ९२ ॥
अन्योन्यमंगलाश्लिष्टकंठं दत्यस्तारनिस्वरं ॥ वीरभद्रस्य हृदयं नवनीतं वितेनि
रे ॥ ९३ ॥ कंठं दत्य रत्ताह दंप्रोचुर्दक्षस्य हरिणीदृशः ॥ देवदेव चक्रमंह्ना — संहार भैर
व ॥ ९४ ॥ वीरभद्र कृपासांद्र रौद्र विक्रमसेवधे ॥ साक्षाच्छिवमयाकार सर्वेषां प्रा
णतत्पर ॥ ९५ ॥ दुष्टसंहाररसिक शिष्टपालनचंचुर ॥ त्रिनेत्राग्निशिखादग्धा सम
स्तभुवनक्षये ॥ ९६ ॥ पुनः संसृष्टविश्वेश पुनस्तद्विश्वपालक ॥ ब्रह्मरूपिन्नविश्व

॥ ल० ॥ रूपीन विश्वरूपी निरंजन ॥ २७ ॥ त्वयि कृत्वा महावीरं फलं तस्यो चितं महत्
॥ ३८ ॥ अन्वभूत्स पिरस्माकं प्राजापत्येन — वित्त ॥ २८ ॥ शिक्षास्य सदृशी जाता को यंते
नाथ संहर ॥ कल्पांतकाले भवतः कोपलक्षं जगत्त्रयं ॥ २९ ॥ अयं विप्रवदुःखेन
लक्ष्यस्तव भविष्यति ॥ तस्मादमुष्य जीवातु वैधव्यं तो व्यपोहितुं ॥ ३० ॥ उपायं
कुरु चंडीश येनास्माज्जीवनं भवेत् ॥ इति स्तुतो महासत्वः ताभिर्दक्षपुरंध्रिभिः
॥ १ ॥ कृपयाविष्टहृदयो वीरभद्रो गणेश्वरः ॥ तस्य जीवातवे छाग शिरसंधायत
त्क्षणे ॥ २ ॥ पुनरुज्जीवितं चक्रे तासां रक्षणहेतवे ॥ अतोत्थितः स दक्षोपि जीवि ॥ श्री ॥
तस्तेन कर्मणा ॥ ३ ॥ तुष्टाव वीरभद्रं तं मेषमूर्धा प्रजापतिः ॥ मया कृतमना ॥ ३८ ॥
हत्य भगवंतं त्रिलोचनं ॥ ४ ॥ अभिचारमयं कर्म क्रतुर्व्याजात्स घातुलं ॥

अतो दुरात्मा दक्षोयं न केनाप्यत्र रक्षते ॥ अहमीदृक् कुदृशो जातः कस्तस्यान्यो भि
रक्षक ॥ ७३ ॥ तस्मादिमं शिवद्रोहसंपन्नं बहुपातकं ॥ देवीद्रोहेण चात्यंतं पापिष्ठं
जहि दुर्धियं ॥ ७४ ॥ कालांतरे महेशस्य कलाच बहुधोत्तयः ॥ अहमाप्स्यामि मच्चक्रे
त्वंकुरोः परमेश्वरात् ॥ ७५ ॥ अतस्त्वमसि महावीर वीरभद्र प्रजाम्यहं ॥ संसाधय शि
वस्याज्ञां दुष्टदक्षे च भस्मय ॥ ७६ ॥ यादृगाज्ञा महेशस्य तादृगेव ममापि सा ॥ नावयो
विद्यते भेदः पुराणेष्वागमेपि च ॥ ७७ ॥ अहं शक्तिः शक्तिमान्यो विश्वस्यापि महेश्वरः ॥
शक्तिशक्तिमतोर्भेदं को जनः प्रतिपद्यते ॥ ७८ ॥ वह्नेश्च दाहिकायाश्च भेदः कोनुस
मीक्षिते ॥ आद्याशक्तिर्महेशस्य चतुर्धा भिन्नविग्रहा ॥ ७९ ॥ भोगे भवति रूपा सा दु
र्गारूपा च संगरे ॥ कोपे च कालिका वेषा पुंरूपे च मदात्मिका ॥ ८० ॥ तस्मा मम चर्श

शिवोह्यियज्ञपुरुषोऽयज्ञकर्मफलप्रदः॥ ५॥ अनाहत्यं शिवं यहं विनियातो भ
वत्सले॥ नमो नमस्ते वरवीरभद्र पुनःपुनर्वीर नमो नमस्ते॥ ६॥ कृतांगसं मामश
रणमत्र कृपाकटाक्षप्रसरेण रक्ष॥ दर्पातिरेकेण समाकुलात्मा प्रजापतित्वेन॥
नु मत्तचित्तः॥ ७॥ प्रभुं महेशं जगतां त्रयाणामदूषयं दुष्परिवादनाभिः॥ शिवद्रुहो
देहभृतां कदापि निस्तारवार्त्तापि न नारकाब्धेः॥ ८॥ मयैव भाग्येन कृता त्वयाद्य दो
षस्य भूरेर्महती हि शिक्षा॥ तस्मात्रिलोकेश मचिंत्यशक्तिं त्वां स्तोतुमीश प्रभवं
ति केवा॥ ९॥ अद्यप्रभृत्येष भवद्विविध्यन्नतोऽस्म्यहं तावकपादसेवां॥ १०॥ इति स्तु
तस्तेन स वीरभद्रः तस्मिन्प्रसादं चरयन्क्षयोच॥ संधाय मूर्धानमथाध्वरस्य
पुरः प्रतस्थे पुरवैरिवासी॥ ११॥ एतन्महावीरपराक्रमस्य श्रीवीरभद्रस्य सुभं॥

॥ल०॥ पवित्रं॥ पठंयेयेखलुपापिनोपि पदंमहेशस्यसमाप्नुवंति॥ ९२॥ इदंपवित्रंचरि
॥१९॥ तंसमस्तंदुष्कल्मषध्वंसकरंपठंतः॥ महानुभावामहितैर्यशोभिर्भजंतिभा
ग्यानिसुदुर्लभानि॥ ९३॥ इतिश्रीब्रह्मांडपुराणेतृतीयोध्यायः॥ श्रीललितात्रि
पुरसुंदरीदेवतार्पणमस्तु॥ श्रीअगस्त्यउवाच॥ परितुष्टास्मिभद्रंस्तेवारभ
द्रकथामृतैः॥ श्रोतव्यमपरंकिंचिदवशिष्टंहयानन॥ १॥ आरूढयौवनेष्टाम
हिमवच्छैलनंदिनी॥ किंकृत्यमकरोत्पश्चात् किंविवादस्ततोभवत्॥ २॥ शंभु
नाथाचिंताकिंवाकिंवास्वयमुपागता॥ किंप्रकारोविवाहोस्याः संवृत्तस्तुरगान ॥श्री॥
न॥ ३॥ एतत्सर्वंविस्तरेण कथयस्वममप्रभो॥ त्वमेवखलुसर्वासांकथानामसि ॥१९॥
सेवधिः॥ ४॥ श्रीहयग्रीवउवाच॥ कुंभसंभवतत्सर्वंकथयाम्युपधारय॥ यस्य

संश्रवणादेवपापराशिः पलायते ॥ ५ ॥ तांतथाद्भुततारुण्यांविश्वानंदविवर्धि
नीं ॥ विलोक्यहिमवांछैलो ममस्यैवंविचारयत् ॥ ६ ॥ इयंममकुलेजाताकांत्या
त्रैलोक्यमोहिनी ॥ मणिप्रदीपमालेव भासयंतीयशोमम ॥ ७ ॥ असाधारण्य
सौभाग्यकरयाभद्ररूपया ॥ चरितार्थितमेवासीदनयाममसत्कुलं ॥ ८ ॥ अनु
रूपवरोयोग्योवयोस्यावर्त्ततेधुना ॥ अस्यास्तुसदृशोभर्तात्रिषुलोकेषुनेक्षते
९ ॥ नेंद्रोनाग्निनचयमोनपाशीनसमीरणः ॥ नबुरोनचब्रह्मा सदृशोस्याद्भवे
त्पतिः ॥ १० ॥ कोवानुरूपोभवितानापिविष्णुर्भविष्यति ॥ इतिचिंतयमानंतमेकां
ते हिमवद्गिरिं ॥ ११ ॥ समासमासादमहितोवैणिकोमुनिपुंगवः ॥ पर्वतेनचमित्रेण
सहसर्वत्रसंचरन् ॥ १२ ॥ आश्चर्यदर्शनार्थायतस्यस्थानंसमागतः ॥ आकाशा

॥ल०॥ दपतस्पूर्वे चंद्रमंडलनिर्मलः ॥१३॥ गोक्षीरधवलाकारो विद्युत्पिंगजटाटविः ॥ महत्यावी अ ८
॥२०॥ णयानादब्रह्मनित्यानुषक्तया ॥१४॥ गीतबंधेन तद्ध्येन स्तुवानश्चंद्रशेखरं ॥ अं
तरात्मानुसंधाननिरंचत्पुलकान्वितः ॥१५॥ गंगासलिलसंसिक्तसिंधोनशुद्धव
पुर्द्युतिः ॥ अभ्यंतरस्थितं सैकं नारदः समुपाविशत् ॥१६॥ तमापतंतं दिव्यर्षिधाम्ना
दिव्येनशोभितं ॥ विज्ञानसहशं हृष्ट्वा प्रत्युत्थानं गिरिर्व्यधात् ॥१७॥ प्रत्युत्थितो गि
रींद्रेण कृतपाद्यार्घ्यपूजनः ॥ विष्टरे वेशितश्चासौ नारदस्तु मुदान्वितः ॥१८॥ त्वं गिरी
णां समस्तानां वासवो मरुतामिव ॥ अग्रेसरोसि भद्रं ते सोजन्यं मम हर्षदं ॥१९॥ सु ॥श्री॥
मुखवासि गुणाढ्योसि सर्वभूचक्रधारकः ॥ त्वं शेषश्चादिकूर्मश्च दिङ्नागाश्च म ॥२०॥
होत्कटाः ॥२०॥ यूयं धारयथा क्षोणिं विश्वश्लाघ्यस्तुतो ह्यसि ॥ इतः परं भवद्भाग्यं

॥ ८० ॥ वैवाहिकविधानतः ॥ २९ ॥ एतदर्थेकरिष्यंतिनारकास्फरपीडिताः साहाय्यक
॥ २३ ॥ रूरश्रेष्ठास्तस्मादेवेसमाचर ॥ ३० ॥ इतिदिव्यदृशातेननारदेननिवेदिते ब
हुमेनेनिजंवंशं अंबिकाजन्मयावितं ॥ ३१ ॥ इतिभाव्यथमालेष्यगतस्वेरगतिर्मु
निः ॥ सोपिस्थाण्वाश्रमंगंतुप्रालेयाद्रिःप्रचक्रमे ॥ ३२ ॥ संख्याविजययायुक्ताज
यायाचरूशीलया ॥ पुत्रींनिजोसमादायस्थाण्वाश्रममुमागतः ॥ ३३ ॥ अनेकको
टिसंख्यातेर्गणनाथैर्महाबलैः ॥ परितःपालितंभूरिफलपुष्पसमृद्धिमत् ॥ ३४ ॥ कै
लासशैलपादस्यभूरिकेशविवर्त्तिनः ॥ तत्समीपेनिविष्टंचशांतसत्वंमनोहरं ॥ ३५ ॥ श्री
रूस्निग्धछायेकेलिदेवदारुविराजिते ॥ नमेरुशिंशपालोद्रप्रायकांतारशो ॥ २३ ॥
भितं ॥ ३६ ॥ पुण्यपक्षिमृगाकीर्णंलघुनिर्झरशीतलं ॥ शिवभक्तैःसदाचारैःस्त्रि

पुंड्रांकितमस्तकैः ॥ ३७ ॥ कस्तूरिकामृगावासरूवासितशिलातलं ॥ भस्मोद्धू
लितसर्वांगैःपटुभिश्चाप्यधिष्ठितं ॥ ३८ ॥ चंद्रचूडशिवेशाननीलकंठेतिनि
शः ॥ जपद्भिःकूजितव्याजात्पक्षिभिःसमलंकृतं ॥ ३९ ॥ स्त्रीवार्तयाविरहि
तंतपोवैभववर्धनं ॥ स्थाणोस्तपःक्रियायोग्यंस्थाण्वाश्रममगान्नगः ॥ ४० ॥ आ
श्रमस्यबहिर्द्वारेतत्रतोविनिवेश्यच ॥ स्वयंविनीतनेपथ्यःसन्भक्तिसंकुचितोवि
शत् ॥ ४१ ॥ अंतर्गृहबहिर्द्वारेवर्तमानंमहौजसं ॥ शिलादतनयंशैलोनंदि
केश्वरमब्रवीत् ॥ ४२ ॥ नंदीन्प्रधानभक्तोसिसोमार्धमुकुटस्ययत् ॥ तस्मात्त्व
याद्ययत्किंचित्शंभोःकार्यंनिवेद्यतां ॥ ४३ ॥ सेवितुंचरणद्वंद्वंममेछावर्त्ततेप्रभो
तस्मिन्ममागमंब्रूहिज्ञात्वावसरमुत्तमं ॥ ४४ ॥ इत्युक्तेगिरिराजेननंदीप्यकशि

॥ १० ॥ रवामणिं ॥ उपगम्य प्रणम्याह हृष्टेन पिहिताननं ॥ १५ ॥ सेवितुं देवपादाब्जं
॥ २२ ॥ वर्त्तते हिमवानिति ॥ विज्ञापितो महादेवो नंदिना तपसि स्थितः ॥ १६ ॥ किंचिद्धृष्टमनः सं
जातस्य समागमनमादिशत् ॥ अथ नंदी सरभसं गत्वा शैलपुरोगमं ॥ १७ ॥ अंतः प्रवे
शयामास सोपि तस्थौ किंकरः गतः ॥ प्रणम्य जगतां नाथं महोग्रस्पृष्टभूतलः ॥ १८ ॥ उदयुंक्तो
निजं कार्यं विज्ञापयितुमद्रिराट् ॥ देव त्वं सर्वलोकस्य वंदनीयो महेश्वर ॥ १९ ॥ अना
दिनिधनः शुद्धः स्वतंत्रस्तेजसां निधिः ॥ त्वत्पादपंकजौ स्मृत्वा पातकं प्रविलीयं ॥ २० ॥
त्वद्दर्शनं समस्तानां तपसामेककं फलं ॥ त्वामनाश्रित्य कस्यापि नाभिवांछति सिद्धयः ॥ २१ ॥ श्री ॥
त्वत्सूजां तत्वनामशिवांछासिद्धिः पदे पदे ॥ आस्ते ममेका विज्ञप्तिः देवेन हृदि धार्यतां ॥ २२ ॥ ॥ २२ ॥
पार्वतीति सुता कापि मदीया गुणशालिनी ॥ त्वत्पादपद्मशुश्रूषां कर्त्तुमिछति शंकर ॥ २३ ॥

किंतु वा विद्यते गिरे ॥ २३ ॥ चतुर्द्दशजगन्माता तवेयं कन्यका भवत् ॥ इयं लक्ष्मी
रियं पुष्टिरियं धात्रीयमेविका ॥ २४ ॥ देहार्द्धधारिणी त्वेयं प्रोक्ता चंद्रशिरोमणे ॥ इ
यमेव स्वधा स्वाहा नीतिः सन्तितिरेव च ॥ २५ ॥ आत्मविद्या गुह्यविद्या पापघ्नी पा
पनाशिनी ॥ इयं भविष्यति विभोः शंभोरंकविभूषयां ॥ २६ ॥ आरूढयौवना त्वेयं
न तूपेक्ष्या कथंचन ॥ इमां गृहीत्वा देवस्य गच्छस्या वाश्रमं प्रति ॥ २५ ॥ मदुक्तं मावजा
नीहि तत्र शंभूस्तत्पश्यति ॥ वैराग्येण समाविष्टः सति देहा विसर्जनात् ॥ २६ ॥ संनि
यम्येंद्रियग्रामं स घोरं तप आस्थितः ॥ त्वं गत्वा शैलमूर्द्धस्य निकटे तनयोत्तिजां
॥ २७ ॥ निवेश्य परिचार्यार्थं अनुज्ञाप्य कथंचन ॥ पुनरायाहि नगरं त्वं वसत्ति गिरी
श्वर ॥ २८ ॥ क्रमात्परिचये जाते त्वत्सुत्या सह शंकरः ॥ करिष्यति समाश्लेषं

तस्या वांछाभिपूर्त्तिर्यद्भवतः सेवया भवेत् ॥ अतस्त्वत्पादशुश्रूषां कर्तुमिच्छति म
त्सुता ॥ ५४ ॥ स्त्रीणां च पुरुषाणां च जडानामजडात्मनां ॥ सर्वेषां भवतः पूजा
परमेकं परायणं ॥ ५५ ॥ यशी नामयगण्योसीत्तस्माद्देव तपश्यतः ॥ नतुमत्यूहृज
ननीममकन्या भविष्यति ॥ ५६ ॥ तस्माद्देतावतादेव नक्षत्तिस्तपसस्तव ॥ दुहितु
श्चापिमेवांछापूर्त्तिर्देव भविष्यति ॥ ५७ ॥ यदि चेदमनुज्ञातं भवता भयतापन ॥ त
दानयामिद्धारस्थां सखिभ्यां सहयावर्वतीं ॥ ५८ ॥ सदाशंभवतः शंभो ग्रहसंमार्जना
दिभिः पुष्पाद्युपनयैश्चापि मालाग्रथनकर्मणा ॥ ५९ ॥ निम्नगांबुसमानीत्वा कार्यै
रन्यैव धूत्रितैः ॥ करिष्यतीहशुश्रूषां यद्यनुज्ञात व प्रभो ॥ ६० ॥ इति विज्ञापितस्तेन
गिरिणा गिरिशस्तदा ॥ कोदोषो याहशीछा ते तथा कुर्वित्यभाषत ॥ ६१ ॥ ततः प्रय

॥स्कं०॥ म्यत्हृष्टात्मा हिमवानद्रिशेखरः॥ चंद्रशेखरपूजार्थंन्ययुंक्त स्वकन्यकां॥ ६२
॥२३॥ सा पार्वती सखीयुक्ता विनीता भक्तिशालिनी॥ अनुकूला सदाचारा नित्यं तं समु
पाचरत॥ ६३॥ अलस्यं न कदाप्यस्या वेदिसंमार्जनादिषु॥ नित्यमुद्योगवत्यासीत्पु
ष्पाहरणकर्मणि॥ ६४॥ देवपूजनवेदीषु बध्वा चंदनमालिकां॥ पूर्णकुंभं च विन्यस्य
सा सक्तैः कुसुमैः स्थलं॥ ६५॥ चित्रितं गिरिजा चक्रे चित्रैर्मंगलपिष्टकैः॥ उपानिन्ये
च शुद्धानि तर्पणार्थं जलानि च॥ ६६॥ मंदाकिन्याश्च सौवर्णपद्मजालमुपाहरत॥
कोमलांस्त्रिकुशान्गौरी होमार्थं पल्लवानपि॥ ६७॥ आनीयानीय सत्कारं चंद्रचूडस्य ॥श्री॥
सा तनोत॥ एवं प्रकारतः कालं महांतं सा यशस्विनी॥ ६८॥ आराधयनिजाभीष्ट ॥२३॥
सिद्ध्यै नीलकंधरं॥ सोपि देवः पशुपतिः स्त्रीसंश्लेषपराङ्मुखः॥ ६९॥ नासायं

न्यस्तनयैनो नियम्येंद्रियमंडलं॥ भ्रूमध्ये हृदयन्कुर्वंअंतर्विन्यस्तलोचनः॥७०॥प
रानंदमये धाम्निनिर्विकारे निरंजने॥ अद्वितीये सदोल्लासे प्रतीचीदृष्टिमर्पयत्
७१॥समुद्रइववीचीवीभिरत्यंतस्तिमिताकृतिः॥ विकल्पोभोगरहितः प्रसंख्या
कं प्रवर्त्तयन्॥७२॥अबहिर्मानसः शंभूरात्मज्योतिः परोभवत्॥तस्मिन्नंतरे
देवास्तारकेणातिपीडिताः॥७३॥ब्रह्माणंशरणंगत्वा चक्रुर्दुखयकारिणः॥अ
थोसुरस्तेकृतस्तोत्राः तारकासुरवैशसं॥७४॥दे उ॥त्वंस्रष्टाजगतांब्रह्मपाल
कश्चापवेक्षितः॥त्वदेकजीविताः सर्वेवयमेतेदिवौकसः॥७५॥अतोस्माकंत्व
यारक्षो कथंचनविधीयते॥ उपेक्षांकर्त्तुमर्त्तिषुनास्मासु तवयुज्यते॥७६॥त्व
यादत्ताधिकारास्तुत्वयैवपरिपालिताः॥अधुनातुत्वयापेक्ष्यास्तवएतेविनाशि

॥ ल० ॥ ता: ॥ ७७ ॥ अत्याहितमनुप्राप्तमस्माकं पद्मसंभवं ॥ हृदि शल्यमतिक्रूरमस्माकमनु
॥ २६ ॥ वर्त्तते ॥ ७८ ॥ तारको नाम दैत्येंद्रो भवदत्तवरोद्धतः ॥ मद्वासतो महाधीरस्त्रैलोक्यं
परितापयत् ॥ ७९ ॥ हिरण्यकशिपोर्गोत्रे जातस्तुल्यपराक्रमः ॥ अत्यंतचपलो नह
तीति मानीमदोद्धतःकृ ॥ ८० ॥ अस्माकं सततं द्वेष्टा यज्ञकर्मविनाशनः ॥ कैस्यैद्वैर्द्वं
स्वधास्वाहावषट्कारवर्जितं कृतवान् जगत् ॥ ८१ ॥ सर्वानपि मुनीन् श्रेष्ठान् विद्राव
यति कोपिनः ॥ कल्पवृक्षं जहारास्य शक्रस्य कमलोद्भव ॥ ८२ ॥ चिंतामणिं च जगृहे
तथा कामगवीमपि ॥ परहं ध्वनिमात्रेण कांदिशीकेषु नाकिषु ॥ ८३ ॥ स्वयं स्वर्गसमा ॥ श्री ॥
गत्य सर्वं लुंठितवान् धनं ॥ गोपुराट्टालकाद्याश्च सौधप्रग्रीवकादयः ॥ ८४ ॥ मत्तवा ॥ २६ ॥
रणवेद्यश्च सोपानस्य च भित्तयः ॥ चंद्रशालाश्च विविधा सभामंडपकोटयः ॥ ८५ ॥

॥ल०॥ णशूलेनापिचशूलिनः॥१४॥असाध्यएवसप्रायःसमस्तबलसेवधिः॥किमत्रदे
॥२५॥ वकर्त्तव्यंयदिस्यादुपदिश्यमां॥१५॥येनदुष्टासुरस्यास्यशमनंभवतिध्रुवं॥वरे
णगर्वितोब्रह्मन्नुभवदत्तेनदानवः॥१६॥चुलिकांकुरुतेसर्वंत्रैलोक्यंसचराचरं॥
अनाथनाथत्वमसित्वंसखात्वंपितामहः॥१७॥त्वमस्मद्विपदांभोधिकर्णधारधुरं
धरः॥यदित्वमधुनोपायंनवक्ष्यसिचतुर्मुख॥१८॥तारकस्यसमुच्छेदेतदस्मज्जी
वनंकुतः॥इतिदीनप्रलापैस्तैरमरैर्नाथितोविधिः॥१९॥जगादमधुरंवाक्यंतान्प्र
तिद्विषमर्दितान्॥२०॥इतिश्रीब्रह्मांडपुराणेउत्तरभागेललितोपाख्यानेचतु ॥श्री॥
र्थोध्यायः॥४॥ब्रह्मोवाच॥भोभोदेवादुराधेनतारकेणनिपीडिताः॥भवंतोदुःख ॥२५॥
मायाताःउपायःकथ्यतेमया॥३॥सहिदैत्यपतिःसत्वशालीबाल्येपिमांप्रतिज्वा

त्वासंतापिनाशेषंसुघोरंतप्तवान्तपः॥२॥तस्मिंस्तपस्तप्यमानेचतुर्दशजगंत्य
पि॥धूपायितानिचाभूवन्नबाधितश्चशरीरिणः॥३॥अतोहमस्यसान्निध्यंकृत
वान्प्रीतमानसः॥तेनवव्रेवरःकश्चिन्नममसान्निध्यकारिणा॥४॥त्वंसमस्तज
गत्स्रष्टासर्वकामप्रदःपिता॥त्वत्तएवफलप्राप्तिःसर्वेषांचतपस्विना॥५॥यदिम
य्यप्रसन्नोसिश्रीमन्नलिमदुहर॥प्रार्थ्यतेवरमेकंतत्तुअंजसापरिपूरय॥६॥अ
नौमुक्तेनवीर्येणयःकश्चिदुपजायते॥तस्मादेवभयंमेस्तुनान्यतोवीरकोटिनः
७॥इत्येवहिवरोलब्धस्तेनविक्रमशालिना॥तथैवदत्तोविबुधामयातद्भक्तितोषि
णा॥८॥तस्मान्मयावर्धितोयंमयादत्तवरोपिसः॥मय्येवतस्यहननंकर्तुंनखलुयु
ज्यते॥९॥अपिदुष्टोपिधूर्तात्माकपटोपिशठोपिवा॥स्वयंसंवर्धितोजंतुर्नहंतव्यःक

॥कु०॥ दाचन॥३०॥अथवाहंतुमारब्धेमयाप्येतन्नशक्यते॥क्षिप्यतेज्वलनोवेश्मन्यस्य
॥२८॥ शांति॥खुदुष्करा॥३१॥अनःकमपिसेनान्यमुत्पादयततयत्नतः॥येनतारककौदोर्दर्प
शमनंसंभविष्यति॥३२॥भवितासहिसेनानीःपार्वत्यासहसंगतात्॥स्थाणोरेवजग
च्चक्रनाथश्चंद्रशिरोमणेः॥३३॥सत्विदानींसतीदेहत्यागैरागयमाश्रितः॥स्त्रीसंनि
कर्षमात्रेपिवैमुख्यंसुरसेपागतः॥३४॥अतिघोरतपोनिष्ठोस्वात्मध्यानपराय
णः॥आत्मानमात्मनापश्यन्नास्तेस्थाण्वाश्रमेशिवः॥३५॥देवाद्युष्मत्कृतेगिर्य्यं
रिदानींतस्यसन्निधौगुरुणापरिचर्यार्थमनुशिष्टैवपार्वती॥३६॥सेव्यमानामपि ॥श्री॥
स्थाणुस्तांसोयंदंतरंगिणीं॥नालोकतेनालपतिप्रसंख्यानपरोहरः॥३७॥तयास ॥२८॥
हसमासंगंकुरंगधरशेखरः॥यदियुष्मत्कृतेयत्नैःप्रयास्यतितदासक्तं॥३८॥

रत्नाश्वरत्नखचिताःसौवर्णाःसुरसौतदाः॥भग्नाःसर्वेपिहम्येनतारकेणदुरात्मना॥८६॥
नाशितंसकलंराज्यंवज्रपाणेर्विशेषतः॥चंद्रसूर्याद्यधीकारास्स्वयमेवमुनाकृताः
॥८७॥गतेचंद्रस्यचंद्रत्वंसूर्यस्यापिचसूर्यता॥अग्नेरग्नित्वमगमद्यमस्ययमताहृता
॥८८॥तत्तत्कृत्यंस्वयंकुर्वन्बाधतेनानपिहतं॥बंदीकृतास्त्रियःसर्वाःसर्वेषामपिनः
प्रभो॥८९॥धिक्कष्टमेतत्परतोवकुलज्ञापिजायते॥सर्वंतत्प्रतापाग्निर्दहत्येवंजत्रै ग
यं॥९०॥तस्यत्रासज्वरेणैवसर्वदादुःखमेवनः॥आहारेषुविहारेषुनास्माकंवर्त्तते
मनः॥९१॥किंतुरात्रिंदिवंतस्यबाधेर्भूयामहेवयं॥तस्माद्देत्सवविनष्टाःकेचिदन्ये
दिवौकसः॥९२॥मानुषंरूपमास्थायसंचरंतिमहीतले॥देवकार्याणिनष्टानिपि
पितृकार्याणिवानघ॥९३॥दीप्यतेसप्रतापेनतारकस्स्वर्गमर्दकः॥विष्णोरपिचचक्रे

॥२०॥ इत्युक्त्वांतर्दधे वेधास्तेपि सर्वे ययुः स्मराः ॥ अथामरावतीनाथो निजकार्यस्य सिद्धये
॥२१॥ २७ ॥ सस्मार जगतीचक्रे मोहनं हृदयेशयं ॥ अथ पुंड्रेक्षुकोदंडकमनीयकराबुजः
२८ ॥ ज्वलत्पुष्पास्त्रगर्तश्रेणी पूर्णतूणीरशब्दभृः ॥ अशेषविश्वसौंदर्यसारसंपन्न
विग्रहः ॥ २९ ॥ अरविंदमशोकं च चूतं च नवमल्लिकां ॥ नीलोत्पलं च मान्यानि आयु
धानि समुद्वहन् ॥ ३० ॥ चंद्रेण सेनापतिना भाषमाणः पदे पदे ॥ वसंतस्य मुखं वी
क्ष्य मित्रस्य प्रहसन्मुहुः ॥ ३१ ॥ रागेण पीडमर्देन परिहासे समाचरन् ॥ स्त्रीवृंदस्य कु
संपन्नः स्त्रीसमालोकसायकः ॥ ३२ ॥ रजनीमयमायोर्वेन मंदानिलमहारथः स ॥श्री॥
र्वेषां मनसो मोहं संपादयितुमुत्सुकः ॥ ३३ ॥ तपसः प्रथमो विघ्नो माया सारपराक्रमः ॥२७॥
उत्फुल्लकर्णिकाराभकमनीयवपुर्द्युतिः ॥ ३४ ॥ रतिदेव्या समाश्लिष्टः शक्रास्थानं

समाययौ ॥ आगत्य मरुतां नाथः सभ्यवंदितमन्मथः ॥ ३५ ॥ निजबाणच्युतैः पुष्प
रसैर्धूसरयन्स्थलीं ॥ अक्षशक्रेण निर्दिष्टं महत्यासनमंडले ॥ ३६ ॥ भ्रूसंज्ञयाकृता
नुज्ञः पंचबाण उपाविशत् ॥ कार्यसिद्धिपरत्वेन समेतानाकवासिनां ॥ ३७ ॥ सहस्र
मपि चक्षूंषि प्रसन्नान्यत्र दत्तवान् ॥ भर्तुः समस्तनेत्राणि संचोरेणोपशोभितं ॥ ३८
प्रसादं श्लाघ्यमानो सौ पुष्पधन्वाभ्यजिज्ञयत् ॥ देवत्रैलोक्यसर्वस्वश्रीनिवासभुजमंड
ल ॥ ३९ ॥ अखंडितप्रतापाग्नितिरस्कृतमहास्कर ॥ जंभास्फुरचकोराक्षी दर्पह्रास
निशातन ॥ ४० ॥ पुलोमभुजदर्पारिच्छेदन द्विजपुंगव ॥ भवतः स्मत्रसन्नानि वराके
मयि वासव ॥ ४१ ॥ चक्षूंषि किन्न लभ्यानि कार्यं तेन किं नु साध्यतां ॥ अशक्यमपि वा
कार्यं संसाधयितुमु—ल ॥ ४२ ॥ विरक्तौ न्मोहयिष्यामि तप्यमानान्तपो निशं ॥ मयि

॥ल०॥ सन्नद्धकोदंडेवैराग्यंकस्यजायते ॥ ४३ ॥ तपोमाहात्म्यगर्वेणयेचत्वामनुजानते ॥
॥२८॥ येकांक्षंतिभवस्थानंमोहयेतान्नराधमान् ॥ ४४ ॥ द्वयमेवभवच्छस्त्रंकुलिशंचाहमेवच
तासेपेषादिमंकुंठमकुंठस्तापनश्वहो ॥ ४५ ॥ मयिसर्वेप्रसिध्धार्थावर्त्ततेतिशिलीमु
खाः ॥ असाध्यंममबाणानांनकोपिभुवनत्रये ॥ ४६ ॥ स्त्रीमालवार्त्ताविमुखा
नतिघोरतपस्थितान् ॥ करोमिसततंनारीमुखालोकनकातरान् ॥ ४७ ॥ येवातवद्विषो
दैत्याश्चंडउजोदंडतेजसः ॥ त्वद्राज्यंहर्तुमिछंतिमोहयिष्यामितानपि ॥ ४८ ॥ विसृज्य
शस्त्राव्यापारंविधूयाहवचेष्टितं ॥ अंतःपुरेस्फुरखासक्तानकरिष्याम्येवकातरान् ॥ ४९ ॥ अ ॥श्री॥
रालीकेलिसंचारचंचुरालोकपेशलं ॥ तनुवीचिसमुल्लासभ्रूवल्लीनर्त्तनोज्वलं ॥ ५० ॥ व ॥२८॥
क्रवैदग्धफणितिव्यक्तीकृतरदछदं ॥ ईर्षाकलहकोपेनविषादक्तकपोलभूः ॥ ५१ ॥

तयाचरममाणोसौवीर्यंत्यक्षतिभास्करं ॥ तद्वीर्यज्वलनप्रख्यंसोढुमक्षमतांगता
१९ ॥ भूमौत्यक्षतिसादेवीसाप्यग्नौमोक्षतिध्रुवं ॥ सोग्निश्चंद्रस्फभार्यासुकृत्ति
कास्वप्रमोक्षति ॥ २० ॥ ताश्वसंतापविधुराःमोक्ष्यंतिस्वनदीजले ॥ साचतद्वीर्य
दहनज्वालासंतापिताकृतिः ॥ २१ ॥ निजेशरवरप्रांतेप्रक्षिप्यतिवियन्नदी ॥ रता
वतापिकालेनशुक्लंमाहेश्वरंमहः ॥ २२ ॥ प्रयास्यतिपरीणामंकुमारत्वेननिर्जे
रा ॥ स्फकुमारोमहेशानःधृतास्त्रोदृढविक्रमः ॥ २३ ॥ अधीतसर्वविद्यश्चसेनानी
र्वोभविष्यति ॥ नद्देतत्कार्यसंसिद्धेमूलहेतुंकरोतमाः ॥ २४ ॥ पार्वत्यासहसंसर्गेशं
भोःसंपादयिष्यथ ॥ सचेदानीविरक्तात्मावर्त्ततेनिटलेक्षणः ॥ २५ ॥ तस्योत्पाद
यितुंरागंनियोज्योरतिवल्लभः ॥ तस्मादिदानींस्वावासंप्रयातविबुधोत्तमाः ॥ २६ ॥

॥ स्कं० ॥ इत्युक्तः पंचबाणेन किंचित्प्रोदंचिताकृतिः ॥ ६० ॥ सहस्राक्षो वचः काव्या जहार
॥ २१ ॥ गभीरवाक् ॥ जगदेकमहावीर यत्त्वया प्रतिपादितं ॥ ६१ ॥ ततोप्यधिकमेवास्ति शौ
डिर्यैतव मन्मथ ॥ सर्वेषामेव देवानां एकं कार्यं महत्तरं ॥ ६२ ॥ विश्वचक्रोपकाराय
त्वत्प्रधानत्वयास्थितं ॥ त्वां विना तस्य कार्यस्य संपत्तिर्नहि विद्यते ॥ ६३ ॥ कमलाकर
कोशानां स्फोटकः कोरविं विना ॥ तारकासुरवर्यस्य वीर्यराशेर्महीयसः ॥ ६४ ॥ त्रैलो
क्यकंटकस्यैते वांछंति वधमंगज ॥ उत्पादयितुमुद्दामभक्तिं सेनान्यमेकक ॥ ६५ ॥ वां
छंति पार्वतीसंगं शंभोर्मकरकेतन ॥ स इदानीं महेशानस्तपस्यन्नपि वर्त्तते ॥ ६६ ॥ ॥ श्री ॥
वर्त्तते तत्र गिरिजा तत्संगे तद्वशंवदा ॥ तदेतन्मरुतां कार्यं यदि संपादयिष्यसि ॥ ६७ ॥ ॥ २१ ॥
तदा त्वयैव सकलः स्वर्गः संरक्षितो भवेत् ॥ इत्युक्तः सुरनाथेन रतीनाथस्तथास्त्व

ति ॥ ६८ ॥ वदन्नुत्तरवांतस्मै प्रणनाम विडौजसे ॥ अत्यंतदुष्कृते कार्येप्य विशंक्य प्रव
र्तिनं ॥ ६९ ॥ तमिंद्रः प्रीतहृदयो बाहुभ्यां परिषस्वजे ॥ इति संभावितस्तेन त्यक्तसन्मा
नपूर्वकं ॥ ७० ॥ निर्जगाम मरावत्याः स्थाण्वाश्रमसमुन्मुखं ॥ अथ वज्रनिपातेन
निहतेवाशु मूर्द्धनि ॥ ७१ ॥ त्रस्ता रतिः स्वभर्त्तारं वाचमूचे सगद्गदं ॥ अनालोच्य महत्
कार्यं किमंगीकृतवानसि ॥ ७२ ॥ वीरमानित्वदर्पेण त्वया सर्वं विनाशितं ॥ कातरेषु म
नुष्येषु विशृंखलपराक्रमः ॥ ७३ ॥ त्वद्वीत्याया योगिनां नाथं जगन्नाथं पिदर्पसि ॥ कुसती
भेतपो जातनिर्दग्धभुवनत्रयः ॥ ७४ ॥ क त्वं पेशलदोःसारः स्त्रीमात्रे हतविक्रमः ॥ प
तंगो यदि दीपस्य ज्वालाग्रं भक्षयिष्यति ॥ ७५ ॥ मशको वा यदि विषं महस्री त्वामुदंत्र
जेत ॥ यद्यंधकारनिवहः सूर्यमाहूत्य तिष्ठति ॥ ७६ ॥ तदा तव भवेच्छक्तिप्रभावज्य

॥ल०॥ लिते हरे॥ त्रिपुरादपि किं सारः त्वं किं सारोयमादपि॥ ७७॥ अंधकादपि किं सारः
॥२०॥ कथं त्वं गर्वितः शिवे॥ इमं प्रतिक्रियाशून्यं स्वात्ममात्रविनाशनं॥ ७८॥ त्यवसाय
प्रसन्नोसि वासवेन विमोहितः॥ ते हि धूर्ताः क्रूराः सर्वे निजकार्यस्य सिद्धये॥ ७९॥
रूजबुद्धि भवं तं हि पातयिष्यंति संकटे॥ इदं प्राकुणिकद्वारा दुष्टसर्पस्य मारणं
॥८०॥ अन्यलोकस्य पुत्रेण नदीगाधविशोधनं॥ त्वयि नष्टे रुद्रौरे र्णां किन्नु छिन्नं
भविष्यति॥ ८१॥ ममैव दुःखं वैधव्यात् अभव्यमनुमोक्षते॥ अतिकष्टमिदं कष्टं
कष्टात्कष्टतरं त्विदं॥ ८२॥ यज्जिगीषुः संयमिनं महादेवं प्रधावसि॥ इति रत्यायु ॥श्री॥
क्तियुक्तं निशम्य वचनं स्मरः॥ ८३॥ अंतर्हि शंकमानोपि धीरं प्रोवाच भाषितं॥ ॥२०॥
किं पापिष्ठे प्रलपसी किं ममापि रूद्र दुर्जयः॥ ८४॥ महानुभावा अपि मे---

भट धूर्त इतनाशेति सदा भर्त्सीन सत्वरं॥ मुख्वमंतः पुरस्त्री— दर्शयं तः स्मरातु रा॥ ९२॥
उत्साहमखिलं त्यक्त्वा नाभ्यां यांति मयाहताः॥ अथवा कोस्त्रियं लब्ध्वा निजवांछाभि
मानिनीं॥ ९३॥ इच्छासीति जगन्नाथया वह्निवशया मितो॥ यातेहृष्टिपथं यातापातिव्र
त्यमदोद्धता॥ ९४॥ त्वत्कृतप्रार्थनावाक्यमुल्लंघ्योल्लंघ्य वर्त्तते॥ तां शरीरलवज्वा
ला चूडालेरपि पीडयन्॥ ९५॥ त्वदेकशरणे तस्यां कलयिष्यामि वीरतां॥ यत्र क्वाप्यनु
जानीहि गंतुं तत्रापि साधये॥ ९६॥ न क्रूरेषु न दैत्येषु न नरेषु न भोगिषु॥ न साध्येषु न य
क्षेषु न च चारणजातिषु॥ ९७॥ न ब्रह्मणि न वा विष्णौ त्वहं नाकि मिह्नोस्वते॥ अपि प्र
भावज्वलिते शंकरेपि महेश्वरे॥ ९८॥ मया सरभसं मुक्तो वा यो तत्प्रतिहन्यते॥ अथ
अशापयक्षि प्रयन्न क्वचनकर्मणि॥ ९९॥ प्रसाद पिशुनानि त्वच्चक्षूंषि प्लवयंति मां॥

पुमांसोबाणमूर्छिताः॥ वशिष्ठोवर्षीनांश्रेष्ठोरेमेचंडालकन्यया॥ ८५ ॥चंद्रोगुरु
कलत्रस्यनिःशंकोभूत्परिग्रहे॥माधवोगोपनारीषुजारवृत्तिर्मयाकृतः॥ ८६ ॥गौ
तमस्यप्रियाहल्यावासवेनोपधर्षिता॥ दंडकोनामभूपालोमुनिकन्यांसमग्रही
त्॥ ८७ ॥सूर्योमदीयबाणौघोवडवारोहणंव्यधात्॥ प्रजापतिर्जगद्धातास्वसुता
मेवमुक्तवान्॥ ८८ ॥वालीकपिवरश्रेष्ठोजग्राहभ्रातृकामिनीं॥ प्रपौत्रोब्रह्मणो
ज्ञानसेवधीर्दशकंधरः॥ ८९ ॥मद्बाणविद्धमर्मासौरामभार्यामुपाहरत्॥ असंख्या
ताःपरेषुभ्रांतचित्तामममेषुभिः॥ ९० ॥निर्मर्यादेनसंगेणसंकरेपातितामया॥ ई
दृशस्यममोदग्रदोर्दंडास्थितशुष्मणः॥ ९१ ॥पिनाकपाणिकोद्धावास्मभगेकिंवि
धीयते वृथाभयमिदंमुंचममकोवापराभव॥ ९२ ॥स्वप्नेपिममवीर्यस्यभंगःका

॥ ल० ॥ पि न विद्यते ॥ इति शक्रो मरालस्यो अक्षिपत् धीरभाषितैः ॥ १ ॥ आक्षिप्रपपस्य भृङ्गिस्तेन
॥ २१ ॥ कंपयन् नंगमुत्तमं ॥ वसंतोपि रतिप्रोक्तं वचनं प्रतिपादयत् ॥ १४ ॥ तत् धीरभाषादार्ढ्यं
नभर्त्सितो जोषमास्थितः ॥ अथ भंगावलीमोवश्मदन्यापवरोपयन् ॥ १५ ॥ सज्जं च
कारपौंड्रेक्षुदंडकोदंडमंगजः ॥ संभोगरूखसमूर्च्छितरूणीमिनितध्वनिं ॥ १६ ॥
विडंबयन्नंनंगस्य विस्फारो ह्दि विप्रप्रथे ॥ भुजास्फोटं च बकुशः कृतवान् लोलकं
कणाः ॥ १७ ॥ अहंकारस्य महतीं कांष्ठां प्राप्तोमनोभवः ॥ अथमारेण ददृशे
पुरतः पुष्पपत्रिणा ॥ १८ ॥ कैलासपाददनिकटे स्थितं स्थाण्वाश्रमं महत् ॥ प्रावीक्ष
स्थकंदर्पोदर्पसां मीलितेक्षणः ॥ महायोगीनमीशानं विजिगीषुस्तपोवनं ॥ १९ ॥ ॥ श्री ॥
इति श्री ब्रह्मांडपुराणे उत्तरभागे ललितोपाख्याने पंचमोध्यायः ॥ ५ ॥ अथाव ॥ २३ ॥

पुमांसोबाणमूर्छिताः॥ वशिष्ठोवधिनांश्रेष्ठोरेमेचंडालकन्यया॥ ८५॥ चंद्रोगुरु
कलत्रस्यनिःशंकोभूत्परिग्रहे॥ माधवोगोपनारीषुजारवृत्तिर्मयाकृतः॥ ८६॥ गौ
तमस्यप्रियाहल्यावासवेनोपधर्षिता॥ दंडकोनामभूपालोमुनिकन्यांसमग्रही
त्॥ ८७॥ सूर्योमदीयबाणौघोवडवारोहणंव्यधात्॥ प्रजापतिजगत्धातास्वसुता
मेवमुक्तवान्॥ ८८॥ वालीकपिकुलश्रेष्ठोजग्राहभ्रातृकामिनीं॥ प्रपौत्रोब्रह्मणो
ज्ञानसेवधीर्दशकंधरः॥ ८९॥ मद्बाणाविद्धमर्मासौरामभार्यामुपाहरत्॥ असंख्या
ताःपरेस्तुभ्रांतश्चित्तामममेषुभिः॥ ९०॥ निर्मर्यादेनसगेणसंकटेपातितामया॥ ई
दृशस्यममोदग्रदोर्दंडास्थितशुष्मणः॥ ९१॥ पिनाकपाणिकोड्वावारुभगेकिंवि
धीयते वृथाभयमिदंमुंचममकोवापराभव॥ ९२॥ स्वप्नेपिममवीर्यस्यभंगःका

संतसन्निचमाहूयकुसुमायुधः॥ अकांडएवभूंजस्वेत्यादिदेशनिजेछया॥१॥ सवसं
तस्तदालंव्यस्थाण्वाश्रमवनंमहत्॥ आत्मानंबहुधाकृत्वासज्जंभीहथास्विषु॥२॥ वि
भूष्टपांडुपुत्राणिलता— जानिसर्वशः॥ स्निग्धश्यामलकांतीनिकाननेषुविरा
जिरे॥३॥ भ्रष्टेषुपांडुपुत्रेषुनोत्थितेपल्लवांकुरे॥ कांडशेषालतास्तस्युस्त्यक्तभूषाइव
स्त्रियः॥४॥ इषदोषत्प्रवालेषुसमंकूरत्कवीरुधां॥ मधुसंगात्फलकिताइवासन्वि
पिनश्रियः॥५॥ अकांडकृतसंरंभंवसंतंप्राप्यशाखिनः॥ आक्रमोन्मिषतामापुः
पुष्पपल्लवसंपदं॥६॥ प्रथमंपल्लवोद्भेदः पश्चात्कुट्मलमंजरी॥ इतिक्रमोयथावृक्षे
नतदाकांडजेमधौ॥७॥ क्षणमात्रेणकंदर्पमहाराजस्यशासनात्॥ मधुपल्लवितं
चक्रेसतारुण्यामिवाटवीं॥८॥ आमूलचूलमाबध्यप्रवालपटलावृताः॥ कंकेलि

॥ ऌ० ॥ तरवोरेजुः कामकर्णरथाइव ॥ ९ ॥ भ्रमंतीचंचरीकालीरन्वशोकमशोभ
॥ ३२ ॥ त ॥ ज्वलत्कामप्रतापाग्नेः धूमश्रेणीवनिर्गता ॥ १० ॥ अनपेक्षितगोरागीचरणांबुज
नात् ॥ अशोकतरवोदूरमपुष्यंनाईपल्लवाः ॥ ११ ॥ रक्ताशोकस्यलक्ष्येणरागनाधा
यपावकं ॥ विरक्तानांमनोतव्यमहौर्षीदिक्षुकार्मुकः ॥ १२ ॥ तपोवनाश्रियस्तेत्ररक्त
सौधचमत्कृतिं ॥ आययुः पल्लवोद्दामाः कंकेलिवरणीरुहा ॥ १३ ॥ विदग्धललनासिं
धुगंडूषासेकसंपदं ॥ अवमत्यैवबकुला आमूलकुसुमोज्वलाः ॥ १४ ॥ प्रत्यग्रमदिरा
गंधपाणिंधमसमुद्गमं ॥ माध्वीकमवहद्भूरिकेसरद्रुममंजरी ॥ १५ ॥ बकुलासवनि ॥ श्री ॥
षंदपानपर्यस्तलोचना ॥ भृंगांगनामदामोदसंपदंभृशमादधे ॥ १६ ॥ मंदमारुतसं ॥ ३२ ॥
चारस्पंदमानावनश्रियः ॥ मधुसंपर्कमासाद्यमत्ताइवजघूर्णिरे ॥ १७ ॥ – – – –

॥८०॥ यं ॥ अचेतनाश्चतरवोमधुसंपर्कदर्पिताः ॥ २६ ॥ ध्वनच्छुरत्तननताववल्लीवनिताः परिरेभिरे ॥
॥२३॥ अन्यत्वमिवसंप्रापाः तरवः पूर्वरूपित ॥ २७ ॥ अलंकृताइवबभुः कामुकाः कामवेषतः ॥
समस्तजंतुचित्तानिमदकारीणिमाधवे ॥ २८ ॥ जृंभमाणेवनोद्देशेसर्वेनवमिवाभवत् ॥
पर्वतेपर्वतेकुंजेकुंजेकुंजेचवल्लयः ॥ २९ ॥ अथवल्लीषुवल्लीषुप्रफुल्लकुसुमेकरः
पु अथपुष्पेपुष्पेषुनिष्ठुराः सीधुसिंधवः ॥ ३० ॥ सिंधुपूरेषुपूरेषुशीतलासौरभछटाः ॥
सौरभेसौरभेदृप्तसंभ्रमोभृंगसंभ्रमः ॥ ३१ ॥ किंचिद्भृंगीषुभृंगीषु संचरंतः कलस्व
नाः ॥ स्वनेस्वनेसमुजाताश्चपेशलालयसंपदः ॥ ३२ ॥ लयेलयेमनोलीनंललितानां ॥श्री॥
मृगीदृशां ॥ स्त्रीषुस्त्रीषुसमुल्लाससभजन्रागवृत्तयः ॥ ३३ ॥ रागेरागेरतिपतेस् ॥२३॥
द्भुतबाहुताडवं ॥ ताडवेतांडवेगीतबंधावासंतगीतयः ॥ ३४ ॥ गीतेगीतेकृशांगी

नांडोलाखेलनकादयैः ॥ प्रज्वलंनिवकंकेलौहुंकुर्वन्निवकोकिले ॥ ३५ ॥ उत्पत
न्निवचाकाशंसुमनोधूलिपालिषु ॥ गायन्निवालिमालासुघूर्णमानाइवानिले ॥ ३६
वर्षन्निवचमाध्वीषुनृत्यन्निवचशाखिषु ॥ हसन्निवसमुन्मीलत्सिंधुवारपला
शिषु ॥ ३७ ॥ प्रौढातपस्थितापुष्पचंपकाइवयष्टिषु ॥ पीतवस्त्रांचितइवप्रफुल्लक
र्णिकारके ॥ ३८ ॥ नखक्षतान्वितइवस्फुरत्किंशुकपालिषु ॥ नानाविधनिजाकार
वसंतः पर्यजृंभत ॥ ३९ ॥ इत्थंमधौजृंभमाणेप्रमत्ताइवजंतवः ॥ अधरोत्तरमाका
रंशृंगारस्यप्रपेदिरे ॥ ४० ॥ तत्रस्थामुनयः सर्वेमधुसंरंभसंपदा ॥ अकांडेहृ
दयस्फूर्तेरस्वतंत्राइवाभवन् ॥ ४१ ॥ अहेतुरागकल्लोलसंकुलविकृतीस्पृशः ॥
स्त्रीमयंसकलंविश्वंअपश्यन्तत्रतापसाः ॥ ४२ ॥ इतस्ततः किंनरीणांमंदमी

॥ल०॥ शानभीतिभिः॥ श्रुश्रुवे तरलस्वांतैर्मुनिभिस्वरमूर्छितं ४३ स्वमेघुवनितावा
॥२७॥ तीश्रवणेषु पराङ्मुखे ॥ उन्मादयति मंक्षु स्म माधवो मुनिमानसं ४४ चलितं ध्या
नधाराभिनष्टं नियमसंपदा । समाधिभिश्च विभ्रष्टं मुनीनामुदिते मधौ ४५ स्था
णवाश्रमगताशंभोर्गणा अपि मदोद्धताः ॥ वसंतपुष्पसंभारान् आजिघ्रंतो मुहुर्मुहुः
॥४६॥ नर्तनं बहुधागारे वाक्येवाक्ये परस्परं ॥ विस्मृतेशानसंत्रासाश्चेष्टांचेष्टां
वितेनिरे ॥४७॥ नानाविधानां पुष्पाणां धूलिभिर्भस्मलेपनं ॥ विधानाय मधुर्नाम
तानन्तुर्गणकोटयः ॥४८॥ यत्किंचित्स्वेदजं जंतु जालेजारायुजं तथा। उद्भिज्जं ॥श्री॥
वा उजं चापि तत्सर्वं मदमाश्रयत ॥४९॥ इत्युन्मादीनि दृष्ट्वानी गणानां नंदिकेश्वरः ॥२७॥
अवलोक्य दुराचारान् व्यनैषीत्कृत्तभीरकाः ५० हा कष्टमेतच्चापल्यं किमकांडे विधीयते।

आपानगोष्ठिश्च षट्खाचं चरीका मृगीदृशां ॥ वकुलद्रुमपुष्पाणि विकासश्रियम
स्पृशन् ॥३८॥ माकंदविटपिश्रेणीशाखामारुह्य कोकिलैः ॥ अचिंतपंचमो रागः
प्रत्यरण्यं प्रपंचितः ॥३९॥ महासैन्यमदेवंजिह्मीर्षोः पुष्पधन्विनः ॥ पिकवाणीसमुक्त
स्थौ यात्रामंगलकाहली ॥२०॥ दाक्षिणात्यसमीरेण चलद्भिः पल्लवासिभिः ॥ योधाइ
वव्यराजंत सहकारमहीरुहाः ॥२१॥ माकंदपुष्पधूलीनां पालिर्व्योमनि यन्मये ॥ सैन्य
धूलीव चंडीशं जिहीर्षोः स्मितशालिनः ॥२२॥ अनंगराज्यमधुना जातं त्रिभुवनेऽखिलि
यशः काहलनिःसाणे पिकनादैरभूयत ॥२३॥ उदारक्रमनो गुच्छपीनस्तनमिताः ॥
रामाइव रधुः कांतिरंम्याश्वपंकयद्रुयः ॥२४॥ प्रियालीपुष्पमधुनामत्तषट्पदयो
षितः ॥ अनंगजयसिध्यर्थं यातागानं दिने दिने ॥२५॥ कामको दंडटंकारै शद्धरूपं जगत्र

ल० च्छाया॥ चित्रार्पितमिवाशेषमरण्यमभवत्तदा॥५९॥ एवंस्थिते च समये मधुनापू
३९ रिते वने॥ मत्तेषु खिलचित्तेषु शृंगारे क्रीडमागते॥६०॥ उद्दस्ते गरैकल्लोले प्रदीप्ते स
मथानले॥ स्थाण्वाश्रमं प्रविश्यंतः सधर्मिण्या सहस्मिर॥६१॥ दर्पमंदरसंचारसा
चारन्मत्तहस्तिवत्॥ कुंजे कुंजे निलीयैव मुकुः प्रछन्नसंचरः॥६२॥ चीरवद्योगि
नं जेतुं अवकाशमलोकत॥ अथ सर्वगणेंद्राणां चंचयित्वा विलोचनं॥६३॥ नविद्रु
माधवीकुंजं अविवेश मनोभवः॥ प्रविशन्नेव नेत्रस्य वामस्य स्फुरणं मुहुः॥६४॥ दु
र्निमित्ततयाशंक्य किंचित्कामधारयत्॥ पुनः पुनश्च पुस्फोर भयोत्तरलतारकं ॥श्री॥
६५॥ वाताहतमिवांभोजं दक्षिणं लोचनं रतेः॥ अप्रवेश्यं च पत्रालिनिबद्धाछि ॥३९॥
न्नदिङ्मुखं॥६६॥ माधवीमंडपं कामः स्वावकाशमलोकत॥ अथास्य नातिदूर

स्थ नमेरुधरागिरुहः॥६७॥ कस्यापि मूलधिष्ण्यास्य व्याघ्रचर्म इव कुंठितः॥ उप
रिस्थितमीशानं प्रज्वलंतमिवानलं॥६८॥ निष्कंपमिव चंचांशु विस्तरंगमिवांबुधिं॥
अवातनिहतज्वालमिव दीपं महाद्युतिं॥६९॥ निरुद्धेंद्रियसंचारं निरुद्धहारमंडलं॥
निरुद्धचित्तचापल्यमनिरुद्धसमाधिकं॥७०॥ बद्धपद्मासमासीनं अकं न्यस्तक
रद्वयं॥ अप्रतर्क्यं कुबुद्धीनाम वाङ्मानसगोचरं॥७१॥ वेदैरपि कृतान्वेषं विश्राती
तमहानिधिं॥ ज्वलत्सुषुम्नानाडिस्थ तेजोरेखावलोकनं॥७२॥ चिन्मात्रसेवनं
कोतं अहयोल्लासवासिनं॥ अचिंत्यमपरिज्ञेयं अहंमानविवर्जितं॥७३॥ अहंतदं
तयोरैक्यमनुभुंजानमात्मनि॥ युगपत्प्रोत्थितानेकसहस्रांशुसमप्रभं॥७४॥ अ
गस्य तेजसे हत्यापिबंतमिवविष्टपं॥ शोषयंतमिवाकाशं शोषयंतमिवद्विषं॥७५॥

॥ल०॥ धैर्यच्युतिकलामात्ररहितं निश्चलाकृतिं ॥ ब्रह्मरंध्रसमुद्भूतज्योतिःपुंजनिशाकरं
॥२६॥ ७६॥ क्षयकालार्कसदृशक्रूरशांतमुखांबुजे ॥ परमानंदमहाव्योम्नि लब्धैक्यमिवभूय
सा ॥७७॥ कियद्भिरेव दिवसैर्दग्धा तेजोभिरुच्छ्रितैः ॥ विश्वं निर्वंतमिव च स्वकीयाशे
षतोज्वलं ॥७८॥ उपर्युपरि वर्धिष्णु तपःपावकरोचिषः ॥ लब्धाधिपत्यमिव च या
तन्वाक्रनविद्दतां ॥७९॥ स्वतंत्रैर्महसां वृंदैः स्वतंत्रं जगत्त्रयं ॥ दीपयंतमिव
ध्वस्तचेत्तो विकृतमात्रकं ॥८०॥ मोहिताशेषतेजोभिरन्यथाकृतका
ततैः ॥ मधुरैर्मधुसंभारैरप्यस्पृष्टनिजक्रमं ॥८१॥ शांतानामपि तं शां ॥श्री॥
तं भीषणानां च भीषणं ॥ गंभीराणां च गंभीरमन्यानाकलितक्रियं ॥८२॥ अन्या ॥२६॥
गोचरमाहात्म्यमन्याधर्षितसंपदं ॥ स्वयमेव स्वमात्मानं पश्यंतं परमेश्वरं ॥८३॥

किं परं मृतोऽयमस्वामी संयमैकपरायणः ॥९१॥ विकारानखिलांस्त्यक्त्वा विमले
ब्रह्मणि स्थितः ॥ निष्कंपयोगमापन्नो निरस्ताखिलवासनः ॥९२॥ अस्य संयम
धारायां विघ्नं किमिति दुर्मदाः ॥ वाक्ये वाक्ये च कलहैः कुर्वंतित्यन्वशानुगणान् ॥९३॥
तस्य संरंभमात्रेण नासाग्रन्यस्ततर्जनैः ॥ हुंकारवक्रगर्भस्य भ्रुकुटीकुटिलभ्रुवः
॥९४॥ नंदिनः परमामाज्ञां प्रमाणीकृत्य ते गणाः ॥ यथापूर्वं निजाकारमवलंब्यैव
संस्थिताः ॥९५॥ तस्य हुंकारमात्रेण गणा एव न केवलं ॥ नश्चकंचा सविकलं तत्
समस्तं तपोवनं ॥९६॥ न तु वृक्षस्य तस्यापि कंपः प्रादुरभूत्तदा ॥ मूकतामेव सं
प्राप्ताः कोकिलामुद्रिताननाः ॥९७॥ इतस्ततः प्रसर्पंतो मृगा निष्कंपिताः कृताः ॥ न
मंदपवनस्पंदा हृत्स्यथ्वापत्यमागताः ॥९८॥ शंभोः प्रधानभक्तस्य नंदिनस्तस्य चा

॥ल॰ ४॥ वात्मनि ॥ आहृक्षितस्तित्वइवभ्रमन्त्त्यंतविह्वलः ॥ १२ ॥ गलिताशेषशौंडिर्यं
॥२७॥ वीरवादविवर्जितं ॥ निरस्तयुद्धसंकल्पंन्यस्तवासवभाषितं ॥ १३ ॥ प्राणमात्रा
वशेषंस्वमात्मानंसमलोकयत ॥ रतिश्चताहशीजाताप्रागेवेद्विग्नमानसा
॥ १४ ॥ किंकर्तव्यविमूढाचकिश्यंतीभर्तृसाहसेः ॥ विकिरंतीबाष्पगणान्निश्वा
संसृजतेमुहुः ॥ १५ ॥ तेजसासासंयमिनिधेःमहेशस्यप्रसर्पिणा ॥ दृष्टिपातप्र
तिहतंदिशताभृशपीडिता ॥ १६ ॥ वाङ्मनःकायपूर्वंचभर्तुर्विजयमिच्छति ॥
शंकाशंकुभिरत्यंतंकीलितेवसमंततः ॥ १७ ॥ सात्रासवेपथुःक्षिप्तमुक्ताहा ॥श्री॥
रपयोधरा ॥ भेजेकामवधूस्तंभंशंभोरुद्वीक्ष्यसंयमं ॥ १८ ॥ इतिप्रसंख्यान ॥२७॥
परेमहेशेमहत्तमालोक्यतपःपरिग्रहं ॥ अतीवभीत्याकुलितौबभूवतुः

जिह्रेषयांतौरतिपुष्पसायकौ ॥ १९ ॥ इतिब्रह्मांडपुराणेउत्तरभागेलल्लि
तोपाख्यानेयुद्धखंडेषष्टोध्यायः ॥ ६ ॥ श्रीहयग्रीवउवाच ॥ अथप्रनष्ट
वीर्यस्यसंनासात्पुष्पधन्वनः ॥ वर्धयंतीवभूषानंस्वलावण्येमहोदयं ॥ १ ॥
शृंगाररससामग्रीवहेन्नेवस्वकांतिभिः ॥ वसंतपुष्पमालाभिरलंकृतवपुर्ल
ता ॥ २ ॥ राज्यलक्ष्मीरिवानंगराजराजस्यभूयसा ॥ सर्वाभरणशोभाढ्यानत्रा
यातातथपार्वती ॥ ३ ॥ विनष्टस्यस्ववीर्यस्यसमुत्तुगनसाधनं ॥ पार्वत्यारूपमा
लोक्यजयाश्रममभजत्स्मरः ॥ ४ ॥ पुनर्दृष्टिमतिर्भ्रष्टमादायनिजकार्मुकं ॥ संन
द्धोजनिकंदर्पोशंकरप्रजिगीषया ॥ ५ ॥ तस्याविलोकनादस्यतरलात्कोकरां
पदः ॥ प्रनिष्टमपिदेवीर्यमवर्धतपुनःपुनः ॥ ६ ॥ अथसामधुसंपन्नसर्वपुष्प

॥६॥ विनिर्मितं ॥ आकल्पजालविभ्राणा रुरुचे शैलनंदना ॥ ७ ॥ अलकस्तबके तस्या
॥३८॥ नवसौरभनिर्भरः ॥ मालतीस्रङ्मनोमालाय विरेषोव्यराजित ॥ ८ ॥ चूडालके
स्रुस्रुश्रेणी यो बभार मनोहरं ॥ सिंधुवारस्य तिलकं सामुक्ताजालवद्बभौ ॥ ९ ॥
केकेलिस्रङ्मनःपत्रं नवकाश्मीरपाटलं ॥ ललाटे निहितं तस्याः सिंधूरतिलकं
बभौ ॥ १० ॥ अंतर्विभ्रांतरोलंबपरभागमनोहरं ॥ मालतीस्रङ्मनोगुच्छं कर्णोत्तं
समुवाह सा ॥ ११ ॥ अशोकपुष्पस्तबकच्युता गंडेषु धूलयः ॥ अकांडमहिराग
सौभाग्यं समवर्धयत् ॥ १२ ॥ वसंतपुष्पसंरंभमवधूय पुनः पुनः ॥ निर्जनिश्वा ॥श्री॥
सगंधाय लुभ्यद्भिरलिभिर्वृता ॥ १३ ॥ करे दधाना कमलं भृंगकिर्मीरकेशरं ॥ ॥३८॥
बंदीकृतमिवातान्वं दधाना करशोचिषा ॥ १४ ॥ सिंधुवारस्य मुकुले स्थूलमौक्तिककांतिभिः

बद्धदृष्टिकलामात्ररहितनीलकंधरं ॥ अवलोक्य भयोद्विग्नशंकया व्याकुलीकृ
तः ॥ ८४ ॥ घासससंजातपुलको मुहुरुत्पन्नवेपथुः ॥ किंकर्तव्यविमूढात्मा निरसो
रसनां वहन् ॥ ८५ ॥ अतिधैर्यविपर्यासादवसन्ननिजाकृतिः ॥ करविभ्रस्तकोदंड
भयनिश्चललोचनः ॥ ८६ ॥ मुहूर्तमात्रं विवशमात्मानमथ तत्स्मरः ॥ नाज्ञासिनि
जमात्मानं विसस्मार निजं बलं ॥ ८७ ॥ विभ्रांतचित्तो नापश्यद्विस्त्रस्तं सशरं धनुः ॥ जि
हीर्षाप्रत्यवायेन महासंयमिनः प्रभोः ॥ ८८ ॥ पाशरूपेण महता बद्धेवाकंपनकृतेः ॥
मुकुरप्रतिपत्या वस्तभानननुभवन्मनः ॥ ८९ ॥ मनोभवस्य नो किंचिद्धाश्वासमवलं
बतं ॥ त्रासेन मूर्छितं इव तं दृष्ट्वा गाढसंयमं ॥ ९० ॥ पंके चपनितो यद्वा ताडितः पविने
व च ॥ महादेवस्य तेजोभिरभिभूत इवांतरे ॥ ९१ ॥ तस्यैव घोरतपसा तप्यमानइ

॥ ८ ॥ तभृशमुन्मादकाकृति ॥ २३ ॥ हंसदंपतिरूपेण पुष्पैरत्यंतशिल्पिनी ॥ विधा
॥ ३९ ॥ यरचनाभेदं तत्रविन्यस्तलोचना ॥ २४ ॥ नंदिद्वारसमासाद्य प्रार्थयामासदर्शनं
नंदिन्नवसरं रम्यमवलोक्य पिनाकिनं ॥ २५ ॥ मामागतां द्रष्टुकामाविनिवेदय
किंकरीं ॥ चिराद्भागीरथीस्वर्णपद्मेभ्यो बीजकोशकान् ॥ २६ ॥ आहृत्य सम्यगाशो
ष्य खरांशोरातपैः खरैः ॥ सूचीवेधेन सम्यक् च निर्माय ग्रंथवत्क्रमं ॥ २७ ॥ अति
श्लक्ष्णां मनोहारिविधिवत्संख्ययान्वितं ॥ पद्माक्षमालावलयमानैषमुपदानकं
२८ ॥ एतद्दत्वा महेशस्य कृत्वा भक्तिनमस्क्रियां ॥ यथापूर्वं विनिर्गंतुं विनिवेद्यशू ॥ श्री ॥
लिने ॥ २९ ॥ त्वमेवावसरज्ञोसि सदैव निकटस्थितः ॥ इति नाथितवत्सैवं नंदिनशै ॥ ३९ ॥
लनंदना ॥ ३० ॥ स च नंदी करोद्धूतहेमवेत्रलतोज्वलः ॥ तथास्त्विति महेशस्य सं

स्थानमविशल्लघु ॥ ३१ ॥ अस्मिन्नेवांतरे देवश्चिरध्यानसमाधिमान् ॥ विलीनम
व्ययेतत्वे पुराणे ब्रायमानसं ॥ ३२ ॥ बद्धन्मनश्चवायुं च विश्रांतिविभवन्नयन् ॥
प्रसंख्यानप्रबंधेभ्यो विरराम महेश्वरः ॥ ३३ ॥ मूलाधारस्थितां द्वावीरुत्तोलनवशा
दिव ॥ स्थितः समाधिविरमात् पथ्वा भूमिमलंबत ॥ ३४ ॥ योगाद्धिरमतस्तस्य चतु
र्दशजगत्त्रयं ॥ महाभारं समुद्वोढुं मशकं नैव योगिनः ॥ ३५ ॥ न कूर्मेशानेदिङ्नागा
नाद्ययोनाप्यभोगिनः ॥ समाधिविरतौ तस्य भारं वोढुं नसेहिरे ॥ ३६ ॥ अथतं समुपा
गत्य शैलादिः संव्यजिज्ञपयत् ॥ उपायनकहस्तां तामद्रिजां द्वारवर्तिनीं ॥ ३७
ततश्चलब्धिविष्णुवल्ली पल्लवोल्लाससंज्ञया ॥ आदिष्टः सहसानंदी तां प्रवेशयद्दे
विकां ॥ ३८ ॥ मूर्तेव मोहिनी शक्तिर्मन्मथस्य महौजसः ॥ झलंझलितमंजीरसिं

॥८०॥ जितं स चचाल हर ॥३९॥ सा गत्वा कुंतलस्रंसी मालतीपुष्पशेखरा ॥ सविलासं सलज्ज
॥४१॥ च सभक्तिः प्रणतिं व्यधात ॥४०॥ उत्तिष्ठंती प्रणामस्य शेषे सप्रणये प्रणितभूषणा ॥ अंज
लीकर्तुमारेभे प्रमुग्धकरपल्लवा ॥४१॥ अंजल्यर्थं समुत्क्षिप्तकरया गिरिकन्यया
दृष्टस्तु धौत्तरीयत्वात् व्यक्तीकृतकुचश्रिया ॥४२॥ पुनरुत्तरंगस्थगनकेलिव्याप्तृ
तया तया ॥ नमयंत्याङ्गियावक्रमग्रे तस्थौ पिनाकिनः ॥४३॥ तमेव वसरं प्राप्य तेन
रंध्रप्रहारिणा ॥ आकर्णपूर्णचक्रेषु कोदंडकुसुमेषुणा ॥४४॥ गुणमध्ये स्थितं पु
ष्परवाणे स्मकुसुमायुधः ॥ करकामुखसंस्थेन हस्तेनाकृष्य रंहसा ॥४५॥ पुरः प्रसा ॥ श्री ॥
रितेन्य स्मिमुष्टिपीडितलस्तके ॥ धारयन्नू धन्वनः शृंगं नवपुंड्रेक्षुलक्षणं ॥४६॥ लक्ष्यं ॥ ५० ॥
प्रति प्रयत्नेन चक्षुषा सावधानधीः ॥ सहितः सकलं तस्य संस्थानं परिशोधयन् ॥४७॥

भूषयंती समुत्तुंगौ पीवरौ कुचमंडलौ ॥१५॥ अंगदत्वमनुप्राप्तेन चकेतकपट्टकं
दोलीता सविभागेन कुर्वीया जातगौरवं ॥१६॥ बकुलस्य कृतं कांचिदामश्रेणीविभू
षणं ॥ विभ्राणा बकुलामोदमुग्ध पुष्पं धयव्रजं ॥१७॥ वासंतिकैर्बहुविधैरलकेषु नि
वेशितैः ॥ तमभ्यावलिताभाभिः स्तारकाभिरिवाद्दधौ ॥१८॥ तत्र स्थान प्रविन्यस्तैः
पुष्पसंभारभूषणैः ॥ भूषां कृतार्थयंती च वसंतं कामसंत्रियां ॥१९॥ इत्थं विचित्रवे
षा सा स्वसमानसखीजना ॥ नित्यसेवाविधिं कर्तुं शंभोरागमदद्रिजा ॥२०॥ शृंगं
रसीम संपत्तिरागस्येवावलंबनं ॥ उत्कंठायाइवाधारं आनंदस्येव विग्रहं ॥२१॥
तारुण्यस्येव संस्थानं तां पर्वतकुमारिकां ॥ प्रथमं वल्लमास्थाय सन्नद्धोजनि
मन्मथः ॥२२॥ अत्रांतरे शैलकृतास्वभावादति सुंदरी ॥ वसंतकांतिसंपर्की

॥ रु ७ ॥ येविधंशादात्मानमपिनरमरन्॥ मुहुरुत्कलिकासिंधोः सवाहितइवोर्मिभिः ५५
॥ ६१ ॥ चलद्भ्रूणिलसन्मंदहसितश्रेणिचारुणि॥ व्यापारमायासहशांत्रिनयंपार्वतीमु
खे ॥ ५७ ॥ साचतत्कालमुद्भिद्यपुलकांचितविग्रहा॥ आपादचूलिकोद्यत्प्र
स्वेदप्रसवसुता॥ ५८ ॥ भयकंपराजकंपंभुजानान्योन्यमिश्रितं॥ अजातपूर्वंत
दृष्टिसंचारंदेवकस्मितं॥ ५९ ॥ कृतार्थितस्वसौभाग्यसाम्राज्यमवगछति॥ प्र
णामांजलिसंधानव्यक्तदोर्मूलदर्शना॥ ६० ॥ पिंदधानपदांतेनरत्ननालीककु
ड्मलां॥ तपःप्रत्यूहसंत्रासरागमंदाक्षसन्मदैः॥ ६१ ॥ मिश्रितैरेकतांप्राप्तैरत्या ॥ श्री ॥
कुलितचेतना॥ नमयंतीमुखंचारुशरदिंदुसहोदरं॥ ६२ ॥ साचीकृतेननेत्रे ॥ ६१ ॥
णनिघ्नतीनीलकंधरं॥ नूतनाचार्यकर्येणनमत्तेनेवमनोभुवः॥ ६३ ॥ भावांतरा

णिगृह्णानिशिष्यमाणानिजग्मुषी॥ औत्सुक्येनप्रविशतांहृष्टिंप्रतिपदंविभोः
॥ ६४ ॥ आवर्तयंतिमंदाक्षाकटाक्षाश्चमुहुर्मुहुः॥ अनंगवीरसर्वस्वंअगपु
लकभूषणं॥ ६५ ॥ इत्थंप्रकाशयामासपुरस्तात्पुरवैरिणः॥ तादृशीचतुरधाराद्रि
कुलमाणिक्यदीपिका॥ ६६ ॥ क्वणत्कनकरम्येयापाणिनासन्नयास्मिते॥ पुष्पशि
ल्पकृतंहेमामिथुनंचाक्षमालिकां॥ ६७ ॥ मेदाकिनीबीजकोशैःकृतामग्रेन्यवे
दयत॥ तयानिवेशितोंशुरग्रेरागतरंगितः॥ ६८ ॥ उपधाकनरूपेयादहशी
क्ष्यगुणंहरः॥ तस्यावलोकनाद्भूयस्मारितःस्तपसःक्रिया॥ ६९ ॥ स्मारितश्च
स्मृतिभ्रंशंतन्मुखावृष्टिमाहवंत्॥ सरागनेत्रसंचारमपत्त्यंबिकामुखात् ७०॥
पुनर्व्यवस्थापितवानुतगादंधैर्यबंधनं॥ अहेतुकेनावगछन्नूअकांडेधैर्य

॥ल०॥ वेपथुं ॥ ७१ ॥ दृष्टिंसंचारयामासदिक्कांतरकंधरः ॥ अथदक्षिणतःकुंजेमाधवीमंड
६२॥ पोदरे ॥ ७२ ॥ संधायकुसुमंबाणंप्रत्यारूढकृतस्थलं ॥ समप्रहर्तुंसमुद्युक्तमनं
गोबलदर्पितं ॥ ७३ ॥ भयशंकातर – पारत्याप्रष्ठेनुपालितं ॥ शौंडिर्यदुर्मदंमारं
अद्राक्षीद्वृषभध्वजः ॥ ७४ ॥ समाधिभंगरोषेणसंबद्धभृकुटीकटुः ॥ दूरविस्फा
रितक्रोधनेत्रमस्याभवन्मुखं ॥ ७५ ॥ अत्रांतरेसागिरिजारोषचिह्नंशिवानने
विलोक्यलोकमानांगीकिंचिद्दूरमुपासृजत ॥ ७६ ॥ अथोत्तस्थेपुरध्वंसीलला
टक्रोधलोचनात ॥ दिवादापिचचंडांशुमहसाजातवेदसा ॥ ७७ ॥ कोपंसंहर ॥श्री॥
चंडीशस्वस्तिस्वस्तीतिनाकिनां ॥ वचनंसाध्वसम्रह्ववर्णंयावन्ननिर्ययौ ॥ ७८ ॥ ६२
तावद्देवसचंडीशफालकुंडहुताशनः ॥ क्षणेनपुष्पधन्वानमनैषीद्भस्मचेतनं ॥ ७९ ॥

प्रत्यालीढप्रकारेणदक्षिणंचरणंशनैः ॥ जानुसंप्रनिसंकुच्यपदस्यान्यस्यजा
नुना ॥ ८८ ॥ भूमिंस्पृशन्पदाग्रेणप्रघ्नेमाननमहीतलः ॥ तिर्यग्विवृत्तहारेणवक्ष
सोन्नतिशालिना ॥ ८९ ॥ धनुष्कर्षणविन्यासविशालेनमहोरसः ॥ धैर्यविद्राविणीं
नामशंभोरुपरिपातिनीं ॥ ९० ॥ मोकुंच्यवसितोमारःसचतंद्रष्टुमैहत ॥ अथेशानः
समाधीनामंतरंगीभवन्नपि ॥ ९१ ॥ चंद्रोदयहतक्षोभसागरप्रतिमाशयः ॥ प्रकं
पमानहृदयःप्रभूतेरागघट्टने ॥ ९२ ॥ कदंबगोलकाकारबिम्बायाःसकलंव
पुः ॥ स्वेतबिंदुसृतःपाणेःपरिभ्रष्टाक्षमालिकः ॥ ९३ ॥ विवक्षितंयत्किमपिस्फुरि
ताधरपल्लवं ॥ मंदमप्रतिपत्त्येवरुद्धंकर्णेपुनःपुनः ॥ ९४ ॥ प्रवेपमानांगुलिना
प्रस्वेदप्रसरस्पृता ॥ अवर्णवर्त्तिनिभस्मकुंडिकामसकृत्स्पृशन् ॥ ९५ ॥ अत्यंतधै

॥ ल० ॥ पल्लवानि च पुष्पाणि प्रम्लानानि महीरुहां ॥ अथो हिमां दुहितरं हरसंरंभवेगतः
॥ ६३ ॥ ८८ ॥ अभ्यवापद्यत तदा प्रालेयधरणीधरः ॥ वत्से मनोरथाः कास्ते फलंति बहुवि
घ्नतः ॥ ८९ ॥ निश्चयसाना मिष्टानां प्रत्यूहालिः पदे पदे ॥ कदाचित्कुसुमेभ्योपि
महत्तो मानसं मृदु ॥ ९० ॥ कदाचित्कुदंभोलिनिपातादपि निष्ठुरं ॥ क्व तत्त्विट
लनेत्रस्य भृकुटीकुटिलं मुखं ॥ ९१ ॥ क्व त्वमत्यंतमृद्वंगी कथं तत्सोढवत्यसि ॥
आगच्छ भवनं वत्से त्वमस्मद्गृहदेवता ॥ ९२ ॥ पूजिता स्तव देया स्युः पद्मवस्याभि
वांछितं ॥ इति लज्जाभयोद्वेगान्निमीलितविलोचनां ॥ ९३ ॥ आदाय स्कंधमारो ॥ श्री ॥
प्य जगाम स्वगृहं गिरिः ॥ इत्थापराधसाशंका बभूवुस्त्रिदिवौकसः ॥ ९४ ॥ सार ॥ ६३ ॥
तीपुरतो भस्मशोषं पुरुषविग्रहं ॥ मूर्छया बाधितमनाः विधिनालोकत स्मरं

९५ ॥ पुनः पपात मूर्छितः पुनरुत्थाय पाणिना ॥ निघ्नंती निर्भरमुरो वाचालमणि
कंकणा ॥ ९६ ॥ विकीर्णकेशा विभ्रष्टवसंतकुसुमावलिः ॥ भूमिसंवेष्टनालग्न
धूलिधूसरविग्रहा ॥ ९७ ॥ अयि नाथ मनोनाथ जगन्मोहन मन्मथ ॥ अभिरूप ॥
कधारूपस्फूर्त आलापपेशल ॥ ९८ ॥ दीनामनन्यशरणां क्व विहाय क्व यास्य
सि ॥ इत्यालपंती भ्राम्यंती पतंती भूमिशिक्षितौ ॥ ९९ ॥ अत्यंतकरुणोद्रेका हृ
दरोषि मृदुद्रुवत् ॥ सख्युः प्रियां तथाभूतां वसंतः खिन्नमानसः ॥ १०० ॥ आश्वा
सयामास भृशं ब्रह्मशापमनुस्मरन् ॥ १०१ ॥ इति श्रीब्रह्मांडपुराणे उत्तरभा
गे ललितोपाख्याने युद्धखंडे सप्तमोध्यायः ॥ ७ ॥ अगस्त्य उवाच ॥ हय
ग्रीव महाप्राज्ञ सर्वविद्यामहोदधे ॥ कस्माच्छापमनुप्राप्तः कामदेवः परा

॥ रुद्र ॥ कर्मा ॥ ३ ॥ किमर्थं ब्रह्मन्यथाशापः पंचवाणो निपातितः ॥ विविच्य ब्रूहि तत्सर्वं संदेहो येन
॥ ६४ ॥ नश्यति ॥ २ ॥ हयग्रीव उवाच ॥ पुरा किल महाकल्पे प्रवृत्ते चाक्षुषांतरे तपोबलमदो
न्मत्तौ दानवौ द्वौ बभूवतुः ॥ ३ ॥ सहोदरौ तौ स्कंदोपस्कंदाख्यौ लोककंटकौ विजिग्या
ते जगच्चक्रमशेषं विक्रमाश्रयौ ॥ ४ ॥ तयोः प्रतापसंमूर्च्छितद्विषयोः शश्वदुल्वणं वि
त्रस्ता विक्रमोद्रेके सेहिरे न दिवौकसः ॥ ५ ॥ तावन्योन्यमिति प्रीतौ अन्योन्यस्य विका
रिणौ ॥ अन्योन्यसमदोःसत्वौ क्षोभयामासतुर्जगत् ॥ ६ ॥ निःस्वाध्यायवषट्कारं निर
स्तसवनक्रियां ॥ अपास्तदेवतापूजमध्वस्ततपोवनं ॥ ७ ॥ अतिविण्णदेवौ घा ॥ श्री ॥
वताचारप्रवर्त्तिनौ ॥ चक्रतुस्तौ जगच्चक्रमाज्ञाचक्रेण निष्ठुरं ॥ ८ ॥ आदेवनारिह ॥ ६४ ॥
रता अभितो देवतागृहात् ॥ देववृक्षान् अलुनतामभ्यक्षोभयतां स्मरान् ॥ ९ ॥

पलायिताश्च सर्वेपि देवास्तत्कर्मसाक्षिणः ॥ अतिभीत्यामुकुलितं चक्रे चक्षुर्गिरि
द्रजा ॥ १० ॥ हरसंरंभसंपन्नासाध्वसा भर्तृनाशतः ॥ मूर्च्छातिमिरितालोका निप
पात रतिः क्षितौ ॥ ११ ॥ क्षणं सा कामदयिता मूर्च्छया मुक्तचेतना ॥ नाज्ञासि निजवै
धव्यमतिदुःखनिकेतनं ॥ १२ ॥ पर्वतेंद्रस्तनायाल्लिपरिषिक्तुवपुर्लता ॥ साध्वसा
न्मीलिताक्षि स्रंस्तंभे भेजे महत्तरं ॥ १३ ॥ अदृष्टपूर्वसंरंभं उद्वीक्ष्योद्विग्नचेतसः ॥
तस्याः कंपः प्रववृधे भिद्रनधगधगिस्तुरः ॥ १४ ॥ सक्षणं नशिखिज्वालावक्रदग
धांगजद्रुमः ॥ अंतर्धिमगमद्व्योम्नि नीलकंधरवारिदः ॥ १५ ॥ परिहर्तुं वधूसंगं
तपः प्रत्यूहमीश्वरः ॥ वसंतस्य फल्लेषु समस्तेषु वर्त्तमानपलाशिषु ॥ १६ ॥ हरसंरंभ
भीता मा पुष्पे शोषमगाताम् ॥ उन्निद्रितं च वदनं कोकिनो भ्रमभेवने ॥ १७ ॥

॥ल०॥ पल्लवानि च पुष्पाणि प्रम्लानानि महीरुहां॥ अथोद्दिमां दुहितरं हरसंरंभवेगतः
॥६२॥ ८८॥ अभ्यवापद्यत तदा प्रालेयधरणीधरः॥ वत्से मनोरथाः कास्ते फलंतीति बहुवि
धृतः॥ ८९॥ निश्चयसानामिष्टानां प्रत्यूहालिः पदे पदे॥ कदाचित्कुसुमेभ्योपि
महत्तो मानसंस्फुटु॥ ९०॥ कदाचित्कुटुंभोलिनिपातादपि निष्ठुरं॥ कृतस्त्विद
रुनेनास्य भ्रूकुटीकुटिलं मुखं॥ ९१॥ क्वत्वमत्यंतमृद्वंगी कथं तत्सोढवत्ससि॥
आगच्छ भवनं वत्से त्वमस्मद्गृहदेवता॥ ९२॥ पूजिता स्तवदेयास्तुः प्रपन्नवत्याभि
वांछितं॥ इति लज्जाभयोद्वेगान्निमीलितविलोचनां॥ ९३॥ आदाय स्कंधमारो ॥श्री॥
प्यजगाम स्वगृहे गिरिः॥ इत्थापराधसाशंकाव भूवुश्च दिवौकसः॥ ९४॥ सार ॥६२॥
तीक्षुरतो भस्मशेषं पुरुषविग्रहं॥ मूर्छया बोधितमनाः विधिना लोकतस्करं

९५॥ पुनः पपात मूर्छेति पुनरुत्थाय पाणिना॥ निघ्नंती निर्भरमुरो वाचालमणि
कंकणा॥ ९६॥ विकीर्णकेशविभ्रष्टवसंतकुसुमावलिः॥ भूमिसंवेष्टनालग्न
धूलिधूसरविग्रहा॥ ९७॥ अयि नाथ मनोनाथ जगन्मोहन मन्मथ॥ अभिरूप
रूधारूपरूपवृत्तालापपेशल॥ ९८॥ दीनामनन्येनशरणां क्व विहाय क्व यास्य
सि॥ इत्यालपंती भ्राम्यंती पतंती भूरिशिक्षितौ॥ ९९॥ अत्यंतकरुणोद्रेकाद्द
घरोषि मृदुद्रुवत्॥ सख्युः प्रियो तथाभूतां वसंतखिन्नमानसः॥ १००॥ आश्वा
सयामास भृशं ब्रह्मशापमनुस्मरन्॥ १०१॥ इति श्रीब्रह्मांडपुराणे उत्तरभा
गे ललितोपाख्याने युद्धखंडे सप्तमोध्यायः॥ ७॥ अगस्त्य उवाच॥ हय
ग्रीव महाप्राज्ञ सर्वविद्या महोदधे॥ कस्माच्छापमनुप्राप्तः कामदेवः परा

॥ ल० ॥ उपगम्य शतानंद मंदिरं समुपासदन् ॥ अथावसरविज्ञेन लोकेनांतः प्रवेशिताः
॥ ४५ ॥ १८ ॥ अवलोक्य शतानंदमाश्रितानंदनिर्भरं ॥ गव्यूतिमात्रदीर्घाणां सहस्रस्य
महीयसां ॥ १९ ॥ पत्राणां प—र्युक्ते गव्यूत्यर्धस्फुकर्णिके ॥ नधर्मकेसरोद्भाये स्थू
लनालमनोहरे ॥ २० ॥ नित्यं भास्करसान्निध्यात् सदा विकसिताननं ॥ पद्मसिंहा
सने देवमासीनं चतुराननं ॥ २१ ॥ चतुर्मुखविनिष्क्रान्त सर्वविद्याकदंबकं ॥ पिंगल
श्मश्रुनयनमीषत्कपिललोचनं ॥ २२ ॥ विद्रुमाताम्रवपुषं जटामुकुटभास्करं ॥ यो
गिभिः परितो नित्यं स्तुवानैरुपशोभितं ॥ २३ ॥ सपक्षेणेव कैलासगिरिणा निकटे ॥ श्री ॥
स्थले ॥ निजवाहनहंसेन सेवितं तुंगवेश्मणा ॥ २४ ॥ त्रैलोक्य गंधर्वपुरीं निर्मायै ॥ ४५ ॥
योगसंज्ञितं ॥ तारकावलयज्योतिः सततं विभ्रतं दृशोः ॥ २५ ॥ अतिप्रसन्नमाका

शशांतकारुण्यमानसं ॥ जगतामुपकाराय रंजयंतं मुहुर्मुहुः ॥ २६ ॥ मूर्तीभिरेव वि
धाभिः प्रसन्नस्तुतिसूक्तिभिः ॥ बद्धांजलिपुटाभिश्च चतुर्दशभिराश्रितं ॥ २७ ॥ अमा
यमजरं विश्वनिर्मातारं निरामयं ॥ दयामयं च ते देवाः पश्यंतस्म प्रजापतिं ॥ २८ ॥
नत्वा स्तुत्वा पुनर्नत्वा बद्धांजलिपुटाः सुराः ॥ व्यजिज्ञपन् भयं स्कंदोपस्कंदप्रति
पादितं ॥ २९ ॥ अशेषविष्टपः स्रष्टः कुतस्मरस्माकमागतं ॥ त्वयि जाग्रत्यपि हि नः स
दा कारुण्यवर्षिणी ॥ ३० ॥ स्कंदोपस्कंदौ दुर्दांतौ दुराचारपरायणौ ॥ विनाशितं न मो
पेतं त्रैलोक्यं सचराचरं ॥ ३१ ॥ तन्निराकरणोपायश्चिंत्यतां विश्वकला निधे ॥ अ
न्यकल्पयन्मुहुः नष्टीकारान् दिवौकसः ॥ ३२ ॥ इति विज्ञापितो देवैरीषद्धासलसन्मु
खं ॥ उवाच स ध्वनं वेधा देवता भारता पिता इव ॥ ३३ ॥ जाने स्कंदोपस्कंदाभ्यामधिकं

॥ [illegible] ॥ भयमत्यगाः ॥ न नयोरन्यतो वीराद्वधशंकापि विद्यते ॥ ३४ पुरा खलु तपो घोरं
॥ ४६ ॥ तेपाते मां स्तुतिश्रुतं ॥ सान्निध्यं चाप्यकरवं तयोर्दुर्दंतितेजसोः ॥ ३५ वरं वृणीतो भ
द्रन्नो इत्युक्ते सहसा मया ॥ तावूचतुः सप्रणामौ वरप्रार्थनतत्परौ ॥ ३६ आयामत्यंत
स्तु प्रीतो नावयोर्वैरसंभवः ॥ तस्माद्द्वयं विना मृत्युरावयोराविर्भवेत्त ॥ ३७ यदि त्वमा
वयोः प्रीतो वरं देह्यावयोरिदं ॥ इति सुंदोपसुंदाभ्यामुक्ते तावब्रुवन्पुनः ॥ ३८
तत्रैव युवयोरस्तु नान्यः कोपि हनिष्यति ॥ युवामुद्दामविक्रांतौ युवां तु युवयोर्यमौ ॥
॥ ३९ ॥ इति सुंदोपसुंदाभ्यां वरं प्रादां सुरासुराः ॥ तस्मादन्यैर्न हंतव्यौ नम ॥ श्री ॥
यानच विष्णुना ॥ ४० न रुद्रेण न चेंद्रेण न च दिव्यालकैरपि ॥ तस्मादुपायः क ॥ ४६ ॥
र्तव्यः तयोः संप्रति मारणे ॥ ४१ समस्तलोकवनितासौंदर्येभ्यः सहस्रशः

इति दुष्टसमाचारौ भूतौ सुंदोपसुंदकौ ॥ तपोबलमदोन्मत्तौ तापयामासतुर्महीं
१० अथ सर्वे मंत्रयित्वा मेरुपृष्ठे दिवौकसः ॥ ब्रह्माणं शरण्यं कृत्वा तत्तेजप
रितापिनः ॥ ११ ॥ अपश्यन्ब्रह्मलोकं ते वेदघोषतिनादितं ॥ मूर्तिभिश्च तप
स्याभिर्मूर्तियज्ञैश्च संयुतं ॥ १२ विधिवाहनहंसस्य शावकैः पतत्रिभिः ॥ ध
वलछदसंभारैः सरसं निबिडीकृतं ॥ १३ ॥ सावित्र्या चैव गायत्र्या सरस्वत्या
च सेवितं ॥ देवैः समस्तैरखिलै रागमैश्चापि सेवितं ॥ १४ ॥ सप्तकोटिमहामंत्रैस
मंतात्परिवारितं ॥ कृष्णाजिनावरुद्धांसैर्जटिभिश्मश्रुलाननैः ॥ १५ ॥ देवपूतमु
खांबोजैर्मुनिभिश्चाप्यधिष्ठितं ॥ कमंडलुलसद्धस्तैर्दंडिभिश्चापि शुंडिभिः ॥ १६ ॥
ब्रह्मानुसंधानरतैर्मुनिभिश्चापि सेवितं ॥ एतादृशगुणोपेतं ब्रह्मलोकं दिवौकसः ॥ १७ ॥

॥ ल० ॥ पिछमयीवच्च॥ पाणिपादनखाग्रेषु अक्षमालामयीवसा॥ ५०॥ शुशुभे तेजसा कामं तेजयंती
॥ ६७ ॥ तिलोत्तमा॥ अतिलावण्यसंपत्त्या तो मरालविलोचना॥ ५१॥ अवलोकयतो धातुरनेयेन
मनोहृतं॥ अष्टवपि च चक्षूंषि नर्तितानि मनोभुवा॥ ५२॥ तस्यां सौंदर्यजं बाले निम
ग्नीनीववेधसः॥ यांतु स्वदुहितरं अप्यसौ काममनोहितः॥ ५३॥ इयेष भोक्तुं का
मांधो धर्माधर्मं न पश्यति॥ न माता न सुता नैव भगिनी भाव्यते जनैः॥ ५४॥ यदि कुं
डलितं गाढं कोदंडं कुसुमेषुणा॥ तस्य रागसमाचारमन्यथावस्थितात्मनः॥ ५५॥ अ
वलोक्य भयोद्विग्ना बलाधर्षणशंकया॥ मृगीरूपं समास्थाय पलायिष्ट तिलोत्तमा ॥ श्री ॥
५६॥ सोपि सारंगवेषेण तामन्वद्रवदब्जभूः॥ पलायितामनुसरन् कामांधः कमलो ॥ ६७ ॥
द्भवः॥ ५७॥ अधमाचारनिपुणो धर्षितः पुरवैरिणा॥ स नीलकंठः कैरातवेषमालंब्य

वेगतः॥ ५८॥ सारमेयाकृतिधरैः वेदैरनुसृतः पथि॥ पिंछावतंसासुभगो गुंजा
भरणमंडितः॥ ५९॥ शुतश्रेणीसमावेष्टो मृदुना व्याघ्रचर्मणा॥ तस्य धनुर्वहन् हस्ते
नर्तयन्नेकमंशुमं॥ ६०॥ पल्लवाबहुपर्ययागुंजाहारमनोज्ञया॥ दूर्वा—मलमृदंग्या
पिंछोत्तसस्रजाभया॥ ६१॥ करींद्रमदनिष्यंदतिलकोज्वलफालया॥ कंकयोः करि
दंतोत्स्यैः कणद्भिश्चारुहस्तया॥ ६२॥ स्वसमानकिरातस्त्रीसहस्रपरिवारया॥ अ
न्वीयमानस्वच्छंदकिरात्या जगदंबया॥ ६३॥ स्वेच्छाकिरातः स शिवो ददर्श पुरतः
स्थितां॥ धावंतीमनुधावंतमारात्तं च विरंचिनं॥ ६४॥ संदधे स शरं तूर्णमधर्मोच्छेद
लंपटः॥ तमागतं महादेवं मायाशबरविग्रहं॥ ६५॥ विलोक्य भीतभीतात्मा पादयो
रपतद्विधिः॥ अपराधं मयाशंभो क्षम्यतां संहराशुगं॥ ६६॥ स्वद्वार्यां लक्ष्यं त्रिपुर

॥ स्कं० ॥ मेधकेवा तदे तकः॥ इतिधात्रा सरभसं प्रणम्रेन प्रजासृजा ॥ ६७ ॥ नाथितो जगतीं
॥ ४८ ॥ नाथः संजहारशिलीमुखं ॥ गतमदनसंक्षोभे याते चस्वपदं शिवे ॥ ६८ ॥ विम
लेतस्य हृदये पुनरायात्तिलोत्तमा ॥ आगत्य पादयोरस्य पतित्वा भक्तिशालिनी ॥ ६९ ॥
अनुजानीहि मां कापि कर्मणीति व्यजिज्ञपत ॥ अथ देवान्समाहूय क्षेममग्रेति
लोत्तमां ॥ ७० ॥ प्रेषयामास स्कंदो पस्कंदनाशाय पद्मभूः ॥ साजगाम च तन्वंगी देवै
रतिपुरस्कृता ॥ ७१ ॥ स्कंदोपस्कंदनगरी बाह्योद्यानं मनोहरं ॥ तत्र डोलां समारुह्य
शुभ्रकांचनकांचिनीं ॥ ७२ ॥ जगौ मधुरनादेन लज्जयंतीव कोकिलान् ॥ गांधारं ॥ श्री ॥
मध्यमं षड्जं ग्रामं त्रितयमुत्तमं ॥ ७३ ॥ यथाकालं विहृण्वान्समरलीसूत्रलं ॥ ४८ ॥
पटा ॥ आकंपिते च स्फुरिते ईतप्रत्याहृतैरपि ॥ ७४ ॥ यथावसरसं लग्ने --

सारमादाय पाकाचित् सृष्टव्या कामिनीयया ॥ ४२ ॥ तया संमोहितौ तौ हि तस्याः
संभोगकांक्षिणौ ॥ रागद्वेषहतात्मानावन्योन्यौ मारयिष्यतः ॥ ४३ ॥ इत्युपायं वि
निमीय सहसा चतुराननः ॥ तेषु संपश्यमानेषु ससर्जैकां सुलोचनां ॥ ४४ ॥ ध्यान
मात्रेण सर्वाभ्यो नारीभ्यः कांतिसंपदं ॥ तिलशस्तिलशोहृत्वा निर्ममे नीरजासनः ॥
४५ ॥ ततस्तिलोत्तमा नाम्ना संजाता वरवर्णिनी ॥ दीप्ता लावण्यपूर्णांगी सवि
लासपराक्रमा ॥ ४६ ॥ मोहयंती मनः पुंसां प्रापां लोचनगोचरं ॥ तुंगपीनस्तना
भोगविनवन्मध्यवल्लरी ॥ ४७ ॥ शरन्निशाकरच्छाया दामाद्समुखचंद्रिका ॥ चो
ताहचचलं नीलनीरजा लोललोचना ॥ ४८ ॥ विभूषणानामाकारं भूषयंती निजां
गकैः ॥ तडिन्मयेव लावण्ये हशोरजमयीव च ॥ ४९ ॥ ज्योत्स्नामयीवदंतेषु क

॥८०॥ हस्ताहस्ति निपोधिनौ ॥ अन्योन्यं गदया गुर्व्या कालदंडप्रहारया ॥ ८३ ॥ अन्योन्यौ
॥४९॥ मारितौ । स्कंदोपस्कंदौ मृत्युमापतुः । तिलोत्तमा देवकार्यं इत्थं कृत्वा यशस्विनी ॥ ८४ ॥
पुनरायाज्जगत्स्रष्टुर्ममनक्तांबुजेक्षणा ॥ स ततस्या अप्सरोभावं देवलोके च निर्वृतिं
८५ ॥ रूपस्य तव सादं च श्रेष्ठं गीर्वाणयोषितां ॥ दत्वा विसृज्य स्वर्गाय मनस्येवं
विचारयन् ॥ ८६ ॥ इत्थं यदीय दुहिता यदस्यामेव मे मनः ॥ मोहात् तं कृतवान् का
मो दुराधारप्रवर्त्तकः ॥ ८७ ॥ अयं महाजनस्यापि संकटे पतनं महत् ॥ ततो विशृ
भ्रचारित्रो महान्विघ्नस्तपस्विनां ॥ ८८ ॥ शापाग्निना प्रधक्ष्यामि तमेनमिति निश्चि ॥श्री॥
तः ॥ आगतं स्मृतिमात्रेण ददर्शाग्रे मनोभवं ॥ ८९ ॥ तमाह कलहोद्भूत दिव्यमान ॥४९॥
पितामहः ॥ अरे दुरात्मन् मंदांध ममान्याय प्रवर्त्तितं ॥ ९० ॥ कृतवानदुर्मेधो दुहि सि

तुभोगमोहितं ॥ तद्भविष्यसि संक्रुध्य नीलकंठललाटजैः ॥ ९१ ॥ ज्वालाजटालैर्ज्व
लत्तै भस्ममात्रतनुः स्मरः ॥ अथ भीतेन कामेन रत्या च भवलोलया ॥ ९२ ॥ शापांतप्र
भुः पृष्टं इदमाह तं ब्रांगजो ॥ यदा त्वयि हते वीरा गिरिशालोक शुभ्रया ॥ ९३ ॥ भंडा
सुरेण महता भविष्यति हतं जगत् ॥ तदा तस्य निरासाय ललितान्नाम देवता
९४ देवाद् उत्पादयिष्यंति सर्वदेवस्वरूपिणी ॥ महायागविधानेन महते ज्वल
तोज्वरान् ॥ ९५ ॥ उद्भूय सा महादेवी ललिता परमेश्वरी ॥ कामेश्वरांकनिल
याता स्मरोत्सादयिष्यति ॥ ९६ ॥ तस्मादयं मया दत्तः शापो भविता नान्यथा ॥
इत्युक्तो जगतां स्रष्टा शांतकोपेन मन्मथाः ॥ ९७ ॥ अंतरुद्भिन्नहृदयो निजप्रा
प्यनिकेतनं ॥ तेनैव शापदोषेण महावीरसमन्मथः ॥ ९८ ॥ आगतश्चंद्रचूडा

॥९८॥ लफालानलपतंगतां ॥ हरिणापि हरेणापि ब्रह्मणापि स्मरेरपि ॥९९॥ अवश्यमनु
॥९०॥ भोक्तव्यश्शापः कुंभसमुद्भवः ॥ इति ते कथयश्चापो दाहश्चापि मनोभुवः ॥१००॥ वि
मृश्यतवशेषेण किं भूयः श्रोतुमिच्छसि ॥१०१॥ इति श्रीब्रह्माण्डपुराणे उत्तरभागे ल
मो लितोपाख्याने युद्धकांडे षष्टोऽध्यायः ॥८॥ अगस्त्यो वाच ॥ गंधर्ववर्य सर्वज्ञ सर्व
वागीश्वरेश्वरं भंडासुरस्य चोत्पत्तिं विस्तरात्कथयस्व मे ॥१॥ हयग्रीव उवाच
यत्र दग्धो मनसिजः पिनाकिनिटलाग्निना ॥ तत्रैव भस्मनस्थानात् असुरः कोप्युद
च्युतः ॥२॥ स पंडनाम्ना विख्यातो नित्यमेव नपुंसकः ॥ वज्रवन्निष्ठुराकारः कंप ॥श्री॥
यन् भुवनत्रयं ॥३॥ उत्पातजलदध्वानो मायाचारपरायणः ॥ पातालकर्दमश्या ॥९०॥
मो दीर्घसूक्ष्माणि जाकृतिः ॥४॥ त्वगस्थिशेषदेहश्च शिरालश्च करालदृक् ॥

त्ताडयंतीविपंचिकां ॥ मूर्च्छनाभिर्मनोज्ञाभि सर्वसंघट्टयोनिभिः ॥७५॥ मोहयंतीग
जच्छक्तं रागालापप्रवर्तिनी ॥ नामाल्लोक्य विपंचीं च कलनिस्वनवादिनीं ॥७६॥ उद्या
नपालकाः सर्वे प्रोचुः स्कंदोपस्कंदयोः ॥ अहंपूर्विकयागत्य तौ तस्यां लंपटौ च नौ ॥
७७ ॥ आत्मैकभोगकृत्यायत्ते नातेकलहे मिथः ॥ स्कंदो वाच वृत्तोपस्कंदमाद्दासीरेऽभौनां
त्कुटुंबिनीं ॥७८॥ ज्येष्ठो भ्राता पितृसमो माता तत्तुल्यात तद्वधूः ॥ तस्मादस्यां त्वक्कहृक्षिं
मातरीव प्रदुष्यत्ति ॥७९॥ इत्युक्तः स्कंददैत्येन तत्कनिष्ठो जगाद तं ॥ स्कंदो वाच ॥ मम उप
ज्येष्ठोसि दैत्येंद्र मा त्रियैषा विलासिनी ॥८०॥ ममैव पूर्वं सा दृष्टा स्नुषेयं तव धर्म
तः ॥ इत्यादिकोपवाक्येन संजातकलहो मिथः ॥८१॥ परुषाणि च वाक्यानि भाषमा
णो परस्परं ॥ दुर्वाक्कलहसंरुध्यबद्धद्वेषो च दुर्मती ॥८२॥ कचाकचि समाश्लिष्टौ

॥८०॥ तमनुप्रोत्थितो दुष्टो विश्वको नाम दानवः ॥ भंडासुरसमाचारः तीक्ष्णज्वालामहे
॥५१॥ श्वरः ॥ १४ ॥ तमनुप्रोत्थितश्चान्यो विषंगो नाम वीर्यवान् ॥ अनुजाभ्यायुतस्ताभ्यांव
भौभंडो महासुरः ॥ १५ ॥ संयुक्तः पापलोभाभ्याम् महाक्रोध इवोत्थितः ॥ तानतुप्रोथिताः के
चित हूलुककलेवराः ॥ १६ ॥ कूपगंभीरनयनाः गर्तगंभीरगल्लकाः ॥ विकटे वक्रसंस्थाने
न्निम्नोन्नतनिवेशने ॥ १७ ॥ नानाकौटिल्यसंयुक्तै स्तीक्ष्णदंतैश्च भीषणाः ॥ अक्षौ
हिणिसहस्राणां त्रिभिर्युक्ता मदोद्धताः ॥ १८ ॥ दानवा भंडदैत्येंद्रमनुजग्मुर्महाबले ॥
जायमानाअमी सर्वे दानवा दुष्टवृत्तयः ॥ १९ ॥ अभिषिच्य महाराजं भंडं चंडपराक्र ॥श्री॥
क्रमं ॥ आसेवंत प्रतिदिनं अनुजाभ्यां समीयुतं ॥ २० ॥ जायमाने च दैत्येंद्रे दिशो धूम ॥५१॥
रतां गताः ॥ शिवाववाशिरे घोरं रक्तवृष्टिरजायत ॥ २१ ॥ उल्काश्च व्यपतन्व्योम्नि भू

मेः कंपश्च पप्रथे ॥ दिशां दाहश्च ववृधे प्रतिमा रुरुदुर्मुहुः ॥ २२ ॥ भौमनाकसमु
त्पाकजालं दिव्यमथोद्भुतं ॥ सर्वेषामपि चित्तानि मलिनान्यभवं नृणां ॥ २३ ॥ महेंद्रे
पर्वतोपांते शून्यकं नाम पत्तनं ॥ पूर्वांबुराशितीरस्थ मध्यास्ते स हि दानवः ॥ २४ ॥
समस्तरथनागाश्वसंख्यातीतभटावृतः ॥ अप्रधृष्यो भटैः सर्वैः सुरयोनिगतैर
पि ॥ २५ ॥ बहुसालप्रावरणं परिघैश्च सुरक्षितं ॥ शून्यकं नगरं भंडः प्रशशास महा
बलः ॥ २६ ॥ चतस्रो वनितास्तस्य बभूवुः प्रियदर्शनाः ॥ संमोहिनी कुमुदिनी
चित्रांगी सुंदरी तथा ॥ २७ ॥ ताभिः संसेव्यमानो सौ वत्सरोभिर्यथा[illegible] ॥ संबभूवु
महाकाया महोत्तोजितकाशिनः ॥ २८ ॥ बभूवुर्दानवाः सर्वे भृगुपुत्रमतानुगाः ॥
अर्चयंतो महादेवमास्थिताः शिवशासने ॥ २९ ॥ बभूवुर्दानवास्तत्र पुत्रपौत्रध

॥ ल० ॥ नान्विताः ॥ गृहे गृहे च यज्ञाश्च संबभूवुः समंततः ॥ २० ॥ ऋचो यजूंषि सामानि मिमांसा
॥ ९२ ॥ न्यायकादयः ॥ प्रवर्त्तंते स्म दैत्यानां गृहं प्रति गृहं प्रति ॥ २१ ॥ ते हि संमंत्रयामासुः कदाचिद्दा
नवास्त्रयः ॥ भंडश्चैव विशुक्रश्च विषंगश्च महाबलः ॥ २२ ॥ भंडो वाच हे भ्रातरौ महासत्वा
मस्माकं वैरिणः स्मराः ॥ आजानसिद्धकोटिस्थाः पापिष्ठा रंध्रयातिनः ॥ २३ ॥ वृथादर्पा वृथामा
नाः परवंचनचंचुराः ॥ तेषां विमर्द्दनं कार्यमस्माभिरवमानिभिः ॥ २४ ॥ त्रैलोक्यं खलु शक्र
स्य विषयत्वेन कीर्तितः ॥ स्वर्लोकश्चैव भूर्लोको भोगिनां लोक एव च ॥ २५ ॥ तां त्रिलोका
न पिहत्वातमर्द्दयामो मदोद्धताः ॥ अस्माकमवकाशोयं समीचीनः समागतः ॥ २६ ॥ काम ॥ श्री ॥
स्य भस्मसाद्भूतौ तेन पूर्वकृतोत्थितः ॥ तस्यैव च प्रभावेन सुखमन्वभवन्मुहुः ॥ २७ ॥ वर्त्त ॥ ९२ ॥
माने चकं दर्पे पुरानास्माकमुद्भवः ॥ स तु दैववशाद्दग्धाः तेनैव बलिना वधं ॥ २८

स दृष्टिपातमात्रेण दहन्निव जगत्त्रयं ॥ ५ ॥ आभीलरथमारूढो यातनाखड्गधारकः
एतादृशगुणः पंडुजातो मन्मथभस्मतः ॥ ६ ॥ तं चित्रकर्मा बाहुभ्यां समालिंग्य मुदा
न्वितः ॥ स्तुतीबालो महादेवं स तु सर्वार्थसिद्धिदः ॥ ७ ॥ इत्युक्त्वा शतरुद्रीयं उपादि
दशमेयधीः ॥ न नाम शतसो रुद्रं शतरुद्रमनं जपेत् ॥ ८ ॥ ततः प्रसन्नो भगवान्म
हादेवो वृषध्वजः ॥ दृष्ट्वार्धेंदुजटाजूटं वरं वव्रे स बालकः ॥ ९ ॥ प्रतिद्वंद्वी बलार्धं तु
मुद्दक्तेनो पयोक्ष्यति ॥ तदस्त्रशस्त्रमुख्यानि व्यर्थं कुर्वंतु नो मम ॥ १० ॥ तथेति तत्प्र
तिश्रुत्य विचार्य किमपि प्रभुः ॥ षष्टिर्वर्षसहस्राणि राज्यमस्मै ददौ पुनः ॥ ११ ॥ रात
छुत्वा तु चरितं तथा भंडितिभंडिती ॥ यदुवाच ततो नाम्ना भंडो लोके प्रगीयते ॥ १२ ॥
इति दत्वा वरं तस्मै सर्वैर्मुनिगणैर्वृतः ॥ दत्वा त्रीणि च शस्त्राणि तत्रैवांतरधीयत ॥ १३ ॥

८० सहस्राक्षोहरणीयुक्ताएकैकंमोथितात्वया॥४७॥भंडासुरप्रथमतःसहस्राक्षोहि
५३ णीसख॥स्वर्गलोकाश्ववैजंतुप्रतस्थेभंडदानवः॥४८॥अथस्वर्गेमहोत्पाताःनिर्जरा
णांभयानकाः॥बभूवुरतिसंक्षोभतुमुलीकृतचेतसां॥४९॥अक्षौहिणीसहस्रेणतेना
दृश्येनसोसुरः॥प्रविश्यस्वर्गलोकेतुशोषयामासतद्रसं॥५०॥मलिनानिमुखान्यास
न्वैरूप्यंसमजायत॥रत्नानिलरूपाणिनिश्रीकाणिनरेजिरे॥५१॥उत्साहाःसकला
नष्टामहत्यापीडयान्विताः॥विषण्णवदनाश्चापिभूर्भुवःस्वर्गवासिनः॥५२॥आवि
ष्टमूर्तयस्तेनषंडेनसुरात्मना॥पुंस्त्वेनवर्जिताःसर्वेजाताइवनपुंसकाः॥५३॥अ ॥श्री॥
भूवन्सर्वतोदेवावीर्यंतेषांनविद्यते॥अन्योन्यकार्यविरहादन्योन्यसंगवर्जिताः॥५४॥ ५३
अन्योन्यसंगविरहायमित्याहभवंतदा॥निसहायप्रसंगेनविरक्ताःसर्वकर्मसु॥५५॥

कर्माणिदैन्यमालिन्यादुःखप्रायाणिभेजिरे॥अथाप्सरसश्चाविश्वाद्युर्वीताभंडसै
निका॥५६॥पंथ्यत्वंवीतरागित्वंसुरतद्रववर्जितं॥तत्क्लेशेनातिविरहासविलास
रसक्षयं॥५७॥आलोकनस्यवैरूप्यंवर्धयामासुरुद्धताः॥नकापिरमणंभेजेग
ततृष्णापराङ्मुखी॥५८॥क्लेशांश्चविविधांश्चापिप्राप्नुयुर्देवयोषितः॥पीयमानासु
धाप्यासांनकिंचिन्मदमातनोत॥५९॥तस्याश्चनिर्मदत्वेनसुधायाःकुंभसंभव॥अ
प्युत्तुंगाअपिघनाःस्तनानिर्जरयोषितां॥६०॥भंडासुरोपद्रवेणमुहुर्वैहृशतांदधुः॥अल
क्ष्मीकमहासंकुवलीपलितसंकुलं॥६१॥वानरीणामिवमुखममरीणामजायत॥दुर्भ
गाश्चकृताःसर्वाःनकाचित्सुभगाक्वचित्॥६२॥देवतानांगणाःसर्वेनिर्भोगाभंड
पीडिताः॥नकेवलंप्राणभाजास्तत्राभूद्रससंक्षयः॥६३॥नंदनोद्यानवृक्षाणांअपि

॥८०॥ शोषो महान भूत् ॥ तथैव सर्ववृक्षाणां बभूव स्थावरोद्भिदां ॥ ६४ ॥ न च भृंगांगनासंगो मंज
॥५४॥ रीषु महीरुहां ॥ न च कोकिलकूजो वा न च सौरभसंपदः ॥ ६५ ॥ एवं प्रकारतः सर्वप्राणि
नां दुःखमातनोत् ॥ भंडासुरश्च मायावी महाक्रूरश्च दानवः ॥ ६६ ॥ शून्यकं पुरमा
यातः समं सर्वैश्च सैनिकैः ॥ विमर्दयिष्यन् भूलोकमथ भंडासुरानुजः ॥ ६७ ॥ विशुक्रस्त्व
ति दुर्मेधाः क्रोधरक्तविलोचनः ॥ अदृश्यमानरूपेण तेनाविष्टाश्च मानुषाः ॥ ६८ ॥ भि
न्नमाकारमाजग्मुः जडा विभ्रष्टकांतयः ॥ उदासीनाः स्वकृत्येषु निरुद्योगाश्च मो
हने ॥ ६९ ॥ मेहनेन विहीनत्वात् पुत्रसंतानवर्जिताः ॥ पुत्रसंतानहीनत्वादात्ममात्रा ॥श्री॥
वशेषिताः ॥ ७० ॥ जरसा च परिक्लिष्टा सिरानद्धकलेवराः ॥ विशुक्रेणासुरेंद्रेण सह ॥५४॥
स्मक्षोहिणी-षा ॥ ७१ ॥ पीतशुक्रेन सर्वेपि वीतशुक्रा नराभवन् ॥ स्त्रीणामपि च

यथानोत्पादयिष्यंते तं दग्धं कुसुमायुधं ॥ तथैव हतवीर्यांश्च कुर्मः सर्वान्स्मरो
त्तमान् ॥ ३९ ॥ अहंमप्यामि गीर्वाणाल्लोके भूमौ रसातले ॥ विमर्दयित्त मुद्दामौ युवां से
न्यसमायुतौ ॥ ४० ॥ विशीर्णानन वेधामः तदाद्रक्ष्यंति निर्जराः ॥ वायुरूपा अदृश्या
श्च प्रवेशाम स्तनूभृतः ॥ ४१ ॥ प्रविष्टाश्च प्रतिवपुः शोषयामो रसान् बहून् ॥ रसेषु शोषिते
षेषु शुक्रं संशोषयामहे ॥ ४२ ॥ शुक्लाश्रितानि तेजांसि नाशं यास्यंति देहिनां ॥ प्राणित्वे सति दे
हित्वं जीवत्वं तस्य वर्त्तते ॥ ४३ ॥ तस्य देहमनुप्राप्य तद्रसान् भक्षयामहे ॥ भूमिं भूमिरसा
न्सर्वान् जलजस्थलजानपि ॥ ४४ ॥ प्राणिनोप्राणिनश्चैव शोषयामः पदे पदे ॥ इति भंडस्य
वचनं ज्येष्ठस्याकर्ण्य चानुजौ ॥ ४५ ॥ बद्धांजलिपुटौ भूत्वा नमस्कृत्वाग्रहं मुदा ॥ साधु
साधु त्वया प्रोक्तमित्येनं प्रशशंसतुः ॥ ४६ ॥ अथ ते सोदराः सर्वे लोकनाशनतत्पराः

॥८०॥ कानि पद्मनाटककेलिकाः ॥ ८० ॥ यत्र लक्ष्म्या भाव्यानि यत्र दूतीप्रवृत्तयः ॥ यत्र पद्मिनी
॥५५॥ कामुख्याः जातितद्भाववर्णनं ॥ ८१ ॥ तत्सर्वं नाशमापन्नं विशुक्रेण गृहे तेरसे ॥ राजवं
शेषु नष्टेषु राज्यश्री प्रपलायिता ॥ ८२ ॥ गृहीणां च विसंतानानुग्रहशेषं कुलं कृतं ॥
छिन्ते च गृहिसंताने गृहाः सर्वेपि शून्यतां ॥ ८३ ॥ संप्राप्ताः कर्कशैरर्केः शाख्यैस्तिलकैर्दे
र्नलैः ॥ कंकैर्गृध्रैश्च जंतुकैराक्रांताः शोच्यतां गताः ॥ ८४ ॥ बालप्रवालतृष्यानि मंजरीपुं
जभांजि च ॥ पष्प्यादीमलहारीणि विशुष्यन्ति पितानि च ॥ ८५ ॥ सस्यानि च प्रनष्टानि नष्टा
उद्यानपंक्तयः ॥ पद्माकरात्हताश्चैव निष्फला भाति रूपलाः ॥ ८६ ॥ निर्मलो मृणालानि नि ॥श्री॥
र्भराः पंकशोषिताः ॥ स्तहिकाहैः करीरैश्च शाकोटैर्विषदारुभिः ॥ ८७ ॥ समाक्रांतान्यरण्या
निशुष्काः पुण्यास्तु शाखिनः ॥ भुक्तं न पोषकं तेषां अनाद्यजनि देहिनां ॥ ८८ ॥ भुज्यमानं च ॥५५॥

तत्सर्वं विषवद्देहनाशनं ॥ नरुचिर्जायते चस्म भोज्यवस्तुषु देहिनां ॥ ८९ ॥ मुखे च श्मश्रु
रहिताः शस्त्रयुधपराङ्मुखाः ॥ स्त्रीसंभोगविहीनाश्च क्लीवनामभजन्नराः ॥ ९१ ॥ रक्तां
कुरविहीनाश्च गतसस्यरामुद्रावाः ॥ विशुष्कसरसो तोयात्सदांत दाहेशालिनी ॥ ९२ ॥
सर्वश्रोषरभूयिष्ठाः पुण्यजंतुविवर्जिताः ॥ वीरुधा वल्लयस्तत्र सत्वहीना बभूवि
र ॥ ९३ ॥ आदाय सर्वसंस्थानाकांडशेषा महाद्रुमाः ॥ कृतातेन दुराशेन विशु
क्रेण वसुंधरा ॥ ९४ ॥ अथो विषंग नामापि भेंडाकरवरानुजः ॥ रसातलं प्र
तिक्रुध्योगमनेतु मैतिर्व्यधात् ॥ ९५ ॥ सहस्राक्षौहिण्या युक्तः स च दुर्मेधसां
वरः ॥ विषंगो विषवत्तीक्ष्णो नाशयामास पन्नगान् ॥ बिलद्वारेषु ये सिद्धास्तत्र
पातालवासिनः ॥ ९६ ॥ वासुकिप्रमुखा नागा अतिप्रख्याश्च दानवाः ॥ तेन

॥ल॥ सर्वेविषंगेयाविगतान्योन्यसंक्रमाः॥९७॥अनानंदस्वभावाश्चदुःखमात्रपराय
॥९६॥ णाः॥ परस्परव्यपेक्षेणव्याकुलाअभवंस्तदा॥९८॥सदेवासादितक्रोधाप्रभूत
कलहाकुलाः॥धर्मश्चार्थश्चकामश्चत्रिवर्गोयंरसेस्थितः॥९९॥रसनाशाद्रसोन
ष्टःकेवलाश्चाभवन्तदा॥ शोषितंतत्रसर्वेषांनागानांचैवशोणितं॥१००॥मंडा
कारस्तज्जनितानुगुणांश्चसमबाधत॥वीर्येणखलुजायंतेगुणाःकांतिपुरोगमाः
॥१०१॥कांतिरुत्साहशक्तिश्चमणीनांचप्रकाशिता॥भविष्यबुद्धताचैवशस्त्राणि
चगुणक्रमाः॥१०२॥शास्त्राणिकाव्यनाट्यानिगीतानिहसितान्यपि॥लक्ष्मीवंतश्चव
स्तूनिविचित्राणिपराणिच॥३॥तत्रस्थानंचवस्तूनांशोषितंसर्वतेजसां॥काष्ठे ॥श्री॥
ष्वपिस्नेहशोषात्तेषुलग्नोहुताशनः॥४॥धूमायमानफूत्कारशतैरपिचनाज्वल ॥९६॥

संभोगाःहेतुःशोणितसंप्लुवः॥७२॥तत्सैनिकैःपीयमानःसहसाशोषमागतः॥नरा
गःक्वापिकस्यापिनचसौहार्दभाषितं॥७३॥स्मितपूर्वीसमाचारानावर्तिष्यतकर्हि
चित्॥सौमुख्यमजनिस्त्रीणांपुंसांचैवालसात्मनां॥७४॥रक्तैःशुक्लैश्चवर्धंतेयस्मा
त्सर्वेपिजंतवः॥तन्नाशेसतिसर्वेषांअकांडेविकृतोभवत्॥७५॥रक्तेशुक्लेसमासाद्य
भोगस्त्रीःपूर्वभुक्तता॥तयोःप्रनष्टयोस्तेनविशुष्केदुरात्मना॥७६॥भोगस्त्रियो
धिनेशुश्चभोग्यवस्तुष्वपिक्षयः॥स्तनपुत्तलिकाकारानिविकाराश्चयोषितः॥७७॥
यहृन्केवीक्षितंस्त्रीयांयत्रभ्रूवल्लितांडव॥यद्विलासाश्चविविधायत्रलज्जावि
नम्रता॥७८॥यत्संभ्रमोवल्लभश्चसमागमनसंप्रति॥यत्रसौंदर्यमंगेषुयत्तु
ष्टिस्तनुवल्लिषु॥७९॥यद्य–नसमारंभोयद्रतंचमदोद्धतं॥यत्रगीतानिर

त्॥ तथा देहेषु शुक्रादौ तथा वृक्षेषु तद्रसं ॥ ५ ॥ यथा यथा स वै शोषो भवेद्धि सर्ववस्तुनां
॥ कृतं हि तेन दुःखेन हि तत्सर्वप्राणिनां वारुधामपि ॥ ६ ॥ अतः समानदुःखं च चराचरम
भूज्जगत् ॥ रस एव परं ब्रह्म रस एव परा गतिः ॥ ७ ॥ रसो हि कांतिदः पुंसां रसो हि प्रा
णवर्धनः ॥ रसेन जीवितो लोको रसलब्धानंदी भवेत् ॥ ८ ॥ वेदप्रमाण संसिद्धो रस
प्राणतया स्थितः ॥ को ह्येवान्यात्कः प्राण्यादित्यपि श्रुतिभाषितैः ॥ ९ ॥ प्राणात्मको र
सः प्रोक्तो रसप्राणविवर्धनः ॥ रसहीनतया नित्यं म्लापितस्तु हितैरिव ॥ १० ॥ विश्वा
समलिनच्छायमात्मदर्शं व्यडंबयत् ॥ चंद्रश्च सर्वदा जातः क्षयी पूर्णो तिथिष्वपि ॥ ११ ॥
नारकाश्चैव मालिन्यमभजन् कुंभसंभव ॥ सा च शैलकृता वीतरागविन्यस्तभूषणा
१२ ॥ योगिनां व्रतमास्थाय तपस्तेपे सुदारुणं ॥ भविष्यति भवद्वर्त्तो किं करोषि द्व

॥ल॥ धारते ॥ इत्यभ्रवाणी प्रामाण्याज्जीवितव्ययनिस्पृहा ॥ यत्र क्वापि वनोद्देशे तप
॥५७॥ स्तत्सुमनिर्दिता ॥ ३४ ॥ आश्वासिताव संतेन प्रसस्थे काम भामिनी ॥ वसंतश्च गतो दुः
खी मित्रमाश्वास्य तद्दृढधी ॥ ३५ ॥ इति श्री ब्रह्माण्ड पुराणे उत्तर भागे ललितोपाख्या
ने ९ध उनवमोध्यायः ॥ १ ॥ अगस्त्य उवाच ॥ प्रज्ञावतां पुंसे गामिनश्चानतमया
श्रुतं ॥ जननं भंडस्य दैत्यस्य तेन लोकविमर्दनं ॥ ३ ॥ अथ तस्य वधः केन कृतो विक्रांत
शालिना ॥ तत्सर्वमधुना ब्रूहि कृतार्थस्त्वं यतो मम ॥ २ ॥ अश्वाननः ब्रह्मादयः प्रजाना
थामन्वाद्याश्च महाजनाः ॥ इंद्रादयः सुरश्रेष्ठा प्रल्हादाद्याश्च दानवाः ॥ ३ ॥ अन्या ॥श्री॥
दयश्च दिक्पालाश्चारयासित्य गुह्यकाः ॥ सर्वे पंडासुरेणैते पीड्यमाना दुरात्मना ॥ ४ ॥ ॥५७॥
निशक्तयश्च निःशुष्का भग्नव्यापारदुर्भराः ॥ तं जेतुमतिसत्वाढ्यं असमर्थाः प्रजज्ञिरे ॥ ५ ॥

॥ ल ॥ भगवान् आनंदाब्धिर्महेश्वरः ॥ यदध्यास्ते महापीठं तद्वीर्यं मन्मथांतकं ॥ ३४
॥ ५८ ॥ अदृश्यतां प्रयातेन तद्भंडेन विनाशितं ॥ सोपि भंडोपि मायावी स्मरव्यापत्तिसंभ
वः ॥ ३५ तेजोमात्रविनष्टं वस्तु दुस्त्यन्त्वायुधा अपि ॥ इदमिंद्रस्य कुलिशं दैत्यस्त्री
गर्भपातनं ॥ ३६ तेजोज्वालावियोगेन वर्त्तते निर्विषाहिवत् ॥ शक्तिरेवाकुंठभुजो निः
शक्तिः प्रतिभासते ॥ ३७ कालदंडस्य चंडस्य तेजः शांतिमुपागतं ॥ खड्गश्च निरृतेरे
ष विकुंठित इवाभवत् ॥ ३८ पाशः पाशभृतोप्येष मृणाल इव दुर्बलः ॥ ध्वजं वातस्य विच्छा
यं यच्चियक्षस्य नोज्वलः ॥ १९ ईशानस्य च शूलेन प्रशांतेनैव दृश्यते ॥ सर्वेषामपि वावल्क श्री
मत्यंतमलिनीकृतं ॥ २० राहुग्रस्तस्य चंद्रस्य समावस्थां विगाहते ॥ अतो भंडेन दुष्टे
न शौंडाजानामिवाकृतो ॥ २१ अदृश्यस्य दुराशस्य तस्यादृश्यैर्महायुधैः ॥ सर्वेषामपि ५८

गात्राणि कीलितानि वदेहिनो ॥ २२ अन्येषां किं तु वक्तव्यमस्माप्यत्र सुरोत्तमाः
लक्ष्म्यां वै राज्यमेवासीत्तुव स्वमत्यां च नित्यशः ॥ २३ न तच्च राचरे लोके देहमस्ति
शरीरिणां ॥ यन्न भंडासुरो दंडशस्त्रसंपातमूर्छितं ॥ २४ ब्रह्मांडगोलके ये ये वर्त्तं
ते देहधारिणः ॥ देवतिर्यङ्नराकारास्ते च सर्वेपि दुर्बलाः ॥ २५ अहं ब्रह्मा च रुद्रश्च
वयं कारणपूरुषाः ॥ अंडमध्ये च तिष्ठामस्तेनास्माकमपि ज्वरः ॥ २६ अंडातीतो म
हाशंभुर्नास्ति कश्चिन्न पूरुषः ॥ परशक्त्या समाश्लिष्टो नित्यश्चिद्घनमूर्तिमान् ॥ २७ न त
स्य कामनाशोहं भंडदैत्यपराभवः ॥ स निरूप्यो निरालंबो निर्विकारः परात्परः ॥ २८
तस्यैव हि प्रसादेन भंडदैत्यविमर्दने ॥ उपायो भवतां भावी स तु सर्वज्ञ ईश्वरः ॥ २९
तस्मात्तस्यैव सर्वेपि वयं संभूय नाकिनः ॥ स्तुतिं विदध्महे तेन प्रीत इष्टं विधास्यति ॥ ३०

॥ ७ ॥ इत्युक्तास्तैः समं सर्वैर्भगवान्केरभांतकः ॥ ब्रह्मशक्रादिभिर्देवैरंडभित्तिसमाश्रयत् ॥ ३१ ॥
॥ ५१ ॥ सर्वैर्देवैः समाहूता मदक्लिन्नकटस्थलाः ॥ दिग्दंतिनः समागत्य कठोरैर्दंतपातनैः
३२ ॥ अंडभित्तिं विभिदिरे भातसंवत्सरावधि ॥ अनेकयोजनैर्दीर्घं कुंजेंडस्य सरंध्रिते
॥ ३३ ॥ तेन रंध्रेण ते देवा बहिरंडं समाश्रिताः ॥ तत्र चिन्मयमाकाशं निरालंबं निरंज
नं ॥ ३४ ॥ अभूम्यजलमज्वालममारुतसमागमं तत्राकाशं निरालंबं तु ष्टावुः परयामु
दा ॥ ३५ ॥ दे उ ॥ अद्वयं निर्मलं शांतं मायातीतमजं महः ॥ निरस्त
दृक्रूणसंसर्गं महाशंभुमुपास्महे ॥ ३६ ॥ देवानामपि चावेद्यमध्येयं योगिनामपि ॥ श्री ॥
गिनामपि ॥ अनध्येयं च वेदज्ञैः महाशंभुमुपास्महे ॥ ३७ ॥ न सन्नासन्न ॥ ६१ ॥
सदसन्न द्वयं नाद्वयं तथा ॥ यस्य तेजः प्रकाशं ते महाशंभुमुपास्महे ॥ ३८ ॥

किंकर्तव्यविमूढाश्च दुःखेन मलिनांतराः ॥ क्षीराब्धिशायिनं देवमनादिनिधनं
हरिं ॥ ६ ॥ शरणं जग्मुरित्यार्तश्चातका इव तोयदं ॥ सोपि कामस्य विरहात्तु लक्ष्म्यां
चैव पराङ्मुखः ॥ ७ ॥ रूपुप्तियोगमास्थाय रूपापानं दवष्मोणि ॥ अथ प्रबोधितस्ते
स्तैः स्तुतिभेदैर्दिवौकसां ॥ ८ ॥ अजागृद्देवुजाक्षोपि दीनानेतान्विलोकयत् ॥ बुध्वा
च तेषां देवानां समागमनकारणं ॥ ९ ॥ विज्ञानचक्षुषा विष्णुः प्रभविष्णुरुवाच तान् ॥
कुशलं भवतां देवा अथवाकुशलं कुतः ॥ १० ॥ मालिन्यमेव वस्त्रेषु व्याचष्टे कुशलं ह्य
ति ॥ यथापूर्वं न शोभंते भवंतः कांतिभंगिनः ॥ ११ ॥ कूष्मायमानदोःसारं निःसारं इव जा
म्रति ॥ किंच बाष्पायमाणानि चक्षूंषि कलुषाण्यपि ॥ १२ ॥ क्लिश्यंति च वल्काणि वि
म्लांताश्च पराक्रमाः ॥ अन्यत्वमिव संप्राप्ता भवंतो भाग्यसंक्षयात् ॥ १३ ॥ रूपत्व स्वरूपो

स्वयंवेद्यंस्वसंजातंस्वयंप्रभुमनंजनं॥ स्वयमेकांतनिर्विण्णमहाशंभुमुपास्महे॥३९॥
वेद्यंवित्तिश्चवेत्ताचदेवत्यंत्रिपुटीत्रयं॥ स्पृशंतिक्वापियन्नैवंमहाशंभुमुपास्महे॥४०॥ धर्मा
धर्मैस्तद्विपाकैःस्वदुःखैश्वर्यत्समं॥ अनाघ्रातंतमीशानंमहाशंभुमुपास्महे॥४१॥ सौ
राणांभास्कराकारंब्रह्मब्रह्मवादिनां॥ सौगतानांचविज्ञानंमहाशंभुमुपास्महे॥४२॥
लोकायतिकमुख्यानांस्वभावमयविग्रहं॥ क्षपिकानांक्षयाकारंमहाशंभुमुपास्महे॥४३॥
४४॥ अर्थेश्वरंनिधिविदांकामेशंकामस्कत्रियां॥ वैश्वानरंचवैद्यानांमहाशंभुमुपास्म
हे॥४५॥ शून्यमध्यमिकानांचसांख्यानांपुरुषात्मकं॥ पातंजलानांशाब्दंचमहाशं
भुमुपास्महे॥४६॥ वारुणाविश्वकर्माणंशैवानांशिवरूपिणं॥ विष्णुंचपंचरात्राणां
महाशंभुमुपास्महे॥४७॥ दयावतांधर्मदेवमुग्राणांचंडदैवतं॥ कर्मठानांमुपास्याख्यं

ल महाशंभुमुपास्महे ॥ ४७ ॥ विप्राणामग्निनिलयं हृत्स्थं योगवतामपि ॥ प्रतिमास्वप्र
६० बुद्धानां महाशंभुमुपास्महे ॥ ४८ ॥ सर्वेषामादिभूतं च स्वयमादिविवर्जितं ॥ सर्वांत्तं
च स्वतोनातं महाशंभुमुपास्महे ॥ ४९ ॥ त्वं न दृश्योसि सर्वेषां न ध्येयोसि महेश्वर ॥ अ
ज्ञीवातुसंसि । ध्येचक्षुषां नः पदं भव ॥ ५० ॥ विपरीतसमाचारैर्दुष्टैर्भंडादिदानवैः
बाधितास्मो महाशंभो महाशंभुमुपास्महे ॥ ५१ ॥ दुर्बलास्म विभग्नास्म निरसास्मश
शंकर ॥ अस्मानुद्धर कारुण्य चक्षुषां नः पदं भव ॥ ५२ ॥ यदि नोरक्षसि भवान् भक्ता
नस्मानपराजितान् ॥ तवैवतियशोहानि चक्षुषांन्तपदं भव ॥ ५३ ॥ इत्येवं विष्णु ॥ श्री
नाधात्रा इंद्रेणा च कृतस्तुतिः ॥ आविर्बभूव भगवानपराशक्त्यानिषेवितः ॥ ५४ ॥ ६०
कालमेघसमच्छायः कथांशूलकपालभृत् ॥ द्विभुजश्च त्रिनेत्रश्च स्मयमानमुखां

बुजः ॥ ५५ ॥ पराशक्तिश्चचंद्राभात्वंद्वचैतल्लाकृतिः ॥ अक्षस्रक्पुस्तकधरातैर्दे
वैस्वल्लोकिता ॥ ५६ ॥ सर्वेषांमूलभूतौतौदंपतीकरुणाकरौ ॥ परामहाशंभुनाथवरा
तादर्शनोत्सवं ॥ ५७ ॥ महाशंभुश्चतानाहस्मितोल्लसन्मुखांबुजः ॥ महाशंभुरुवाच
न युष्मदागमनंजातेयुष्मांजानेपराजितान् ॥ पंडाकरस्यदोष्यंचजानामिजगदंतकृत ॥ ५८ ॥
प्रलयस्त्रिविधःप्रोक्तोजगदंडस्यस्फुत्रतः ॥ महाप्रयनामाद्यःकामप्रयलएवच ॥ ५९ ॥
अवांतरश्चप्रलयोनित्यमावर्त्ततेत्रिकं ॥ प्रत्यंडंप्रलयाएतेप्रतिकल्पंचनिहिताः ॥ ६१ ॥
प्रलयोद्धारकाश्चैवत्रयोदेवाःप्रकीर्त्तिताः ॥ महतःप्रलयस्याहंउद्धारकतयास्थितः ॥
६२ ॥ अवांतरलयस्यास्यउद्धर्त्ताकमलासनः ॥ कामप्रलत्तोधात्रीललितापरमे
श्वरी ॥ ६३ ॥ प्रत्यंडंप्रतिकल्पंचसाविर्भावंसमश्नुते ॥ इदानींप्रलयोजातःकामि

॥ल॥ कः कामनाशतः ॥ ६४ ॥ मंदशेन महेशेन रोषाद्दग्धे मनोभवे ॥ तद्भस्मप्रोत्थितो भंडप्रमुखे राकु
॥६३॥ लंजगत् ॥ ६५ ॥ विनष्टं च विसारं च मृतप्रायमभूत्कराः ॥ तस्मादन्यातु ललिता सृष्टिं देवी
करिष्यति ॥ ६६ ॥ तामुत्पादयितुं यत्नमातिष्ठध्वं सुरोत्तमाः ॥ देवा ऊचुः ॥ कथं तस्या म
[illegible]हादेव्याः समुत्पत्तिर्भविष्यति ॥ ६७ ॥ कुतः स्थानात्समुत्पत्तिः केन वा कर्मणा भवेत् ॥
श्रीमहाशंभुनाथैतत्त्वविस्पष्टं प्रतिपद्यतां ॥ ६८ ॥ त्वमेव सर्वोपायानां प्रज्ञाता परमेश्वरः
महाशंभुः ॥ तत्र कर्त्तव्योभवद्भिस्तु तदुत्पादनकर्मणि ॥ ६९ ॥ संश्रोतव्यः प्रयत्नेन सर्वकामस्य
सिद्धये ॥ महायागः प्रकर्त्तव्यो महाहोमविधानतः ॥ ७० ॥ महायागे च कर्त्तव्ये होता वै वा ॥श्री॥
युरूपधृक् ॥ मम चिह्नाग्निरेवाग्निः सामान्याग्निश्च हव्यवाट् ॥ ७१ ॥ शुष्कं सर्वं जलं सिंधुः स ॥६३॥
मः कुंडमिष्यते ॥ अभिघारः सिंधुषट्कं पशवः पंचसृष्टयः ॥ ७२ ॥ पंचानामपि सृ

॥ल॥ स्य पश्चात्सृष्टिं विधास्यते ॥ ८१ ॥ सर्वं नवनवाकारं भविष्यति जगत्त्रयं ॥ तस्याः प्रसादमा
॥६२॥ हात्म्यं तु पूर्ववत्तोष्यति शंकरं ॥ ८२ ॥ उत्तिष्ठंती च सा देवी कामोज्जीवनकर्मणि ॥ सहसा
स्मृतिमात्रेण सृक्षत्यस्त्रचतुष्टयं ॥ ८३ ॥ ऐक्षवं धत्तुरं कं स्यादन्यत्पुष्पेषुपंचकं ॥ पा
शस्तृतीयमस्त्रं स्यात्तुरीयास्त्रं महासृणि ॥ ८४ ॥ एतैरेव चतुर्भेदैरायुधैर्ललितेश्वरी ॥
भंडासुरस्य संहारं करिष्यति न संशयः ॥ ८५ ॥ उज्जीवनं च कामस्य करिष्यत्य
वलोकनात् ॥ युष्माकमपि सर्वेषां चिदग्नौ हव्यतां जुषां ॥ ८६ ॥ त्यक्तप्रायशरीरा
णां नवाकारान्विधास्यति ॥ अत एवं प्रकारेण कर्तुं यागं महत्तरं ॥ ८७ ॥ संमतिर्य ॥श्री॥
दि युष्माकं तदाहं प्रयते सुराः ॥ अन्यथा भंडदैत्येन पीतसर्वस्वतेजसां ॥ ८८ ॥ ॥६२॥
प्राणामात्रं तु शिष्टं वः तत्रप्रायो विनश्यति ॥ युष्मत्प्रनाशादंडस्य नाश एव न संश

यः ॥ ८९ ॥ ततो यज्ञमिमं कृत्वा तद्युत्पत्तिं विधीयतां ॥ इत्युक्तं शंभुनात्तेन समाकर्ण्यैव
चः सुराः ॥ ९० ॥ बभाषिरे भृशं हृष्टा नमस्कृत्य मुहुर्मुहुः ॥ तथा खलु भवत्तो भीष्टं यत्क
र्त्तुमुचितायते ॥ ९१ ॥ कर्त्तव्यमेव तत्त्देव नात्र कार्या विचारणा ॥ वयं कृतार्था जातास्मः
चिदग्नौ हव्यतां गताः ॥ ९२ ॥ वत्सं विदग्नि विप्रुष्ठा प्राप्या मो नूतनां तनुं ॥ इति कर्त
व्यतायाहृष्टः कस्य स्यास्य महीयसः ॥ ९३ ॥ तेन देवाः प्रहृष्टांतःकरणास्तेन वर्त्मना ॥
दिग्धांति भिन्नब्रह्मांडद्वारजातेन चागताः ॥ ९४ ॥ पुनस्तद्वारमद्रींद्रैरपिधाय सुमहत्त
रैः ॥ यथा यथा गृहं जग्मुः महादेवाभिकांक्षिणः ॥ ९५ ॥ स च देवो महाशंभुः महायाग
चिकीर्षया ॥ लोकानामुपकाराय पराशक्त्या समन्वितः ॥ ९६ ॥ अंडाद्बहिस्त्रिदाका
शमयज्ञानमहागृहात् ॥ प्रविवेशांडमध्ये तु सूक्ष्मरूपः सनातनः ॥ ९७ ॥ इति श्रीब्रह्मा

॥ ल ॥ ण्डपुराणे उत्तरभागे ललितोपाख्याने दशमोऽध्यायः ॥ १० ॥ अगस्त्य उवाच ॥ हयग्रीव
॥ ६३ ॥ महाप्राज्ञ विचित्रं प्रस्तुतं त्वया ॥ महायागो भवत्कीदृक् किं फलं जगतोप्रिये ॥ १ ॥ वि
स्तरेण ममाचक्ष्व तन्मे कौतुकं महत् ॥ संश्रूयमाणमपि यत्परानंदायकल्प्यत ॥ २ ॥
हयग्रीव उवाच ॥ कथयामि महाप्राज्ञ महायागं महोदयं ॥ पवित्रं सर्वपापघ्नं श्रु
तं सर्वमलापहं ॥ ३ ॥ आवर्त्तितं तु संसिध्येत्तत् ब्रह्मामृतभाजनं ॥ एकवारं श्रुतं ध
तं महायागप्रवर्त्तनं ॥ ४ ॥ राजसूयसहस्रस्य यद्दत्ते फलमनुत्तमं ॥ श्रीमहाशंभुनाथः स
प्रविश्याडे महत्तमं ॥ ५ ॥ स्वयं होताभवत्तत्र यज्ञपत्नी पराभवत् ॥ ललितायामहावि ॥ श्री ॥
द्यां उत्तरं स्वात्मसंविदं ॥ ६ ॥ सप्तस्कंधमहावायूमयमात्मानमातनोत् ॥ पराशक्त्यं ॥ ६३ ॥
विकाशीस्यक्रियाशक्तिः किलाभवत् ॥ ७ ॥ तयां प्रबलयायुक्तः श्रीमहाशंभुना

ष्टीनां लक्षणं कथयामि वः ॥ मानसी प्रथमा सृष्टीरथजारायुजी तथा ॥ ७३ ॥ अंडीचैव
तृतीयास्यात्स्वेदजान्यात्तथोद्भिजा ॥ एषा पंचविधा सृष्टिः पुरोडाशस्तयाभवेत् ॥ ७४
सृष्टेः पंचविधायास्तु व्यतिरिक्ततनोहिमवत् ॥ भूभूधरांबुवाताग्नं तेन तो हव्यकल्प्यते ॥ ७५
अग्निस्तु मे चिदाकारे वह्नावेकी भविष्यति ॥ एतदेवं प्रकारेण महायागः प्रवर्त्यतां ॥ ७६
सर्वैरपि च होमाग्नौ भवद्भिर्ज्वलदर्चिषि ॥ पतनीयं प्रयत्नेन मद्भक्तिप्रेरितास्तदा ॥ ७७
पश्चात्स्तु हूयमानेषु सर्वेषामपि च वस्तुषु ॥ आविर्भविष्यत्यबलादूर्ध्वांडोल्लंघितेजसः
७८ ॥ चक्राभिधरथारूढा तडित्कोटिसमाकृतिः ॥ समस्तसौंदर्यमयी ललितापरमे
श्वरी ॥ ७९ ॥ उत्थाय सा महावह्नेः सिसृक्षोन्मुखशालिनी ॥ पुंरूपं स्वात्मनो देवी किं
चित्संपादयिष्यति ॥ ८० ॥ तदेव कामराजाख्यं परमं ब्रह्मसन्ततिः ॥ ताभ्यामुभाभ्यां विश्व
॥

॥ ल ॥ लित तज्ज्वालः प्रज्वलः शोभवानलः ॥ १६ ॥ एवं प्रणीय महिषा पूतमग्निं चिदात्मकं ॥
॥ ६४ ॥ तारकापुष्पनिकरैः परितः कुंडमर्चयेत् ॥ १७ ॥ तत्राग्नेरष्टधामूर्त्तिं संकल्प्याभ्यर्चयेच्छिवः ॥
षण्मूर्त्तिमपि चाभ्यर्च्य मध्ये मूर्त्तित्रयं तथा ॥ १८ ॥ एवं प्रकारं संस्कारमग्नेर्व्यधित शंभुरा
ट् ॥ जातवेदाः सप्तजिह्वः हव्यवाहन एव च ॥ १९ ॥ अश्वोदरश्च तुर्थः स्यादथ वैश्वानरः परः ॥
कौमारतेजाः षष्ठश्च विश्वदेवमुखा अपि ॥ २० ॥ भूत्यष्टौ मूर्त्तयो वह्नेरथ मूर्त्तिश्च षड्द्रवे ॥
सहस्रार्चिः स्वस्तिपूर्ण उत्तिष्ठपुरुषस्तथा ॥ २१ ॥ धूमव्यापी सप्तजिह्वो धनुर्धर इतीह षट् ॥
अथ वैश्वानरो त्रिष्ठपुरुषो च तृतीयकः ॥ २२ ॥ चित्पिंगल इति ख्यातः त्रिधा मूर्त्तिः स्तुशु ॥ श्री ॥
ष्मिणः ॥ अथ जिह्वां संविदन्नैः सप्तधाभ्यर्चयच्छिवः ॥ २३ ॥ हिरण्या कनका रक्ता कृष्णा चैव ॥ ६४ ॥
तु सुप्रभा ॥ अतिरक्ता च षष्ठी स्याद्बहुरूपा च सप्तमी ॥ २४ ॥ एवं संपूज्य जिह्वास्तु क्रमा

त्संविन्महाशुचेः ॥ पुष्कलावर्तको दर्वीं गृहीत्वा होममास्थितः ॥ २५ ॥ अथ समुद्रस्य सर्पि
रादाय सर्वशः ॥ महाजलहृदर्व्या च जुहावास्मिन् महानले ॥ २६ ॥ श्रीशंभुराजरंहस्वी मारु
तप्रेरितस्थितः ॥ पुष्कलावर्त्तकः सर्पिः समुद्रं सकलं पपौ ॥ २७ ॥ सहस्रधा लक्षधा च को
टिधा ज्ञानपावके ॥ धारा घृतस्य संपेतुः एकैकाः पर्वतोपमाः ॥ २८ ॥ पतंति स्माज्यधारा
स्तु प्रजज्वाल हुताशनः ॥ शतयोजनपर्यंतमूर्ध्वं ज्वाला प्रधाविता ॥ २९ ॥ उद्दिज्वालश्च
तुर्थांशं पुनस्तत्र समाक्षिपत ॥ पुनश्च पुष्कलावर्त दर्व्या दधिपयोनिधिं ॥ ३० ॥ जुहा
व श्रीमहाशंभुरत्यंतज्वलिते नले ॥ द्विशतं योजनानां च जज्वाल ज्ञानपावकः ॥ ३१ ॥ उद्दि
ज्वालश्चतुर्थांशं पुनः समिधमक्षिपत ॥ अथेक्षुसारजलधिं पुष्कलावर्त्तकः स्रुचा ॥ ३२ ॥
जुहाव तिप्रज्वलने श्रीशंभवसमीरणः ॥ तेन मत्त इवात्यर्थं नृत्यन्निव मुहुर्मुहुः ॥ ३३ ॥

॥ल॥ त्रिशतंयोजनानांचउर्ध्वंजज्वालचिच्छिखी॥ अथमध्यसमुद्रेचमहाजनदर्विभिः
॥६५॥ ॥३४॥आदायसकलंशंभुराजुहोज्ज्ञानपावके॥ तेनात्यंतमदोन्मत्तज्वालाशोभवच्छुष्म
णः॥३५॥चतुःशतंयोजनानांजज्वालोर्ध्वंहुताशनः॥ सर्वमप्युद्धिदाजालंसमादायहु
ताशने॥३६॥लवणांबुधिनिस्रोतसमस्तंस्व्यधारयत्॥ महावचनतस्तीव्रसंविदेह
व्यवाहने॥३७॥ततश्चिरचराकारोमहानासीद्भयंकरः॥ तेनभंडादिदैत्यानांचेतांसि
प्रचकंपिरे॥३८॥अथक्षीरसमुद्रंचमहावारिददर्विभिः॥ गृहीत्वासकलंशंभुरा
जुहोत्स्वर्गरेतसि॥३९॥महाहुहासधवलज्वालास्तेनाज्वलच्छिखी॥ घोरनिर्धूतनि ॥श्री॥
भिन्नस्फटिकाचलसन्निभः॥४०॥इत्थंसंधिषुसर्वेषुस्थलशेषेषुशंभुराट्॥ लोका ॥६५॥
न्नूजिहीर्षुःक्रमशःप्रावर्त्ततमहानले॥४१॥अथस्वेनैवसत्वेनधारयन्मेदिनीम

यकः॥ वायुरूपंसमास्थायधुनुतेस्मजगत्त्रयं॥९॥प्रवेपमानेत्रैलोक्येमहाशंभु
नभस्वता॥ विलोक्याज्ञाशिरादेवाःसमारब्धंमहामखं॥९॥ समहाशंभुरुत्थायवि
धून्वन्भुवनत्रयं॥ सप्तमंशुद्धजलधिंकुंडार्थंसमशोषयत्॥३०॥शोषितेसप्तमेसिं
धौशंभवानलतेजसा॥ आपातालगभीराभूदतिदीर्घमहाखनिः॥३१॥तांसाग
रखनिंदेवोहोमकुंडंप्रकल्पयत्॥ समस्तशुद्धिदांजालंचतुर्थाव्यभजत्पुनः॥३२॥
शुद्धिज्वालचतुर्थांशंराशीकृत्यमहाखने॥ सिंहासनमहाविद्यांजपन्हुंकारमा
स्थितः॥३३॥तेनघोरेणहुंकारशब्देनध्वांतविग्रहः॥ आमूलमाब्रह्मबिलंतत्र
जज्वालचिच्छिखी॥३४॥ तंसेविदनलंफालंक्रोधलोचनकोटरात्॥ ववामवाम
देवोयंसचलस्तोमहाखनिं॥३५॥अथसागरकुंडांतशुद्धिज्वालसमागतः॥जज्वा

॥ रु ॥ अप्सराश्चैव गंधर्वाश्चारणाश्चैव गुह्यकाः ॥ ५१ ॥ किंनरौघाः किंपुरुषाः साध्याश्च सि
॥ ६६ ॥ द्धाश्च खेचराः देवयोनिप्रभेदाश्च सर्वे संतोषशालिनः ॥ ५२ ॥ सुस्नाताः शुद्धवे
षाश्च नानाभूषणधारिणः ॥ बद्धांजलिपुटाः प्रीता हासफुल्लवदाननाः ॥ ५३ ॥ स्वैः स्वै
श्च वाहनोपेताः स्वैः स्वैरस्त्रैः परिच्छदैः ॥ भंडेन दूषितान्यंगान्यव मोक्तुं समुद्यताः ॥ ५४ ॥
अपतन् संविदे तेन हता कल्याणरेतसि ॥ आदित्या वसवो ह्यौ चंद्रस्तोपि तृगणा
स्तथा ॥ ५५ ॥ एकादश महारुद्राश्चंद्रार्धमुकुटोज्वलाः ॥ समं निजैः पारिषदैर्निजै
श्च गणनायकैः ॥ ५६ ॥ आपतन् छंभुनाथेन दीप्यमाना महानले ॥ सनंदसनका ॥ श्री ॥
द्यैश्च योगिभिः परमार्थिभिः ॥ ५७ ॥ भूतैश्च विविधैर्युक्तो विष्वक्सेनपुरोगमैः नि ॥ ६६ ॥
जैः पंचायुधैर्युक्तो लक्ष्म्या साकमनिंद्यया ॥ ५८ ॥ भूशक्त्या च स्फुरत्कांत्या सानंद

॥

स्थितिमांसलः ॥ सर्वैरनुचरैः सार्धं भगवानब्जलोचनः ॥ ५९ ॥ ज्ञानाग्निमभिनृत्यं
तं प्रविवेश जगन्मुने ॥ नंदी भृंगी महाकालप्रमुखैश्च गणेश्वरैः ॥ ६० ॥ आनीलकंध
रश्चंद्रचूडो गंगावतंसभृत् ॥ भोगिभूषितसर्वांगो भस्मोद्धूलितविग्रहः ॥ ६१ ॥ स्व
मूर्त्यांगस्वरूपेणा शंभुनाथेतदर्शितः ॥ प्रविवेश महाज्वालमुज्वलच्चिद्धुताशनं ॥
६२ ॥ ब्रह्मणा प्रेरिताः सर्वो अपि षट्षष्टिकोटयः ॥ पतन्तस्मरसंसग्या ज्वलद्रूपे कु
ताशने ॥ ६३ ॥ तारकाद्या दुरात्मानो भंडाद्याश्च महासुराः ॥ तत्कर्मैकविनिंदतः प्रम
त्ताजोषमास्थिताः ॥ ६४ ॥ अथ ब्रह्मा स्वसदृशैर्मरीचिप्रमुखैः सह ॥ ब्रह्मर्षिभिस्तापसें
द्रैश्च सत्यलोकनिवासिभिः ॥ ६५ ॥ सहसंतुष्टहृदयैर्युक्तः कमलविष्टरः ॥ स्मयमानमु
खांभोजः चतुर्मुखव्याकृतस्तुतिः ॥ ६६ ॥ सावित्र्या चैव गायत्र्या सरस्वत्या च संयुतः ॥ नि

॥ल॥ जवाहनहंसेन तत्प्रसूतैः खगैः सह ॥६७॥ प्रविवेश महाज्वालालंघिताशं हुताशनं
॥६७॥ एवंप्रकारतः सर्वान्मानसानोद्भिजानपि ॥६८॥ जरायुजानंडजांश्च श्वेदजांश्च शरीरिणः
जुहाव स स महाहोता श्रीमहाशंभुमांत्रिकः ॥६९॥ अवशिष्टाः केवलो वह्निर्हुताचापि भू
स्कराः ॥ अवशिष्टो महायागहोतावातोपि शंभवः ॥७०॥ अन्यत्सर्वं हुतं तत्र महतीं ज्ञान
शुष्मणि ॥ दर्शनानि च सर्वाणि सिद्धा सर्वाश्च भूतयः ॥७१॥ नानाविधानि चान्यानि म
तानि मलशालिनां ॥ हुतानि हुताशेस्मिन्नादिशांभववायुना ॥७२॥ इत्थं शंभुम
हेशेन हुतैः सर्वैश्च वस्तुभिः ॥ ऊर्ध्वं डिंभीति पर्यंतं ज्वलच्चित्रउषर्बुधः ॥७३॥ सच्चिं ॥श्री॥
त्यं होता परमः शंभुनाथोपि चिन्मयः ॥ पराशक्त्याखिलं हुत्वा स्वाकारं प्रत्यपद्य ॥६७॥
त ॥७४॥ संप्रसन्ननिजाकारो वायुरूपं परित्यजन ॥ श्री

थ ॥ वायुरूपात्समाजज्ञे शेषाघातू फणिपुंगवान् ॥९२॥ ते तेन रंहसा कृष्टाः स्फुर
त्फणिमणिप्रभाः ॥ द्योतयंत इवाकाशं बद्धांजलिपुटा मुदा ॥९३॥ तक्षककर्कोटक
मुखा पेतुस्तस्मिन्हुताशने ॥ इत्थं हुत्वा महानागानष्टौ दिक्करिणोपि च ॥९४॥ अजु
होच्छंभुनाथोयं मदक्लिन्नकरैः स्थलात् ॥ अन्यथा रावदिङ्नागा प्रीतांतःकरणा मुहुः
॥९५॥ रक्तपद्माकरमिव प्राविशन्हव्यवाहनं ॥ अथ भारतवर्षस्थमनुष्यान्राज
भिः सह ॥९६॥ भद्राश्वमुख्यवर्षस्थान्अप्यन्यानमितौजसः ॥ उत्तरांश्च कुरून्
प्राच्यान् उदीच्यान्मध्यदेशगान् ॥९७॥ नानादेशगतान्मर्त्यान्नानाद्वीपस
माश्रितान् ॥९८॥ नक्षत्रतारासंयुक्तान्विश्वनिर्भासकल्विषः ॥ तेजःशरीरिणो
देवान्जुहाव ज्वलितानले ॥९९॥ अथ शक्रादयो देवा दिक्पालाश्चाग्निसंयुताः ॥

ल ललिता परमेश्वरी ॥ ८४ चतुर्योजनविस्तारं दशयोजनमुन्नतं ॥ नवपर्वसमायु
६८ क्तं सर्वतेजोमयाकृति ॥ ८५ चतुर्वेदमहाचक्रं पुरुषार्थमहाहयं ॥ आनंदध्व
जसंयुक्तं तप्तकार्तस्वरोज्वलं ॥ ८६ सर्वाग्रे बिंदुपीठेन सहितं ब्रह्मचारिणा ॥ मेरु
प्रस्थानरूपाढ्यं चक्रराजरथोत्तमं ॥ ८७ आरूढा ललिता देवी स्वयं प्रथमसमुद्ग
ता ॥ पश्चात्स्रष्टुं समुद्युक्ता पुंरूपं स्वात्मनासृजत् ॥ ८८ स्वपुंरूपमयं देवं श्रीका
मेश्वरनामकं ॥ जगतामुपकाराय सृष्ट्यर्थं पतिमातनोत् ॥ ८९ तेनाखिलेष्टा भगव
ती श्रीकामेश्वरकामिना ॥ वांछामात्रेण चत्वारि महास्त्राण्यं विकासृजत् ॥ ९० ॥ श्री
पाशांकुशेक्षवधनुर्बाणायुधलसत्करा ॥ उद्यत्सहस्रचंडांशुप्रतिमानवपुर्द्युतिः ॥ ६८
॥ ९१ ॥ चंद्रार्धानद्धमुकुटा कुचभारेणमंदरा ॥ सदाषोडशवर्षीया स्मयमानमुखांबुजा ॥ ९२

सर्वाभरणशोभाढ्या सर्वसौंदर्यरूपिणी ॥ त्रैलोक्यममृताकारैरक्तपर्यंतीववीक्ष
णैः ॥ ९३ ॥ ददृशे शंभुनाथेन महाह्लादमहीयसा ॥ तेन नानाविधैः स्तोत्रैः वेदार्थैर्भाव
गर्वितैः ॥ ९४ स्तुता साललितादेवी नाथिता च मुहुर्मुहुः ॥ आत्मानं बहुधा कृत्या स्त्री
पुंरूपव्यवस्थया ॥ ९५ ॥ ब्रह्मविष्णुमहेशानशक्रादिसुररूपतः ॥ प्रचक्रमे भगव
ती ललिता परमेश्वरी ॥ ९६ ॥ कामेश्वरेण संयुक्ता परानंदस्वरूपिणी ॥ अथ सो
ए मात्मकाद्वामनेत्राद्दुत्पन्ना तथा रमा ॥ ९७ दक्षिणात्सूर्यरूपाच्च ललितायाविलोचनात् ॥
विष्णुश्चैव भवानी च द्वौ जन्मप्रापतुः शुभं ॥ अथ रुद्रश्च वाग्देवी ललिताया ललाटजात ॥
वह्निरूपाद भजतां संभवं कुंभसंभव ॥ ९९ ब्रह्मलक्ष्म्यौ तडित्कांती विष्णुगौर्यौ घन
द्युती ॥ शर्ववाग्देवते शुभ्रे सौंदर्ये च परस्परं ॥ १०० ॥ ता सां विनियमं चक्रुः भार्याले

॥ ल ॥ नचतेखिलाः ॥ लक्ष्मीर्विष्णोरभूज्जायाशर्वाणीशर्वभामिनी ॥ १ ॥ सरस्वती ब्रह्मण
॥ ६९ ॥ श्चपत्न्यभूत्कुंभसंभव ॥ सकलाश्चतान्देवाप्रयत्तान्वीक्ष्य चांबिका ॥ २ ॥ आदिदेशज
गत्सृष्टुंपातुंहर्तुंतथाजया ॥ कुमारीललितादेव्याः तत्प्राथमिकसंभवाः ॥ ३ ॥ स्वंस्वंस्था
नंपयुः प्राप्तनवीननिजविग्रहाः ॥ सर्वविश्वेनवमिवप्रारूढानंदनिर्भरं ॥ ४ ॥ ललिताप
रमेशान्याः प्रादुर्भावेनचाभवत् ॥ इतिश्रीब्रह्मांडपुराणेउत्तरभागेललितोपाख्याने
एकादशोध्यायः ॥ ११ ॥ अगस्त्योवाच ॥ अश्वाननमहाप्राज्ञमहायागः श्रुतोमया ॥ वि
श्वंललितयासृष्टुंश्रोतुमिच्छामिबोधय ॥ १ ॥ श्रीहयग्रीवउवाच ॥ आविर्भूयमहादेवी ॥ श्री ॥
तस्मादग्नेश्चिदात्मकात् ॥ ललितापरमेशानीससर्जसकलंजगत् ॥ २ ॥ केशपाशेनति ॥ ६९ ॥
मिरंससर्जजगतःपुरा ॥ त्रिभिर्नेत्रैः ससर्जत्रीन्रविसूर्यविभावसून् ॥ ३ ॥ - - - -

आजहावचिदग्निस्थोकारिकाष्टकपाठतः ॥ ७५ ॥ विश्वरूपिणिसर्वात्मेविश्वभू
तैकनायिके ॥ ललितेपरमेशानीसंविद्वह्नेःसमुद्भवे ॥ ७६ ॥ आनंदरूपिणिपरे
जगदानंददायिनि ॥ ललितापरमेशानीसंविद्वह्नेःसमुद्भवे ॥ ७७ ॥ ज्ञातृज्ञेयज्ञान
रूपेमहाज्ञानप्रकाशिनि ॥ ललितेपरमेशानीसंविद्वह्नेःसमुद्भवे ॥ ७८ ॥ लोकसं
हाररसिकेकालिकेभद्रकालिके ॥ ललितापरमेशानीसंविद्वह्नेःसमुद्भवे ॥ ७९ ॥ लो
कसंहाररसिकेमंगलेसर्वमंगले ॥ ललितेपरमेशानीसंविद्वह्नेःसमुद्भवे ॥ ८० ॥ विश्व
सृष्टिपराधीनेविश्वनाथेविसंकटे ॥ ललितापरमे० ॥ ८१ ॥ भंडाद्यैस्तारकाद्यैश्चपीडितानां
सदामुदे ॥ ललितापरमेशानीसंविद्वह्नेःसमुद्भवे ॥ ८२ ॥ संविद्वह्निकुंडताशेषसृष्टिसंप
दिताकृते ॥ ललि० ॥ ८३ ॥ इत्यष्टकारिकापाठंकुर्वाणेशंभुनायके ॥ आविर्बभूवचिद्वह्नेः

॥ल॥ मंतरिक्षंचदिशश्चसकलाअपि॥आनंदशक्तिंमनसापाशानदंष्ट्रेचबाहुना॥१२॥रोम
॥७०॥ वल्यासमस्ताश्चशेषादिफणिनायकान्॥करांगुलिभिःकामस्यबाणान्पंचससर्जसा
॥१३॥करांगुलिनखाग्रैश्चमत्स्यकूर्मादिकास्तनूः॥मत्स्यःकूर्मवराहश्चनारसिंहश्च
वामनः॥१४॥रामोरामश्चरामश्चश्रीकृष्णःकल्किनोदश॥प्रातःसंध्यांसायंसंध्यांपा
श्व णिरक्तत्विषासृजत्॥१५॥इंद्रश्चाग्निश्चमुखतःप्राणाद्वायुरजायत॥नाभ्याआसीदंतरि
ध्यां= क्षंशीर्ष्णोद्यौःसमवर्तत॥१६॥पद्भ्यांभूमिश्चजनिताधर्माधर्मौचविश्वयात्॥स्मितेन
परमानंदंससर्जेचारुचक्षुषा॥१७॥पुरुषंनाभिकुंडेनप्रकृतिंनाभिमूलतः॥महत्तत्त्वं
नितंबेनससर्जजगदंबिका॥१८॥उरुमूलादहंकारंउन्मत्ताश्चैवजानुतः॥जंघायाः
पंचभूतानिजगन्मातुश्चजज्ञिरे॥१९॥गुल्फेनससृजेलब्धीन्पार्ष्णिनाचक्रवालकं॥

पादांबुजतलेनापिरसातलमथासृजत्॥२०॥रोमजालेजगन्मातुर्यावद्दंतिघटोद्भव
गावोहजज्ञिरेतस्मात्तस्माज्जाताअजावयः॥२१॥ब्राह्मणामुखतस्तस्याःसंग्रामादी
॥ सरोचिषः॥ततस्तेमुखसंजाताविद्यातंत्राःप्रकीर्तिताः॥२२॥बाहुदेशात्समुत्पन्नाः
क्षत्रियाःक्षत्रजीविनः॥अथतस्माज्जगन्मातुरूरुजावणिजोभवन्॥२३॥अतस्तेला
भसंपन्नाकृतेरूरुद्वहासने॥मध्यांशूद्राअजायंतातस्याःकामेशयोषितः॥२४॥अत
स्तेपादसंस्थारेद्विजशुश्रूषकाःस्मृताः॥उद्भूतारोमकूपेभ्योललितायामहोजसः॥२५॥
उद्भिज्जानांसमस्तानांसृष्टिःकुंभसमुद्भव॥स्वेदेसृष्टिःस्वेदजातानमध्याज्जरायवी
पुनः॥२६॥अंडजीचगुल्फपिंडाभ्यांसृष्टिस्तस्याःसमुद्भूता॥नासत्योनासिकाभागात्॥
असृजेतांमहोजसा॥२७॥कांतिर्दंतप्रभायाश्चपुष्टिरानंदसंपदः॥शांतिःस्तस्यांगेदृत

॥ल॥ लात्संप्रवृत्ताघटोद्भव ॥ २८ ॥ हृदयाच्च पराशक्तेः सालंकाराशशिप्रभा समस्तमा
॥७३॥ तृकारूपाबालानातत्रियरूपिणी ॥ २९ ॥ बुद्धेश्च ललितादेव्याः श्यामलापरमेश्वरी
वीणाश्रुकलसत्पाणीजातासंगीतयोगिनी ॥ ३० ॥ अहंकारात्समुत्पन्नामेघश्याम
लविग्रहा ॥ महावार्तालिकादेवीपोत्रीवक्त्रसमुज्वला ॥ ३१ ॥ स्मिताद्धिघ्नेश्वरोजातोमद
क्लिन्नकटस्थलः ॥ सिध्धलक्ष्म्यांकितोत्संगोबालार्कसदृशद्युतिः ॥ ३२ ॥ तस्यास्तुचक्रीन
लयात्षडाम्नायाः समुद्भूताः ॥ क्रीडाविशेषाद्बालाभूदक्षरत्रितयात्मिका ॥ ३३ ॥ संपत्करी
नामदेवीजातादेव्यंकुशायुधात् ॥ जातापाशायुधाद्देव्याललितायाहयासना ॥ ३४ ॥ तालु ॥श्री॥
देशात्समुत्पन्नादेव्याश्रीनकुलेश्वरी ॥ रश्मिमालाचसर्वापिगायत्रीत्रिपदावधि ॥ ३५ ॥ त ॥७३॥
स्यास्तुकुंडलीशक्तेःरुत्पन्नाःललितोजसः ॥ देव्यादेशेश्चवयोन्युथानानातिर्यग्गणाअपि ॥ ३६ ॥

फालमुक्ताकलापेनतारकासंसदोसृजत् ॥ पालीवतंसमुक्ताभिः प्रससर्जनवग्रहान्
४ ॥ आज्ञाचक्रंसमस्तंचदंडनीतिंप्रधीयसीं ॥ विश्वचक्रोपकारायभ्रूवल्यासृजदंवि
का ॥ ५ ॥ निश्वासमारुतेवेदान्पदंसामयजूस्तथा ॥ अथर्वयांमहामंत्रंमन्त्रिस्तास्व
नचासृजत् ॥ ६ ॥ काव्यनाट्याद्यलंकारान्नसृजन्मधुरोक्तिभिः ॥ सरस्वतीजिह्वया
चससर्जसकलप्रसूः ॥ ७ ॥ चुबुकेनचकोशाक्षींविंदांगानिससर्जषट् ॥ मीमांसान्या
यतंत्रंचपुराणांधर्मसंहितां ॥ ८ ॥ कंठोर्ध्वरेखातंत्रेयाससर्जसकलांबिका ॥ आ
युर्वेदंधनुर्वेदंकंठमध्यमरेखया ॥ ९ ॥ गांधर्वशिल्पिशास्त्रंचकर्णोधःस्थितरे
खया ॥ चतुःषष्टिश्चविद्यानांकंठकूपभुवासृजत् ॥ १० ॥ छंदांसिचांगदेशेषुदोर्मू
लेमदनागमं ॥ अहोकुलमहीध्रश्चस्तनाभ्यामसृजत्प्रभुः ॥ ११ ॥ पार्श्वाभ्या

॥ ल ॥ महाजनतपोलोकान्सत्यलोकं च सासृजत् ॥ त्रैलोक्यमोहने चक्रे या प्रोक्ता अणिमा
॥ ७२ ॥ दयः ॥ ४५ ॥ ब्राह्म्यादयः समुद्भाश्च तालुमूले ससर्ज सा ॥ तदधिष्ठानदेवीं च त्रिपुरां स्वां
शतोऽसृजत् ॥ ४६ ॥ ताद्व्यः प्रकटाभिख्या वह्नियुत्सन्ने महद्युतौ ॥ देवी चक्ररथे पर्वत
व्रमं समुपाश्रिताः ॥ ४७ ॥ सर्वाशापूरणाभिख्यं चक्रं सृष्ट्वा च तद्गताः ॥ कामाकर्षिणिमु
ख्याश्च गुप्ताख्या असृजत्पुरा ॥ ४८ ॥ स्वाधिष्ठानप्रदेशेन सुधासूतीकलामयी ॥ तद
धिष्ठानदेवीश्च त्रिपुरेशीमथासृजत् ॥ ४९ ॥ ताश्च चक्ररथस्यास्य देवी गुप्ततराभिधाः
पर्वाष्टकमुपाश्रिताः ॥ अथ सा मणिपूरेण सर्वसंक्षोभणाभिधं ॥ ५० ॥ सृष्ट्वा चक्रं त ॥ श्री ॥
द्गताश्च देव्यो गुप्ततराभिधाः ॥ तदधिष्ठानदेवीं च ससर्ज पुरसुंदरी ॥ ५१ ॥ ताश्च देदी ॥ ७२ ॥
प्यमाना भास्स प्रमं पर्व संश्रिताः ॥ चक्रराजरथेंद्रस्य ललिताधिष्ठितस्य च ॥ ५२ ॥

अनाहतमहाचक्राल्ललितायाः समुद्धृतं ॥ सर्वसौभाग्यदं नाम तस्या देव्यश्चतुर्दश
॥ ५३ ॥ संप्रदायाभिधाः सर्वास्तदधिष्ठानदेवताः ॥ पुरवासिन्यभिहिताः ताश्च देवी
समप्रभाः ॥ ५४ ॥ चक्रराजरथेंद्रस्य षष्ठपर्व समाश्रिताः ॥ आज्ञाचक्रान्महेशान्या
श्चक्रं सर्वार्थसाधकं ॥ ५५ ॥ उद्धृतं तद्गता देव्यो कुलोत्तीर्णोत्कृताभिधाः ॥ तदधिष्ठा
नदेवी च त्रिपुराश्रीः समीरिता ॥ ५६ ॥ ताश्च स्फुरद्दशाकाभाश्चक्रराजरथोत्तमे ॥
पंचमे पर्व संरूढा ललितादेवताज्ञया ॥ ५७ ॥ विशुद्धचक्रादीशान्या सर्वरक्षाकरा
भिधं ॥ चक्रं समुद्धृतं तस्थाः देवता अपि तद्भवाः ॥ ५८ ॥ निगर्भयोगिनीनाम्ना प्र
थिताः प्रकटौजसः ॥ तदधिष्ठानदेवी च प्रोक्ता त्रिपुरमालिनी ॥ ५९ ॥ ताः सर्वाः प
रमेशान्याः भ्रूसंज्ञाया अनुग्रहात् ॥ चतुर्थपर्व संरूढा चक्रराजरथोत्तमे ॥ ६० ॥

॥ल॥ अथश्रीललितादेव्याब्रह्मरंध्रात्समुद्भूतं॥ सर्वरोगहरंचक्रंतत्स्थादेव्यश्चतद्भवाः
॥७२॥ ६१ रहस्ययोगिनीनाम्नाप्रथितावागधीश्वराः॥ तदधिष्ठानदेवीचत्रिपुरासिध्धा
प्रकीर्त्तिताः॥६२॥ ताश्चदेव्याज्ञयासर्वाश्चक्रराजरथोत्तमे॥ तृतीयंपर्वसंरूढाबा
लार्कसदृशत्विषः॥६३॥ द्वादशांतमहाचक्राल्ललितायाःसमुद्भूतं॥ सर्वसिद्धिमयं
चक्रंतत्स्थादेव्यश्चतद्भवाः॥६४॥ अतिपूर्वरहस्याख्याःकामेशीप्रमुखाश्चताः॥
तदधिष्ठानदेवीचत्रिपुरांबाप्रकीर्त्तिता॥६५॥ ताश्चदेव्याज्ञयासर्वाज्वलत्कालान
लप्रभाः॥ चक्रराजरथेंद्रस्यद्वितीयंपर्वसंश्रिताः॥६६॥ अथश्रीललितादेव्याम ॥श्री॥
हानंदधेः॥ उद्भूतंप्रथमंचक्रंसर्वानंदमयात्मयं॥६७॥ बिंदुपीठंचतन्नामनामश्री ॥७२॥
पीठमित्यपि॥ महापीठंचतन्नामतत्रस्थांदेवतांश्रृणु॥६८॥ चक्रराजरथेंद्रस्यम

उत्पन्नापरमेशान्याःत्वग्धातोःकुंभसंभव॥ रक्तधातोःप्राणशक्तिर्मांसधातोर्म
हाबलं॥३७॥ मेदसोललितादेव्याभूतिसन्ततिरेवच॥ अस्थचास्याःसमुत्पन्नान्यं
कुशंप्रमुखान्यपि॥३८॥ महायुधानिदिव्यानिजगतामभियुक्तये॥ यज्ञविद्यागुह्य
विद्यास्वात्मविद्याचमज्जतः॥३९॥ तस्माच्चरजतःशुक्रादमृतंचैववारुणि॥ अंग
सौंदर्यतोलक्ष्मीकटाक्षेणामनोभवन्॥४०॥ पादेनपादगुल्फेनजंघयोर्जानुना
पिच॥ ऊरुणाचोरुमूलेननितंबाज्जघनेनच॥४१॥ मध्येनस्तनयुग्मेनबाहुभ्या
मंसदेशतः॥ कर्णेनशिरसाचैवयथासंख्यंससर्जसा॥४२॥ महापाताललोकंलो
कंतथापातालमप्यथ॥ रसातलाख्यंलोकंचमहातलमथोमुने॥४३॥ सुतलंच
महाभागवितलंचातलंतथा॥ भूर्लोकंचभुवर्लोकंस्वर्लोकंतथैवच॥४४

॥ल॥ न्योरुतीक्ष्णायुधमंडिताः ॥ एवं शक्तिमयं चक्रं कल्पयित्वा रथोत्तमे ॥ ७६ ॥ भंडासुर
॥७४॥ वधार्थाय प्रवृत्तां परमेश्वरीं ॥ ७७ ॥ रक्षंत्यः परशस्त्रेभ्यः सावधाना प्रकीर्त्तिताः उवा
चनिजभर्त्तारं कामेश्वरमृषीश्वर ॥ श्रीललितोवाच ॥ आवामुत्पादितौ नाथ भंडासुर
वधाय वै ॥ ७९ ॥ महायागकृतोत्साहे प्रविष्टे श्वानलं स्मरे ॥ तस्मात्तेषां हितं कार्यं हंत
व्यो भंडदानवः ॥ ८० ॥ सृज त्वमपि मत्संगात् शिवचक्रं महोदयं ॥ इत्युक्तो ललितादे
व्या शिवः काममहेश्वरः ॥ ८१ ॥ मुखहुंकारमात्रेण नाथचक्रमथासृजत् ॥ तस्य दिव्यौ
घसिद्धौघमानवौघप्रभेदतः ॥ ८२ ॥ त्रिधा विभक्तं तज्ज्ञेयं तत्रस्था नाथा महौजसः ॥ का ॥श्री॥
मेश्वरसमाकारा नानाशस्त्रज्वलत्कराः ॥ ८३ ॥ प्रोक्ताः कामेशमित्रेशप्रमुखा दैत्य ॥७४॥
मर्दनाः ॥ संप्रदायकरा देव्यास्त्रयोविंशतिरीरिताः ॥ ८४ ॥ श्रीकामेश्वरनाथस्य भ्रू

संज्ञा प्राप्यते मुदा ॥ सर्वानंदमयाख्यस्य पश्चात्स्थानमुपाश्रिताः ॥ ८५ ॥ बुध्यहंकार
जनिते ये प्रोक्ते देवते पुरा ॥ श्यामलाकोलमुख्यौ हि तयोराद्यां तु देवतां ॥ ८६ ॥ प्रधानमं
त्रस्थानीयां अभिषिच्य स्मधारसैः ॥ शक्तिराज्यस्य सर्वस्य भर्त्री सा ललिताकरोत् ॥ ८७
प्रधानत्वद्योतनाय स्वहस्तांगुलिसंस्थितं ॥ मुद्रांगुलीयकं प्रादात् तस्याश्च नतास्तदग्र
हीत् ॥ ८८ ॥ अथ तृतीया कोलास्यात्तु भुजार्जितपराक्रमा ॥ या स्थिता ललि दंडनाथामक
ल्पयत् ॥ ८९ ॥ दंडनाथाभिषेकं च कृत्वा तीर्थैः पयोधि— ॥ भूयुगात्मुसलं शीरम् धृत्या
स्याददौ च सा ॥ ९० ॥ तस्मात्साशक्तिराज्येस्मिन् आज्ञाचक्रप्रवर्त्तिनी ॥ दुष्टसंहारिणी
शिष्टपालिनी परिकीर्त्तिता ॥ ९१ ॥ मंत्रिनाथा दंडनाथदेव्यौ संग्रामहेतवे ॥ चक्रराजरथा
त्स्वीयात् तुल्याय रथयुग्मकं ॥ ९२ ॥ ददौ च ललितादेवी भंडासुरवधार्थिनी ॥ ते उभे रथमारू

॥ल॥ डेयथास्वरथपर्वेसु॥ स्थापयामास तु सुहृष्टाः शक्तीस्वयमुदायुधाः॥९३॥ तयोश्चरथयोर्नी
॥७५॥ म प्रब्रवीमि मुने शृणु॥९४॥ किरिचक्रे दंडनाथा निवासरथमुच्यते॥[illegible]॥ गेयचक्रमिति प्रो
क्तो मंत्रिण्या रक्तमहारथः॥९५॥ एवं भंडासुरवधे समुद्युक्ता महेश्वरी॥ विधानत्रितयं कृ
त्वा पुनरेव व्यचारयत्॥९६॥ सदुरात्मा महावीर्यो दुर्जयश्च सुरासुरैः॥ तस्य निर्दहनार्थी
य स्वजामी बहु योगिनीः॥९७॥ इति कृत्वा मतिं देवी ललिता परमेश्वरी॥ भंडासुरम
ति क्रुद्धा हुंकारं वितता नह॥९८॥ तस्माद्धुंकारनिनदाद्योगिन्यः षष्टि कोटयः॥ चतुःष
ष्ट्यधिका जातास्तावंतो भैरवा अपि॥९९॥ परार्धसंख्यातिक्रांता नानावेषविभूषणाः॥ श्री
ज्वलद्भीमप्रहरणा दैत्यरक्तपिपासिताः॥१००॥ अनेकाः शक्तयो जाताः स्फुरद्रत्न ॥७५॥
विमानगाः॥ तासां महायोगिनीनां मुहुर्डैरट्टहासजैः॥१०१॥ घोषैः स्तुमुलितं विश्वं

ध्यमं पर्वसंस्थिता॥ एवं नवविधे चक्रे भंडासुरजयार्थिनी॥६९॥ परापररहस्या
ख्या स्वयमेवानुवर्त्तते॥ महाचक्रेश्वरी चैव महात्रिपुरसुंदरी॥७०॥ पुनस्तत्हृद
याकाशात् सूक्ष्मा मार्तंडभैरवे॥ तस्य बिंबात्समाकृष्टं तिथिचक्रं महोदयं॥७१॥ त
तः षोडशसंख्याताः स्वर्णदीप्तासमुद्गताः॥ तेभ्यश्चाभ्युद्गता नित्या प्रकाशप्रमु
खा मुने॥७२॥ ताश्च देवीसमाकारा देव्या एवांशमाश्रिताः॥ तिथिनित्या समाख्या
तास्तत्तिथ्यभिमानकाः॥७३॥ सर्वानंदमयाख्यस्य परितो दश पंच च॥ स्थानाना
श्रित्य वर्त्तंते रथमध्यमपर्वणः॥७४॥ अंगदेव्यश्च षट् तस्य हृदयाद्या शिरसोपि च॥ शि
खायाः कवचाच्चैव ढक्कयान्निजकायुधात्॥७५॥ उत्पादिता महाभागज्वलत्का
लाग्नितेजसः॥ चतुर्दिक्षु च मौलौ च वह्नीशासुरवायुषु॥७६॥ षट्सु स्थानेषु वासि

॥ल॥ डाश्ववाद्यभेदास्तथापरे ॥ ६ ध्वानुशक्तिसेनाभिराहूतासमरोद्यमे ॥ ललितापरमेशान्या
॥७६॥ अंकुशास्त्रात्समुद्गता ॥ संपत्करीनामदेवीचचालसहशक्तिभिः ॥ ७ ॥ अनेककोटिमातंग
तुरंगरथपंक्तिभिः ॥ सेवितातरुणादित्यपाटलासंपदीश्वरी ॥ ८ ॥ मत्तमुद्दंडसंग्रामरसि
कंशैलसंनिभं ॥ रणकोलाहलंनामसारुरोहमतंगजं ॥ ९ ॥ तामन्वगाययौसेनामहतीघो
रराविणी ॥ लोलाभिःकेतुमालाभिरुल्लिखंतीघनाह्वनात् ॥ १० ॥ तस्यांसंपन्नाथायापी श्व
नस्तनभसंकट ॥ कंकटोघनसन्नाहोरुरुचेवक्षसिस्थितः ॥ ११ ॥ कंपमानाखड्ग
लताव्यरुचेरुचितत्करे ॥ कुटिलाकालनाथस्यभ्रुकुटीवभयंकरा ॥ १२ ॥ उत्पातवा ॥श्री॥
तसंपातचालिताइवपर्वताः ॥ तामन्वगाययुःकोटीसंख्याताःकुंजरोत्तमाः ॥ १३ ॥ ॥७६॥
अथश्रीललितादेव्याश्रीपाशायुधसंभवा ॥ अतित्वरितविक्रांतिरश्वारूढाचलत्

पुरः ॥ १४ ॥ तयासहहयप्रायंसैन्यंहेषातरंगितं ॥ व्यचरत्करकुद्दालनिर्दलितमहीतलं
१५ ॥ वनायुजाश्चकांबोजाआरट्टसिंधुदेशजाः ॥ टंकणापार्वतीयाश्चपारसीकास्त
रा थापरे ॥ १६ ॥ आजानेयाघट्टपुष्टरुह्वाकालवंतिजाः ॥ वाल्हीकेयावनोद्भूतागांधर्वाश्चा
परेहयाः ॥ १७ ॥ प्राक्कुदेशजाश्चकैराताःप्रांतदेशोद्भवाअपि ॥ विनीतासाधुयोद्धारो
योगिन्यःस्थितचेतसः ॥ १८ ॥ स्वामीचित्तपरिज्ञाताबहुयुद्धसहिष्णवः ॥ लक्षण्ये
र्बहुभिर्युक्ताजितक्रोधाजितश्रमाः ॥ १९ ॥ पंचधाराक्रमशिक्ष्याढ्याविनीतार्थपुल्ला
यिताः ॥ फालेशुक्तिश्रियायुक्ताःश्वेतशुक्तिसमन्विताः ॥ २० ॥ देवपन्नंदेवमणिंदेव
स्वस्तिकमेवच ॥ अर्थस्वस्तिकशुक्तिंचपुस्वरंपुष्पगंधिकं ॥ २१ ॥ एतानिशुभल
क्ष्याणिजयराज्यप्रदानिच ॥ वहंतोवातजवनावाजिनस्तांसमन्वयुः ॥ २२ ॥

॥ल॥ अपराजितनामानंअतितेजस्विनंबलं॥अत्यंतोतुंगवर्ष्माणंकलिताविलसत्मु
॥७७॥ खं॥२३॥पार्श्वद्वयेपिपरितःस्फुरत्केसरमंडलं॥स्थूलबालधिविक्षेपक्षिप्यमानप
योधरं॥२४॥जंघाकांडसमुन्नद्धमणिकिंकिणिभास्वरं॥वादयंतमिवोच्चैर्खुरनि
ष्टुरघट्टनैः॥२५॥भूमंडलीमहावाद्यंविजयस्यसमृद्धये॥हेषमानंप्रतिमुहुःसंदर्शित
गतिक्रमं॥२६॥आलोलचामरव्याजात्वहंतंपक्षतीइव॥भांडैर्मनोहरैर्युक्तंघ
र्घरीजालमंडितं॥२७॥हेषाघोषस्यकपटात्हुंकुर्वाणमिवासुरान्॥अश्वारूढा
महादेवीसमारूढाहयंययौ॥२८॥चतुर्भिर्बाहुभिःपाशंअंकुशंवेत्रमेवच॥तयप ॥श्री
ल्लांचदधतीबाहुविक्रमशालिनी॥२९॥तरुणादित्यसंकाशाज्वलत्कांतितरंगिणी ॥७७॥
संचचालहयारूढानर्त्तयंतीववाजिनं॥३०॥अथश्रीदंडनाथायानिर्याणपटहे

घोरनिर्घातभीषणैः॥ताभिन्यःसमस्ताश्चदेवीचक्ररथस्थिता॥२॥बद्धांजलिपुटानेमु
र्निरुद्धहरिदंतराः॥तन्महायोगिनीचक्रमालोक्यललितेश्वरी॥३॥अत्यंतहृष्टहृद
यामृशमुत्साहमाश्रिता॥४॥इतिश्रीब्रह्मांडपुराणेललितारखंडेउत्तरभागेललितास
ष्टिकथनंनामद्वादशोध्यायः॥१२॥अगस्त्योवाच॥अथसाजगतांमाताललितापर
मेश्वरी॥त्रैलोक्यकंटकंभंडंदैत्यजेतुमुपक्रमे॥१॥कृत्वामाहेंद्रिवृकाकारंसन्नाभोराश्रय
रत्तथा॥प्रभूतमर्दलध्वानैःपूर्णयामासरंबरं॥२॥मृदंगमुरजाश्चैवपटहाढक्कुलीगणाः
सेलुवाझल्लरीसंघाहुडुकाहुडुकाघराः॥३॥आणकाःपटहाश्चैवगोमुखाश्चार्ध
चंद्रकाः॥यवमध्यामुष्टिमध्यामडुवोडिंडिमाअपि॥४॥झरझराश्चचर्ल्लीतालाश्च
क्यालिंग्याप्रभेदकाः॥ऊर्ध्वेश्चैवस्तुतेपोह्वानिःसाणावर्वराःपरे॥५॥हुंकाराकाकतुं

॥ल॥ दे भूयस्तत्कोटमणिरोचिषा ॥ ३८ ॥ वज्रप्रभायुधगणाच्छायापूरितदिङ्मुखाः ॥
॥७८॥ तालदंष्ट्रा शतविधाक्रोडमुख्या बलेचनू ॥ ३९ ॥ चंडोच्चंडादयस्तीव्राभैरवा स्थूल
पाणयः ॥ ज्वलत्कशपिशंगाभास्तडित्क्रूरदिङ्मुखाः ॥ ४० ॥ दहंत्यइवदैत्यौघान्सु
तीक्ष्णैरीक्षणवह्निभिः ॥ प्रचेलुर्दंडनाथायाः सेनानासीरयायिनः ॥ ४१ ॥ अथ पोत्रीमु
खीदेवीसमानाकृत्तिभूषया ॥ तत्समानायुधकरास्तत्समानस्ववाहना ॥ ४२ ॥
तीक्ष्णदंष्ट्राविनिस्यूतवह्निधूमायितांबराः ॥ तमालश्यामलाकाराः कपिलाक्रूरलो
चनाः ॥ ४३ ॥ सहस्रं महिषारूढास्तद्दिव्यसूकराननाः ॥ अथ श्रीदंडनाथा च किरि ॥श्री॥
चक्ररथोत्तमात् ॥ ४४ ॥ अवरुह्य महासिंहं आरुरोह स्ववाहनं ॥ वज्रघोषमिति ॥७८॥
ख्यातं धुतकेसरमंडलं ॥ ४५ ॥ व्यात्तास्यं विकटाकारं विशंकटविलोचनं ॥ दं

ष्ट्राकटकटत्कारबधिरीकृतदिङ्मुखं ॥ ४६ ॥ आदिकूर्मकठोरास्थिकर्परप्रतिमैर्न
खैः ॥ वीक्षंतमिव भूचक्रं आपातालनिमज्जिभिः ॥ ४७ ॥ योजनत्रयमुत्तुंगवेगा
दुद्धूतवालधिं ॥ सिंहवाहनमारुह्य व्यचरद्दंडनायिका ॥ ४८ ॥ तस्यामक्रूरसं
हारप्रवृत्तायां ज्वलत्क्रुधि ॥ उद्वेगं बहुलं प्राप वकुलं सचराचरं ॥ ४९ ॥ किम
सौ भस्मतिरुषा विश्वमद्यैव पोत्रिणी ॥ किं वा मुसलघातेन भूमिं द्वेधा करिष्य
ति ॥ ५० ॥ अथवा हलनिर्घातैः क्षोभयिष्यति वारिधीन् ॥ इति त्रस्तमनाः सर्वे
गगने नाकिनां गणाः ॥ ५१ ॥ दूराद्दूरविमानाश्च सत्रासं तामुदैक्षत ॥ ववंदिरे च
ते देवा बद्धांजलिपुटांचिताः ॥ ५२ ॥ मुहुर्द्वादशनामानि कीर्तयंतो नभस्तले
अगस्त्योवाच ॥ कानिद्वादशनामानि तस्यादेव्या वद प्रभो ॥ ५३ ॥ अश्वानन

॥ल॥ ॥७०॥ महाप्राज्ञयेषुमेकौकैंतुमर्हत ॥ हयग्रीव उवाच ॥ शृणु द्वादशनामानि तस्या दे
व्या घटोद्भव ॥ ९४ येषामाकर्णमात्रेण प्रसन्ना सा भविष्यति पंचमी दंडना
था च संकेता समयेश्वरी ॥ ९५ तथा समयसंकेता वाराही पोत्रिणी तथा ॥ वार्ता
ली च महासेनाप्याज्ञाचक्रेश्वरी तथा ॥ ९६ अरिघ्नी चेति संप्रोक्तं नाम द्वादशकं
मुने ॥ नामद्वादशकाभिख्य वज्रपंजरमध्यगं ॥ ९७ संकटे दुःखमाप्नोति न कदा
चेव मानवः ॥ एतैर्नामभिरभ्यर्थ्या संकेतां वहु तुष्टुवुः ॥ ९८ तेषामनुग्रहार्थाय प्र
चचाल च सा पुनः ॥ अथ संगीतयोगिन्यो राजमंत्रीपदस्पृशः ॥ ९९ निर्याणसूच श्री
नकरी दे वीध्वानकाहलीं ॥ शृंगारप्रायभूषाणां शार्दूलसामलत्विषां ॥ १० ॥७०॥
वीणासनाथपाणीनां शक्तीनां निर्ययौ बलं ॥ काश्चिद्गायंति नृत्यंति मत्तकोकि
च्य

अथ श्रीदंडनाथाया निर्याणपटहध्वनिः ॥ उद्दंडसिंधुनिर्घोषश्चकार बधिरं
जगत् ॥ २१ वज्रबाणैकवीरैश्च भिंदंत्यः ककुभो दश अत्यु द्दंडभुजोष्मायाः
शक्तयः काश्चिदुत्थिताः ॥ २२ काश्चिच्छ्रीदंडनाथायाः से नासीरसंगताः ख ना
ड्गफलकमादाय पुप्लुवुश्चंडशक्तयः ॥ २३ अत्यंतसैन्यसंबाधं वेत्रसंताडना
शनैः ॥ निवारयंत्यो वेत्रिण्यो व्यचरंश्छक्तयः शतं ॥ २४ अथ तुंगध्वजश्रेणीम
हिषांकामृगांकिताः ॥ सिंहांकाश्चैव विभ्रायाश्शक्तयो ह्यचलन्पुरः ॥ २५ तदनु
श्रीदंडनाथाश्वेतच्छत्रकदंबकैः ॥ स्फुरत्कराः प्रचलिताः शक्तयः काश्चिदुद्ध
ताः ॥ २६ दंडनाथाविनिर्याणे संख्यातीतसितप्रभैः ॥ छत्रैर्गगनमार्गे निःसं
ख्याशशिमंडलं ॥ २७ अन्योन्यसक्तैर्धवलैश्छत्रैरंतर्घनीभवत् ॥ तिमिरंनुनु

॥ल॥ या ॥ ६९ ॥ निर्जगाम धनश्यामा श्यामला मंत्रनायिका ॥ तां तुष्टुवुः षोडशभिर्नामभिर्नीक
॥८०॥ वासिनः ॥ ७० ॥ तानि षोडश नामानि समाकर्णय कुंभज ॥ संगीतयोगिनी श्यामा श्या
मला मंत्रनायिका ॥ ७१ ॥ मंत्रिणी सचिवेशानी प्रधानेशी शुकप्रिया ॥ वीणावती वैणि
की च मुद्रिणी प्रियकप्रिया ॥ ७२ ॥ नीपप्रिया कदंबेशी कदंबवनवासिनी ॥ सदाम
दा च नामानि षोडशैतानि कुंभज ॥ ७३ ॥ एतैर्यः सचिवेशानीं सकृत्स्तौति शरीरवा
न् ॥ तस्य त्रैलोक्यमखिलं वशे तिष्ठत्यसंशयः ॥ ७४ ॥ मंत्रिनाथा यत्र यत्र कटाक्षं वि
किरत्यसौ ॥ तत्र तत्र गता संख्यं शक्तिसैन्यं पतत्यलं ॥ ७५ ॥ ललिता परमेशान्या ॥ श्री
राज्यचर्चा तु यावती ॥ शक्तीनामपि च चर्या सा सर्वा तत्र हि शंवदा ॥ ७६ ॥ अथ संगी ॥८०॥
तयोगिन्याः करस्थशुकपोतकात् ॥ निर्जगाम धनुर्वेदो वहन् सज्यं शरासनं ॥ ७७ ॥

चतुर्बाहुर्युतो वीरः स्त्रीशिरास्त्रिविलोचनः ॥ नमस्कृत्य महेशानीमिदमाह सभ
क्तिमान् ॥ ७८ ॥ देवि भंडासुरेंद्रस्य युद्धाय त्वं प्रवर्तसे ॥ अतस्त्वमया सार्धं कर्त
व्यं मंत्रिनायिके ॥ ७९ ॥ चित्रजीवमिदं नाम्ना कोदंडं रत्नमहत्तरं ॥ गृहाण जगताम्बं
ब दानवानां निबर्हणे ॥ ८० ॥ इमौ चाक्षयबाणाढ्यौ तूणीरौ स्वर्णचित्रकौ ॥ गृहा
ण दैत्यनाशाय महानुग्रहहेतवे ॥ ८१ ॥ इति प्रणम्य शिरसा धनुर्वेदेन भक्तितः ॥ अ
र्पितं चापतूणीरं जग्राह प्रियकप्रिया ॥ ८२ ॥ चित्रजीवमहाचापमादाय च शुक
प्रिया ॥ विस्फारं जनयामास मौर्वीमुद्घाट्य भूरिशः ॥ ८३ ॥ संगीतयोगिनी चाप
ध्वनिनापूरितं जगत् ॥ नाकालयानां च मनो नयनानंदसंपदा ॥ ८४ ॥ यंत्रिणी तंत्री
णी चेति द्वे तस्याः परिचारिके ॥ शुके वीणां च शिरसा वहंत्यौ पर्यचेरतुः ॥ ८५ ॥

॥ल॥ आलोलवलयक्वाणवर्धिष्णुगुणनिस्वनं ॥ धारयंती धनुः शामा चकारिमनोज्वरं ॥८६॥
॥८३॥ चित्रजीवशरासनभूषिता गीतयोगिनी ॥ कादंबिनीव रुरुचे केदलच्चक्रकार्मुका
॥८७॥ कालीकटाक्षवर्त्तीस्योन्मृत्यलजगसन्निभः ॥ उल्लसन्दक्षिणे पाणौ विल
लोलसशिलीमुखः ॥८८॥ गेयचक्ररथारूढां तां श्यौपेञ्चनिषेविरे ॥ तद्धचाम
लशोभाढ्या देव्या बाणधनुर्धराः ॥८९॥ सहस्राक्षौहिणीसंख्यास्ती प्रवे
गामदालसाः ॥ आपूरयंत्यककुभः सर्वे किलकिलारवैः ॥९०॥ अथ चक्र
राजरथं नायिकाश्रिता ॥ ज्वलितांकुशाफणिसमानपाशभृतुं क्रनिक्कणद्दल ॥श्री॥
यमेक्षवंधनुर्दधती मदीप्तकुसुमेषुपंचका ॥९१॥ उदयत्सहस्रमहसां सह ॥८३॥
स्रतोप्यतिपाटलं निजवपुःप्रभाभरं ॥ किरति दिशासु वदनस्य कांतिभिः

लनिःस्वनाः ॥६१॥ काश्चित्कादंबरीपानकषायितविलोचनाः ॥ बंदिमागधरूपा
श्चकाश्चिद्वन्यावलस्वनाः ॥६२॥ वीणावेणुमृदंगाद्याः सविलासपराक्रमाः ॥ प्रचेलुः
शक्तयः श्यामाहर्षयंत्यो जगज्जनान् ॥६३॥ मयूरवाहाः कतिचित्कतिचिद्धंसवाहनाः ॥
कतिचिन्नकुलारूढाः कतिचित्कोकिलासनाः ॥६४॥ सर्वाश्च श्यामलाकाराः काश्चित्क
णीरथास्थिताः ॥ कदंबमधुमत्ताश्च काश्चिद्दारूढसैंधवाः ॥६५॥ मंत्रिनाथान्नम
स्कृत्य संप्रचेलुः पुरः पुरः ॥ अथारुह्य समुत्तुंगं गेयचक्रं महारथं ॥६६॥ बालार्कव
र्णकवचा मदालसविलोचना ॥ ईषत्प्रस्वेदकणिकामनोहरमुखांबुजा ॥६७॥ धीणयं
तीकटाक्षेण किंचिद्भ्रूवल्लितांडवैः ॥ समस्तमपि तत्सैन्यं शक्तीनामुद्यतो भ्रतं ॥६८
पिछत्रिकोणछत्रेणाभितुरेणमहीयसा ॥ असमानेन चान्यासां [illegible]कनमुज्वलोद

॥ लं० ॥ हं प्रथमिकाकृतसेवकानां ॥ ब्रह्मेंद्ररुद्रहरिमुख्यसुरोत्तमानां वक्त्राणि व
॥ ८२ ॥ क्षितनुतीनिकरांक्षयंती ॥ ९७ ॥ उद्दीप्तपुष्पशरपंचकतः समुत्थैर्ज्योतिर्मयं
त्रिभुवनं महसा दधानैः ॥ विद्युत्समद्युतिभिरप्सरसां समूहैर्विक्षिप्यमाण
जयमंगललाजवर्षा ॥ ९८ ॥ कामेश्वरीप्रभृतिभिः कमनीयकाभिः संग्रामवेषर
चनारूमनोहराभिः ॥ दीप्तायुधद्युतितिरस्कृतभास्कराभिः नित्याभिरंग्रिम
पा विधेसमुँस्यमाना ॥ ९९ ॥ श्रीचक्रराजतिलकं दशयोजनानि तुंगध्वजोल्लिखि
तमेघकदंबमुच्चैः ॥ १०० ॥ तीव्राभिरावरणशक्तिपरंपराभिर्युक्तं रथं समरक ॥ श्री ॥
र्मणि चालयंती ॥ पंचाधिकैर्विंशतिनामरत्नैः प्रपंचपापः प्रशमाय दृष्टैः ॥ ८२ ॥
१०१ ॥ संस्तूयमाना ललितामरुद्भिः संग्राममुद्दिश्य समुच्चचाल ॥ अगस्त्य

वाच ॥ वाजिवक्त्र महाबुद्धे पंचविंशतिनामभिः ॥ ललितापरमेशान्या देहि
कर्णरसायनं ॥ १०२ ॥ हयग्रीव उवाच ॥ सिंहासनेशी ललिता महाराज्ञी वरां
कुशा ॥ चापिनी त्रिपुरा चैव महात्रिपुरसुंदरी ॥ १०३ ॥ सुंदरी चक्रनाथा च सा
म्राज्ञी चक्रिणी तथा ॥ चक्रेश्वरी महादेवी कामेशी परमेश्वरी ॥ १०४ ॥ काम
राजप्रिया कामकोटिका चक्रवर्त्तिनी ॥ महाविद्या शिवानंगवल्लभा सर्वपा
टला ॥ ५ ॥ कुलनाथाम्नायनाथा च सर्वाम्नायनिवासिनी ॥ शृंगारनायिका चेति पं
चविंशतिनामभिः ॥ ६ ॥ स्तुवंति ये महाभागां ललितां परमेश्वरीं ॥ ते प्राप्नुवंति
सौभाग्यमष्टौ सिद्धीर्महद्यशः ॥ ७ ॥ इति प्रचंडसौरंभं चालैर्तैमिहहल्लं ॥ यं
भंडासुरं प्रति क्रुद्धा चचाल ललितांबिका ॥ ८ ॥ इति श्री ब्रह्मांडपुराणे ल

॥ल॥ लिताखंडे उत्तरभागे शक्तिसेनाविजययात्रावर्णनं नाम त्रयोदशोध्यायः ॥१३॥
॥८२॥ अगस्त्योवाच ॥ चक्रराजरथेंद्रस्य याः पर्वणि समाश्रिताः ॥ देवताः प्रकटा मु
ख्यास्तासामाख्याश्च मे वद ॥१॥ संख्याश्च तासामखिलान्वर्णभेदांश्च शोभ
नान् ॥ आयुधानि च दिव्यानि कथयस्व हयानन ॥२॥ हयग्रीव उवाच ॥ नव
मं पर्व दीमस्य रथस्य समुपाश्रिताः ॥ दशप्रोक्ता सिद्धिदेव्यस्तासां नामानि मे
शृणु ॥३॥ अणिमा महिमा चैव लघिमा गरिमा तथा ॥ ईशित्वा च वशित्वाख्या
प्राप्तिसिद्धिस्तु सप्तमी ॥४॥ प्राकाम्या भुक्तिसिद्धिश्च सर्वकामाभिधापरा ॥ रा ॥श्री॥
ता देव्यश्चतुर्बाहा जयाकुसुमसंनिभाः ॥५॥ चिंतामणिं कपालं च त्रिशूलं ॥८२॥
सिद्धिकज्जलं ॥ दधाना दययापूर्णा योगिभिश्च निषेविताः ॥६॥ तत्र पर्वो

सृजतीव चंद्रमयमभ्रमंडलं ॥१२॥ शतयोजनायतिमता जगत्त्रयीमभिव्या
प्नुवता विशदमौक्तिकात्मना ॥ धवलातपत्रवलयेन भास्करशशिमंड
लस्य सवितामुपेयुषा ॥१३॥ अभिविजिता च मणिकांडशोभिना विज
यादिमुख्यपरिचारिकाजनैः ॥ नवचंद्रिकालहरिकांतिकेदलिचतुरेण चा
मरचतुष्टयेन च ॥१४॥ शक्त्येकराज्यपदवीमभिसूचयंती साम्राज्यचिह्न
शतमंडितसैन्यदेशा ॥ संगीतवाद्यरचनाभिरथामरीणां संस्तूयमानवि
भवा विशदप्रकाशा ॥१५॥ वाचामगोचरमगोचरमेव बुद्धेरीदृक्तया न
कथनीयमनन्यतुल्यं ॥ त्रैलोक्यगर्भपरिपूरितशक्तिचक्रसाम्राज्यसंपद
भिमानमभिस्पृशंती ॥१६॥ आबद्धभक्तिपिशुनांजलिशेखरायां मा गद

॥ल॥ कुशा॥१४॥सर्वखेचरमुद्रा च सर्वबीजा तथा परा॥सर्वयोनी च नवमी तथा सर्व
॥८६॥ त्रिखंडिका॥१५॥सिद्धिब्रात्मादिमुद्राश्च एताः प्रकटशक्तयः॥भंडास्फुरस्य संग्रा
रं कंचुं चक्ररथे स्थिताः॥१६॥या गुप्ताख्याः पूर्वमुक्ताः तासां नामानि मे शृणु॥का
माकर्षिणिका चैव रूपाकर्षिणिका तथा॥ बुध्याकर्षिणिका कला॥१७॥अहंका
राकर्षिणी च शब्दाकर्षिणिका तथा॥ स्पर्शाकर्षिका चैव रूपाकर्षिणिका तथा॥१८॥
रसाकर्षिणिका चैव गंधाकर्षिणिका कला॥चित्ताकर्षिणिका चैव धैर्याकर्षिणि
का कला॥१९॥स्मृत्याकर्षिणि नित्या नामाकर्षिणिका कला॥बीजाकर्षिणिका ॥श्री॥
नित्या आत्माकर्षिणिका कला॥२०॥अमृताकर्षिणी नित्या शरीराकर्षिणी कला ॥८६॥
एताः षोडश भीताभीः कला रूपाश्च शक्तयः॥२१॥अष्टमं पर्व संप्राप्ताः गुप्ताना

स्ताः प्रकीर्तिताः॥विद्रुमद्रुमसंकाशाः मदमहहसिताननाः॥२२॥चतुर्भुजास्त्रि
नेत्राश्च चंद्रार्धमुकुटोज्वलाः॥चापबाणौ चमखड्गौ दधाना दीप्तकांतयः॥२३॥
भंडास्फुरवधार्थाय प्रवृत्ताः कुंभसंभवः॥सायंतन ज्वलद्दीप्तप्रख्ये चक्ररथस्य
तु॥२४॥सप्तमे पर्वणि कृत्तावारा गुप्ततराभिधाः॥अगेनं शक्तयस्त्वष्टौ तासां
नामानि मे शृणु॥२५॥अनंगकुसुमानंगमेखला च द्वितीयका॥अनंगम
दनानंगमदनातुरया सह॥२६॥अनंगरेखा चानंगवेगानंगांकुशा अपि॥
अनंगमालिन्यपरा एता देव्यो जपालिषः॥२७॥इक्षुचापं पुष्पशरान् पुष्पकंदु
कमुत्पलं॥विभृत्यो दग्धविक्रांतशालिन्यो ललिताज्ञया॥२८॥पंडास्फुरप्रतिकु
धाप्रज्वलंत इव स्थिताः॥चक्रराजरथेंद्रस्य षष्ठपर्वसमाश्रिताः॥२९॥सर्वसं

॥ल॥ क्षोभिण्यो मुख्याः संप्रदायाख्ययामताः॥ वेणीकृतकचस्तोमासिंदूरतिलकोज्व
॥८८॥ लाः॥२०॥ अतितीव्रस्वभावाश्च कालानलसमत्विषः॥ वह्निचापं वह्निबाणं वह्निरू
पमसींतथा॥२१॥ वह्निचक्राख्यफलकं दधादीप्तविग्रहाः॥ अस्मरेद्वं प्रतिक्रुद्धाः काम
भस्मसमुद्भवं॥२२॥ आद्यशक्तय एवैताल्ललितायामहौजसः॥ सर्वसंक्षोभिणी चै
व सर्वविद्राविणी तथा॥२३॥ सर्वाकर्षिणिका शक्तिः सर्वाल्हादिनिका तथा॥
सर्वसंक्षोभिणी शक्तिः सर्वस्तंभनशक्तिका॥२४॥ सर्वजृंभणशक्तिश्च तथा सर्वव
शंकरी॥ सर्वरंजनशक्तिश्च सर्वोन्मादनशक्तिका॥२५॥ सर्वार्थसाधनी शक्तिः सर्व ॥श्री॥
संपत्तिपूरिणी॥ सर्वमंत्रमयी शक्तिः सर्वद्वंद्वक्षयंकरी॥२६॥ इत्येवं संप्रदायानां ॥८८॥
नामानि कथितानि वै॥ रथस्य पंचपर्वस्था कुलोत्तीर्णा इतिस्मृताः॥२७॥

र्वभागेन ब्राह्म्याद्या अष्टशक्तयः॥ ब्राह्मी माहेश्वरी चैव कौमारी वैष्णवी तथा
७॥ वाराही चैव माहेंद्री चामुंडा चैव सप्तमी॥ महालक्ष्मीरष्टमी च द्विभुजा शो
णविग्रहा॥८॥ कपालमुत्पलं चैव बिभ्राणा रक्तवाससः॥ अथवान्यप्रकारे
ण केचिद्ध्यानं प्रचक्षते॥९॥ ब्रह्मादिसदृशाकारा ब्रह्मादिसदृशायुधाः॥ ब्र
ह्मादीनां परं चिह्नं धारयंत्यः प्रकीर्त्तिताः॥१०॥ तस्याप्यूर्ध्वस्थानगता मुद्रादेव्यो
महत्तराः॥ मुद्राविरचनायुक्तैर्हस्तैः कमलकांतिभिः॥११॥ दाडिमीपुष्पसंका
शाः पीतांबरमनोहराः॥ चतुर्भुजा भुजद्वंद्वधृतचर्मकृपाणिकाः॥१२॥ मदरक्त
विलोलाक्ष्यस्तासां नामानि मे शृणु॥ सर्वसंक्षोभिणी चैव सर्वविद्राविणी तथा
१३॥ सर्वाकर्षिणी मुद्रा च तथा सर्ववशंकरी॥ सर्वोन्मादनमुद्रा च षष्ठी सर्वमहां

॥२८॥ दशारे देवता ज्ञेयाः सर्वेप्सितफलप्रदाः ॥ एताश्चतुर्भुजा ज्ञेया वज्रं शक्तिं च तोमरं ॥४६॥
॥८६॥ चक्रं चैवाभिरामाणां भंडासुरवधोद्यताः ॥ अथ चक्ररथेंद्रस्य तृतीयं पर्वसंस्थिताः ॥४७॥
रहस्ययोगिनी नाम्ना प्रख्याता वागधीश्वराः ॥ रक्ताशोकप्रसूनाभा बाणकार्मुकपाण
यः ॥४८॥ कवचच्छन्नसर्वांग्यो वीणापुस्तकपाणयः ॥ वशिनी चैव कामेशी मोदिनी
विमलास्तथा ॥४९॥ अरुणा च जयिन्याख्या सर्वेशी कौलिनी तथा ॥ अष्टावेताः स्मृता
देव्यो दैत्यसंहारमूर्तयः ॥५०॥ अथ चक्ररथेंद्रस्य द्वितीयं पर्वसंश्रिताः ॥ तिस्रस्सूपरि ॥श्री॥
तिलया अष्टबाहुसमन्विताः ॥५१॥ चापबाणौ पानपात्रं मातुलिंगं कृपाणिकां ॥ फल ॥८६॥
कं नागपाशं च घंटां चैव महाध्वनिं ॥५२॥ बिभ्राणा मदिरामत्ता अतिपूर्वरहस्यकाः ॥
कामेशी चैव वज्रेशी भगमालिन्यथापरा ॥५३॥ तिस्र एतास्मृता देव्यो भंडकोपस

मन्विताः ॥ ललितासममाहात्म्या ललितासमतेजसः ॥५४॥ एतास्तु नित्या श्रीदेव्या
अंतरंगाः प्रकीर्तिताः ॥ अथानंदमहापीठे रथमध्यमपर्वणि ॥५५॥ परितो रचितावा
साः प्रोक्ताः पंचदशापराः ॥ तिथिनित्याः कालरूपा विश्वं व्याप्यैव संस्थिताः ॥५६॥ भं
डासुरादिदैत्येषु प्ररब्धाभ्रकुटीघनाः ॥ देव्या समनिजाकारा देवीसमनिजायुधाः
॥५७॥ जगतामुपकाराय वर्तमाना युगेयुगे ॥ तानि नामानि मत्तस्त्वमवधारय कुंभज
॥५८॥ कामेशी भगमाला च नित्यक्लिन्ना तथैव च ॥ भेरुंडा वह्निवासा च महावज्रेश्व
री तथा ॥५९॥ मह्नीत्वरिता देवी नवमी कुलसुंदरी ॥ नित्या नीलपताका च वि
जया सर्वमंगला ॥६०॥ ज्वालामालिका चित्रा दशपंचव्यकीर्तिताः ॥ एताभिः संहि
ता देवी सदा सेवकबुद्धिभिः ॥६१॥ दुष्टभंडासुरं जेतुं निर्ययौ ललितेश्वरी ॥ मंत्रिना

॥ल॥ थामहाचक्रेगिरिचक्ररथोत्तमे ॥ ६२ सप्तपर्वाणि चोक्तानि तत्रदेव्यश्च ताः शृणु
॥८७॥ गेयचक्ररथे पर्वमध्यपीठनिकेतना ॥ ६३ संगीतयोगिनी प्रोक्ता श्रीदेव्या अति
वल्लभा ॥ तथैव प्रथमं पर्वमंत्रिण्य- निवासभूः ॥ ६४ अथ द्वितीयपर्वस्था गेय
चक्ररथोत्तमे ॥ रतिप्रीतिमनोज्ञाश्च वीणाकार्मुकपाणयः ॥ ६५ तमालश्यामला
कारादानवोन्मर्दनक्षमाः ॥ तृतीयपर्वसंरूढा मनोभूबाणदेवताः ॥ ६६ द्राविणी
शोषिणी चैव बंधिनी मोहिनी तथा ॥ ६७ उन्मादिनी च पंचैता दीप्तकार्मुकपाण
यः ॥ तत्र पर्वण्यधस्तास्तु वर्तमाना महौजसः ॥ ६८ कामराजश्च कंदर्पो ॥श्री॥
मन्मथो मकरध्वजः ॥ मनोभवः पंचमस्यात एते त्रैलोक्यमो ॥८७॥
हनाः ॥ ६९ कस्तूरीतिलकोल्लासी फालमुक्तविभूषणाः ॥

ताश्च स्फटिकसंकाशाः परशुपाशमेव च ॥ गदां घंटां मणिं चैव दधाना दीप्तविग्रहाः
३८ देवद्विषं प्रति क्रुद्धा भृकुटीकुलानना ॥ एतासामपि नामानि समाकर्ण
य कुंभज ॥ ३९ ॥ सर्वसिद्धिप्रदा देवी सर्वसंपत्प्रदा पुनः ॥ सर्वप्रियंकरी देवी सर्व
मंगलकारिणी ॥ ४० ॥ सर्वकामप्रदा देवी सर्वदुःखविमोचिनी ॥ सर्वमृत्युप्रशम
नी सर्वविघ्ननिवारिणी ॥ ४१ ॥ सर्वांगसुंदरी देवी सर्वसौभाग्यदायिनी ॥ दशैताः क
थिता देव्यो दययापूरिताशयाः ॥ ४२ चक्रे तुरीयपर्वस्था मुक्तागौरसमत्विषः ॥
निगर्भयोगिनीनाम्ना प्रथिता दशकीर्त्तिताः ॥ ४३ सर्वज्ञा सर्वशक्तिश्च सर्वैश्व
र्यप्रदायिनी ॥ सर्वज्ञानमयी देवी सर्वव्याधिविनाशिनी ॥ ४४ सर्वाधारस्व
रूपा च सर्वपापहरा तथा ॥ सर्वानंदमयी देवी सर्वाकर्षस्वरूपिणी ॥ ४५

॥ ९ ॥ हमादधानाः पदेपदे ॥ वज्रकं कटसंछन्नाकटोराट्टहासोज्वलाः ॥ ७८ ॥ वज्रदंष्ट्रेश
॥ ८८ ॥ तथ्रीं च संबिभ्राणा भुशुंडिकां अथ गीतरथेंद्रस्य षष्ठं पर्व समाश्रिताः ॥ ७९ ॥ असितां
गप्रभृतयो भैरवाः शस्त्रभीषणाः त्रिशिखं पानपात्रं च बिभ्राणा नीलवर्चसः ॥ ८० ॥
असितांगो रुरुश्चंडः क्रोधोन्मत्तश्च भैरवः ॥ कपाली भीषणश्चैव संहारश्चाष्ट भैरवाः ॥
८१ ॥ अथ गीतरथेंद्रस्य सप्तमं पर्व संश्रिताः ॥ मातंगी सिद्धलक्ष्मीश्च महामातंगि
का तथा ॥ ८२ ॥ महती सिद्धलक्ष्मीश्च शोणबाणधनुर्धराः ॥ तस्यैव पर्वणो धस्ताद्र
णादिक्षेत्रपास्तथा ॥ ८३ ॥ दुर्गा वाबकुकश्चैव सर्वे ते शस्त्रपाणयः ॥ तत्रैव पर्वणो ॥ श्री ॥
धस्ताल्लक्ष्मीश्चैव सरस्वती ॥ ८४ ॥ शंखः पद्मनिधिश्चैव ते सर्वे शस्त्रपाणयः ॥ लोक ॥ ८८ ॥
द्विषं प्रति क्रुधा भंडं चंडपराक्रमं ॥ ८५ ॥ शक्रादयश्च विध्वंस्तादश दिक्चक्रनाय

काः ॥ शक्तिरूपास्तत्र पर्वण्यधस्तात्कृतसंश्रयाः ॥ ८६ ॥ वज्रं शक्तिं कालदंडं असिं
पाशं ध्वजं तथा ॥ गदां त्रिशूलं दर्भास्त्रं च कं च दधतस्त्वमी ॥ ८७ ॥ सेवंते मंत्रिणीना
था नित्यं भक्तिपरायणाः ॥ भंडासुरादिदुष्टानां विजेतुं विश्वकंटकान् ॥ ८८ ॥ मंत्रिना
थाश्च यद्वारा ललिताज्ञापकेश्वरः ॥ गीतचक्ररथेंद्रस्य दिक्पालाः संश्रयं दधुः ॥ ८९
सर्वेषां चैव देवानां मंत्रिणी द्वारतः कृता ॥ विज्ञापना महादेव्यां कार्यसिद्धिं प्रयच्छति
९० ॥ राज्ञी विज्ञापना चेत्स्यात्प्रधानद्वारतः कृता ॥ तदा खलु फलप्राप्तिः सेवकानां प्र
जायते ॥ ९१ ॥ अन्यथा कृतरा तेषां सामर्थ्ये ज्वलितौजसः ॥ अप्रधृष्यप्रभावा याः
श्रीदेव्या उपसर्पिणी ॥ ९२ ॥ साहि संगीतविद्येशी श्रीदेव्या अतिवल्लभा ॥ नातिलंघयति
कापि तदुक्तकार्यसिद्धिषु ॥ ९३ ॥ श्रीदेव्या शक्तिसाम्राज्ये सर्वकर्मणि मंत्रिणी ॥ अ

॥ ल ॥ कर्तुमन्यथाकर्तुं कर्तुं चैव प्रगल्भते ॥ ९४ ॥ तस्मात्सर्वेपि दिक्पालाः श्रीदेव्या जयकांक्षि
॥ ८९ ॥ णः ॥ तस्याः प्रथानभूतायाः सेवामेव वितन्वते ॥ ९५ ॥ इति श्रीललितादेव्याश्चक्रराजर
थोत्तमे ॥ पर्वस्थितानां देवीनां नामानि कथितान्यलं ॥ ९६ ॥ भंडासुरस्य संहारे नासां
दिव्यायुधान्यपि ॥ प्रोक्तानि गेयचक्रस्य सर्वदेव्यश्च कीर्तिताः ॥ ९७ ॥ इमानि सर्वदे
वीनां नामान्याकर्णयंति ये ॥ सर्वपापविनिर्मुक्ता युद्धे विजयिनो नराः ॥ ९८ ॥ इति श्री
ब्रह्मांडपुराणे उत्तरभागे ललिताखंडे ललितोपाख्याने चतुर्दशोध्यायः ॥ १४ ॥
अगस्त्य उवाच ॥ किरिचक्ररथेंद्रस्य पंचपर्वसमाश्रिताः ॥ देवताश्च श्रृणु प्रा ॥ श्री ॥
ज्ञ यन्नामश्र्यवतां जयः ॥ १ ॥ प्रथमं पर्व विंद्राख्य संप्राप्ता दंडनायिका ॥ ९० ॥
सा तत्र गजडुडुंडकंटकव्रातघस्मरी ॥ २ ॥

कवचच्छन्नसर्वांगा पल्लाशप्रसवत्विषः ॥ ७० ॥ पंचकामा इमे प्रोक्ता भंडासुरव
धार्थिनः ॥ गेयचक्ररथेंद्रस्य चतुर्थपर्वसंश्रिताः ॥ ७१ ॥ ब्राह्मीमुख्यास्तु पूर्वोक्ता
श्चंडिकाख्यसमीपरा ॥ तत्र पर्वण्यधस्तात्तु लक्ष्मीश्चैव सरस्वती ॥ ७२ ॥ रतिप्री
तिः कीर्तिशांतिपुष्टिस्तुष्टिश्च शक्तयः ॥ एताश्चक्रो धरस्तास्यो देत्यं प्रतिमहाब
लाः ॥ ७३ ॥ गेयचक्ररथे प्रोक्ताशयः कुंभसंभव ॥ पंचमं पर्वसंप्रोक्ता वामाधाः
षोडशापराः ॥ ७४ ॥ गीतिचक्ररथेंद्रस्य नासौ नामामे श्रृणु ॥ वामा ज्येष्ठा च रौद्री
च शांतिश्रद्धा सरस्वती ॥ ७५ ॥ क्रिशक्तिश्च लक्ष्मीश्च तुष्टिश्चैव तु मोहिनी तथा
प्रमथिनी चाश्वासिनीवीचिस्तथैव च ॥ ७६ ॥ विद्युन्मालिन्यथ सुरानंदा धोना
म बुद्धिका ॥ एतास्तु कुरुविंदाभा जगत्क्षोभणलंपटाः ॥ ७७ ॥ महासमरसन्ना

॥ ल ॥ ताः ॥ भंडारकूरस्य सैन्यानां सर्वेषां रुधिरप्लुतिं ॥ ११ ॥ लिलीक्षमाणा जिह्वाभिर्लेलि
॥ १० ॥ ह्याताभिरुज्वलाः ॥ महता विक्रमो घेन पिबंत्य इव दानवान् ॥ १२ ॥ आज्ञायादे
डनाथायाः स्तम्प्रदेशमुपासते ॥ तस्यैव पर्वणोधस्तात् परितस्थानमाश्रिताः ॥
१३ ॥ याकिनी लाकिनी चैव शाकिनी डाकिनी तथा ॥ हाकिनी शाकिनी चैव ता
सामेव्य स्वरूपिणी ॥ १४ ॥ हाकिनी सप्तमीत्येताश्चंडदोर्दंडविक्रमाः ॥ पिबंत्य
इव भूतानि पिबंत्य इव मेदिनीं ॥ १५ ॥ त्वचं रक्तं तथा मांसं मेदोस्थि च विरोधि
नां ॥ मज्जा शुक्ला च शुक्लं च पिबंत्यो विकटाननाः ॥ १६ ॥ निष्ठुरैः सिंहनादैश्च ॥ श्री ॥
पूरयंत्यो दिशो दश ॥ धातुनाथा इति प्रोक्ताः सर्वधातुषु संस्थिताः ॥ १७ ॥ सप्तापि ॥ १० ॥
वारिधीन् भूमिमालासंचूर्णितां वरात् ॥ धातुनाथा इति प्रोक्ता क्षणार्धेनैव नि

पांतु निष्पन्नबंधुसाहसाः ॥ १८ ॥ शर्करीचक्रवर्तृत्वभयंकररविलोचनाः स्वस्वा
मिनीद्रोहकृतां स्वकीयस महद्रुहां ॥ १९ ॥ वैदिकद्रोहिणां चैव द्रोहिणां वीरवै
रिणां ॥ यज्ञद्रोहकृतां दुष्टदैत्यानां भक्षणे क्षमाः ॥ २० ॥ नित्यमेवाहि सेवंते पा
त्रिणीदंडनायिकां ॥ तस्यैव पर्वणः पार्श्वे द्वितीये कृतमंदिरे ॥ २१ ॥ क्रोधिनी रक्त
भिनी ख्याते वर्तेते देवते उभे ॥ चामरे बीजयंत्यौ च लोलकंकणदोर्लते ॥ २२ ॥
देवद्विषां च सृग्रक्तहालापानमदोद्धते ॥ सदैव घूर्णमानाक्ष्यौ सदा प्रहसितानने ॥
२३ ॥ अथ तस्य रथेंद्रस्य किरिचक्राभिदाजुषः ॥ पार्श्वद्वयकृतावासमायुधद्वय
मुद्धते ॥ २४ ॥ हलं च मुसलं चैव देवतारूपमास्थिते ॥ स्वकीयमुकुटस्थाने स्वकी
यायुधविग्रहे ॥ २५ ॥ आविर्भावाज्जगद्द्वेषी घस्मरं विबुधैः स्मृतं ॥ एतदायुधयुग्म

॥ ल ॥ नललितादंडनायिका ॥ २६ ॥ खंडयिष्यति संग्रामे विषंगं नाम दानवं ॥ तस्यैव पर्व
॥ १३ ॥ णोऽहं दंडनाथायाः स्वयं सीमनि ॥ २७ ॥ वर्तमानो महाभीमसिंहनादध्वनन्निभः ॥ दंष्ट्रा
कटकटत्कारबधिरीकृतदिङ्मुखः ॥ २८ ॥ चंडोच्चंड इति ख्यातः चतुर्हस्तस्त्रिलोच
नः ॥ शूलं खड्गं प्रेतपाशं दधानो दीप्तविग्रहः ॥ २९ ॥ सदा संसेवते देवीं पश्यन्नेव हि पोत्रि
णीं ॥ किरिचक्ररथेंद्रस्य पंचपर्वसमाश्रिताः ॥ ३० ॥ धातील्याद्या अष्ट देव्यो दिव्य
प्रतापविश्रुताः ॥ अष्टपर्वतनिर्घातिघोरनिर्घृतनिःस्वनाः ॥ ३१ ॥ अष्टनागस्फुरद्दू
षणानष्टबलतेजसः ॥ प्रकृष्टदोःप्रकांडोग्रहतदानवकोटयः ॥ ३२ ॥ सेवंते ललितां ॥ श्री ॥
देव्या दंडनाथामहर्निशं ॥ तासामाख्याश्च विख्याताः समाकर्णय तापस ॥ ३३ ॥ वार्ता ॥ १३ ॥
लीचैव वाराही सा वराहमुखी तथा ॥ अंधिनी बंधिनी चैव जंभिनी चैव मोहिनी ॥ ३४ ॥

नानाविधाभिर्ज्वालाभिर्नर्तयंती जयश्रियं ॥ उद्दंडपोत्रनिर्घातनिर्भिन्नोद्धतदानवा
॥ ३ ॥ दंष्ट्राबालमृगांकस्य विडंबनविभावरी ॥ प्रावृषेण्यपयोवाहव्यूहनीलवपुर्लता
॥ ४ ॥ किरिचक्ररथेंद्रस्य सालंकारा यन्ने सदा ॥ पोत्रिणी पुत्रिका शेषविश्ववार्तालिकांबि
का ॥ ५ ॥ तस्यैव रथनाथस्य द्वितीयं पर्व संश्रिताः ॥ जंभिणी मोहिनी चैव स्तंभिनीति
स्म एव च ॥ ६ ॥ उत्फुल्लदाडिमीप्रख्या सर्वदानवमर्दनाः ॥ मुसलं च हलं हालापात्रं
फणिमहागुणं ॥ ७ ॥ ज्वलन्माणिक्यवलयैर्विभ्राणाः पाणिभिर्निजैः ॥ अतिदीप्तक
रालाक्ष्यो ज्वालाभिर्दैत्यसैनिकान् ॥ ८ ॥ दहंत्य इव निःशंकं सेवंते स्म करानना ॥ गि
रिचक्ररथेंद्रस्य तृतीयं पर्व संश्रिताः ॥ ९ ॥ हंडिन्याद्याः पंच देव्यो देवीमंत्रकृतास्पदाः ॥
कठोरेणाट्टहासेन भिंदंत्यो भुवनत्रयं ॥ १० ॥ ज्वाला इव च कल्पान्ते रंगनावेष्पमाश्रि

॥ल॥ इंद्रश्चाप्सरसश्चैव सचतुष्षष्टिकोटयः ॥ सिद्धाश्चाग्निश्च साध्याश्च विश्वेदेवास्त
॥९२॥ थापरे ॥४३॥ विश्वकर्मायमश्चैव मानरश्च बलोन्नताः ॥ रुद्राः सपरिवारश्च रुद्राश्चै
व पिशाचकाः ॥४४॥ निर्ऋतिरक्षसान्नाथो राक्षसा बहवस्तथा ॥ मित्राश्च तत्र
गंधर्वाः सदागानविशारदाः ॥४५॥ विश्वावसुप्रभृतयो विख्यातास्तम्बुरोगमाः
तथाभूतगणाश्चान्ये वरुणो वसवः परे ॥४६॥ विद्याधराः किन्नराश्च मारुतेश्व
र एव च ॥ तथा चित्ररथश्चैत्ररथकाननकारकः ॥४७॥ तुंबरुर्नारदो यक्षसो
मो यक्षेश्वरस्तथा ॥ देवाश्च भगवान्तत्र गोविंदः कमलापतिः ॥४८॥ ईशानश्च ॥श्री॥
जगच्चक्ररक्षकः शूलभीषणः ॥ ब्रह्मा चाश्विनिपुत्रौ च वैद्यविद्याविशारदौ ॥४९॥ ॥९२॥
धन्वंतरिश्च भगवान्तथान्ये गणनायकाः ॥ कटकोडगलद्दूनसंतर्पितमधुव्रताः ॥५०॥

एवंप्रकारा बहवो देवतास्तत्र जाग्रति ॥ पूर्वादिदिशमारभ्य परितः स्तुतमंदि
राः ॥५१॥ तत्रैव देवता चक्रे शक्त्या सुरमरुद्दिशः ॥ आश्रित्य किल वर्त्तंते तदधिष्ठा
नदेवता ॥५२॥ जंभिनीस्तंभिनीचैव मोहिनी तिस्र एव च ॥ तस्यैव पर्वणः प्रांते किरि
चक्रस्य भास्वतः ॥५३॥ कपालं च गदां बिभ्रदूर्ध्वकेशो महावपुः ॥ पातालतलजंबा
ल बहुलाकारकालिमा ॥५४॥ अट्टहासमहावज्रदीर्णब्रह्मांडमंडलः ॥ भिंदन्ड
मरुकध्वानै रोदसीकंदरोदरं ॥५५॥ फुत्कारत्रिफणायुक्तं फणिपाशं करे वहन् ॥
क्षेत्रपालः सदा भाति सेव्यमानः किरीश्वरैः ॥५६॥ तस्यैव च समीपस्थः तस्या वा
हनकेसरी ॥ यमारूढप्रवत्र्धे भंडासुरबधे विधौ ॥५७॥ आयुष्ममेव देवेशी
वाहसिंहं सलक्षणं ॥ तस्यैव पर्वणोधस्ताद्दंडनाथा समन्विषः ॥५८॥ दंडि

॥ ल ॥ नीसदृशाशेषभूषणायुधमंडिताः ॥ श्यामाः क्रोडाननाश्चंद्ररेखोत्तंसितकुंतलाः

॥ १२ ॥ ५९ ॥ हलं च मुसलं हस्ते घूर्णयंत्यो मुहुर्मुहुः ॥ ललिताद्रोहिणांशाद्रोहियो स्वामि

निद्रुहां ॥ ६० ॥ रक्तस्रोतोभिरुत्फलैः पूरयंत्यः कपालकं ॥ निजभक्तद्रोहकृताः कृतमा

लाविभूषणाः ॥ ६१ ॥ स्वर्गोहिसमयाक्षेपकारिणा मुंडमंडलैः ॥ अखंडरक्तविच्छ

र्दैः कृतवैकक्ष्यकश्रियः ॥ ६२ ॥ सहस्रदेवताः प्रोक्ता सेवमाना किरीश्वरीं ॥ तासां ना

मानि सर्वासां दंडिन्याः कुंभसंभव ॥ ६३ ॥ सहस्रनामाध्यायेतु वक्ष्यंते नाधुना पुनः ॥

अथासां देवतानां च कोलास्यानां समीतेषु ॥ ६४ ॥ वाहनः कृष्णसारंगो दंडिन्याः स ॥ श्री ॥

मुपस्थितः क्रोशार्धार्धायतश्रृंगस्तदर्धार्धायतो मुखे ॥ ६५ ॥ क्रोशप्रमाणकाय ॥ १२ ॥

श्च सदा चोद्धृतवालधीः ॥ उदरे धवलच्छायो हुंकारेण महीयसा ॥ ६६ ॥

स्तंभिनीति रिपुक्षोभस्तंभनाच्चाटनक्षमाः ॥ तस्यैव पर्वणो वामभागे सततसंस्थि

तः ॥ ३५ ॥ दंडनाथोपवाह्यस्तु कासरो धूसराकृतिः ॥ अर्धक्रोशायतो श्रृंगो द्वितीय

क्रोशविग्रहः ॥ ३६ ॥ खड्गुयन्निष्ठुरैर्लोमजालैः संदितविग्रहः ॥ कालदंडवदुच्चं

ड बालकांडउपस्थितः ॥ ३७ ॥ नीलांजनाचलप्रस्थाविकटोन्नतपृष्ठभूः ॥ महा

नीलगिरिश्रेष्ठगरिष्ठस्कंधमंगलः ॥ ३८ ॥ प्रभूतोष्मलनिश्वासप्रसकं पितांबुधिः ॥

घर्घरध्वनिना कालमहिषं विहसन्निव ॥ ३९ ॥ पर्वते खुरविक्षिप्तपुष्कलावर्तवारि

दः ॥ तस्यैव पर्वणोधस्ताद्गुह्यास्थानगतालयाः ॥ ४० ॥ इंद्रादयो नैकभेदा दिशामष्ट

कदेवताः ॥ ललितायां कार्यसिद्धिं विज्ञापयितुमागताः ॥ ४१ ॥ लोकस्यापि च संर

क्षां संपादयितुमागताः ॥ तन्नामानि शृणु प्राज्ञ संकोचात्कथितानि मत् ॥ ४२

।।ल।। पितभानवः।। कल्पांतकाले दंडिन्या आज्ञया विश्वघस्मराः ।।७५।। अत्युग्रे दे प्रकृतयः

।।९६।। किटिदंष्ट्रारउन्मखाः ।। त्रिशूलाग्रविनिर्भिन्ना महावारिदमंडलाः ।।७६।। हेतुकस्त्रिपु

रारिश्च तृतीयश्चाग्निभैरवः ।। यमजाश्चैकपादश्च तोच कालकरालको ।।७७।। भीमरूपो

हाटकेशस्तथैवाचलनामवान् ।। एते दशैव विख्याता दशकोटिभटान्विताः ।।७८।।

तस्यैव गिरिचक्रस्य वर्तंते पर्वसीमनि ।। एवं हि दंडनाथायाः किरिचक्रस्य देवताः ।।७९।।

जंभिन्याघचलेंद्रांताः प्रोक्तास्त्रैलोक्यपालिताः ।। तत्रस्थैर्देवतावृंदैर्वेष्टितवस्तत्र संग

रे ।।८०।। दानवामारयिष्यंति पास्यंते रक्तवृष्टयः ।। इत्थं बहुविधत्राणां पर्वस्थैर्देव ।।श्री।।

तागणैः ।।८१।। गिरिचक्रं दंडनाथारथचक्रं च वालहा ।। चक्रराजरथो यत्र गेयचक्र ।।९६।।

रथोत्तमः ।।८२।। यत्र गेयरथस्तत्र किरिचक्ररथोत्तमः ।। एतत्रयं रथं तत्र त्रैलोक्य

मिव जंगमं ।।८३।। शक्तिसेनासहस्रस्य मध्ये विरुरुचेतरां ।। मेरुमंदरविंध्यानां समवा

य इवाभवत् ।।८४।। महाघोषः प्रववृधे शक्तीनां सैन्यमंडले ।। चचाल वसुधा सर्वा त

च्चक्रैरवदारिता ।।८५।। ललिताचक्रराजाख्यरथनाथस्य कीर्त्तिताः ।। पद्मसारथय

उद्दंडपाशग्रहणकोविदः ।।८६।। धरादेवी प्रथमतस्तथा त्रिपुरभैरवी ।। संहारभैरवश्चा

न्यो [illegible] कयोगिनिकल्लभः ।।८७।। सारसः पंचमश्चैव चामुंडा च तथापरा ।। एतास्तु देव

तास्तत्र रथसारथयः स्मृताः ।।८८।। गेयचक्ररथेंद्रस्य सारथि खुहसंतिका ।। किरि

चक्ररथेंद्रस्य सारथिस्तंभिनी स्मृता ।।८९।। दशयोजनमुन्नस्तो ललितारथपुंगवः

सप्तयोजनउच्छ्रायो गीतिचक्ररथोत्तमः ।।९०।। षड्योजनसमुन्नम्नः किरिचक्रो महा

मुने ।। महामुक्तातपत्रं तु दशयोजनविस्तरं ।।९१।। चचौ ते ललितेशान्या रथ एवन

॥ल॥ चान्यतः॥ तद्देवशक्तिसांम्राज्यसूचकं परिकीर्त्तितं ॥ १२ ॥ सामान्यमातपत्रं च रथ
॥१५॥ इंद्रेपि वर्त्तते ॥ अथ सा ललितेशानी सर्वशक्तिमहेश्वरी ॥ १३ ॥ महासांम्राज्यपदवी
मारूढा परमेश्वरी ॥ चचाल भंडदैत्यस्य जयसिध्यभिकांक्षिणी ॥ १४ ॥ शब्दायंते
दिशः सर्वा कंपते च वसुंधरा ॥ क्षुभ्यंति सर्वभूतानि ललितेशाविनिर्गमे ॥ १५ ॥ दे
वदुंदुभयो नेदुः निपेतुः पुष्पवृष्टयः ॥ विश्वावसुप्रभृतयो गंधर्वाः सुरगायकाः ॥
१६ ॥ तुंबुरुर्नारदः साक्षात्साक्षाद्देवी सरस्वती ॥ जयमंगलपद्यानि पठंति पटुगी
तिभिः ॥ १७ ॥ हर्षसंफुल्लवदना स्फुरत्कलकभूषणाः ॥ मुमुचुर्जयजयेत्येवं स्तुवाना ॥श्री॥
ललितेश्वरीं ॥ १८ ॥ हर्षेणांधा मदोन्मत्ताः प्रनृत्यंतः पदे पदे ॥ सप्तर्षयो वसिष्ठा ॥१५॥
द्या ऋग्यजुःसामरूपिभिः ॥ १९ ॥ अथर्वरूपैर्मंत्रैश्च वर्धयंयोजयश्रियं ॥ हविषे

हसन्मारुश्चैवचापनवाहस्य हरिणास्यपराक्रमे ॥ तस्यैव पर्वणो देशे वर्त्तते वाहनो
त्तमः ॥ ६७ ॥ किरिचक्ररथेंद्रस्य तस्य तत्रैव पर्वणि ॥ वर्त्तते मदिरासिंधुर्देवतारूपमा
स्थितः ॥ ६८ ॥ माणिक्यगिरिवच्छोणं हस्ते पिशितपिंडकं ॥ दधानो घूर्णमानाक्षः स्वर्णाभो
जस्रगावृतः ॥ ६९ ॥ मदशक्त्या समाश्लिष्टो धृतचंक्रे रक्तसरोजया ॥ यदा यदा भंडदै
त्यसंग्रामः संप्रवर्त्तते ॥ ७० ॥ युद्धे खेदमनुप्राप्ताः शक्तयस्तुः पिपासिताः ॥ तदा तदानु
ह्लालाद्विरात्मानं बहुधाक्षिपन् ॥ ७१ ॥ रणखेदं देवतानामंजसा पाकरिष्यति ॥ त
दत्यद्भुतमेवर्षे भविष्यति न संशयः ॥ ७२ ॥ तदा श्रोष्यसि संग्रामे कथ्यमानं मया मुदा ॥
तस्यैव पर्वणोधस्तात् दृष्टदिक्ष्वधरावच ॥ ७३ ॥ उपर्यपि द्रुतावासा हेतुकायावशस्थि
ताः ॥ महांतो भैरवाश्रेष्ठाः ख्याता वातापितापन ॥ ७४ ॥ उद्दामायुधतेजोभिर्दिवादी

॥ ल ॥ रमास्फुरं ॥ धूमैरिवावृतमभूत् उत्पातजनितैर्मुहुः ॥ ५ ॥ अकांडमेघनिर्भिन्नाभित्त
॥ १६ ॥ योदैत्यपत्तने ॥ घूर्णमाना पतंत्येव महोल्का गगनस्थलात् ॥ ६ ॥ उत्पातानां प्रथमिको
भूकंपः पर्यवर्त्तत ॥ महीजज्वालसकलातत्रशून्यकपत्तने ॥ ७ ॥ अकांडरावत्तत्कं
पं भेजुर्दैत्यपुरोधसः ॥ ध्वजाग्रवर्त्तिनः काकागृध्राश्चैवबलाहकाः ॥ ८ ॥ आदि
दृष्ट्वा त्यमंडलं दृष्ट्वा ॥ चक्रेदुरुच्चकैः क्रंदो यथवद्गवत्तत्रलोचनैर्नुविलोकिता ॥ ९ ॥ मुकुराका ६=
शवाणीभिः परुषाभिश्चभाषिरे ॥ सर्वतो दिक्षु दृश्यंते केतवस्तु मलीमसः ॥ १० ॥
धूमायमानाः प्रक्षोभदैत्याजनकरक्षसां ॥ दैत्यस्त्रीणां च विभ्रष्टा अकस्माद्भूष ॥ श्री ॥
णस्रजः ॥ ११ ॥ हाहेतिदूरं चक्रंदुर्दैत्यः पर्यंकसमरोदिषुः ॥ दर्पणानां वर्मणां च ध्वजानां ॥ १६ ॥
खड्गसंपदां ॥ १२ ॥ मणीनामंबराणां च मालिन्यमभवन्मुहुः ॥ सौधेषु चंद्रशाला

सु केलिवेश्मसु सर्वतः ॥ १३ ॥ अट्टालकेषु गोष्ठेषु विपणीषु सभासु च ॥ चतुःषष्ठिकदेशे
षु प्रग्रीवेषु वलभीषु च ॥ १४ ॥ सर्वतोभद्रवासेषु संध्यावर्तादिवेश्मसु ॥ पिछंदकेषुशुद्धां
तेष्ववरोधनपालिषु ॥ १५ ॥ स्वस्तिकेषु च सर्वेषु गर्भागारपुरेषु च ॥ गोपुरेषु कपाटेषु व
लभीनां च सीमसु ॥ १६ ॥ वातायनेषु कक्षासु धिष्ण्येषु चत्वारिषु ॥ सर्वत्र दैत्य
नगरवासिभिर्जनमंडलैः ॥ १७ ॥ अश्रूयंत महाघोषाः परुषा भूतभाषिताः ॥ शिथि
लाः सर्वतो जाता घोरवर्णा भयानकाः ॥ १८ ॥ करटैः कंटुकाला पैरवलोक्य दिवाक
रं ॥ समरारिकरोटीनां कोटयश्चापतन्भुवि ॥ १९ ॥ अपतन्वेदिमध्येषु बिंदवः शो
णितांभसां ॥ केशोल्काश्च निपेतुः सर्वतो धूमधूमलाः ॥ २० ॥ भौमांतरिक्षदिव्याना
मुत्पातानामतिव्रजं ॥ अवलोक्य भृशं त्रस्ताः सर्वे नगरवासिनः ॥ २१ ॥ निवेदयामा

॥ल॥ कुरमीभंडाय प्रथितौजसे ॥ स च भंडः प्रचंडोग्रानेकरूपानकदंबकैः ॥ २२ ॥ असंजात
॥९७॥ धृतिभ्रंशो मंत्रस्थानमुपागमत् ॥ मेरोरिव वपुर्भेदं बहुरत्नविचित्रितं ॥ २३ ॥ अध्या
समास दैत्येंद्रः सिंहासनमनुत्तमं ॥ स्फुरन्मुकुटरत्नानां रुग्तानां किरणोत्करैः ॥ २४ ॥
दीपयन् रिवलाशांतान् धृष्टषट्ट्रानवेश्वरः ॥ शतयोजनविस्तारे महसांस्थानमंडले
॥ २५ ॥ तुंगसिंहासनस्थं तं निषेवाते तदानुजौ ॥ विशुक्रश्च विषंगश्च महाबलपराक्र
मौ ॥ २६ ॥ त्रैलोक्यकंटकीभूतभुजदंडभयंकरौ ॥ अग्रजस्य सदैवाज्ञामविलंघ्य
मुहुर्मुहुः ॥ २७ ॥ त्रैलोकविजये लब्धं वर्धयंतौ महद्यशः ॥ नतेन शिरसा तस्य म ॥श्री॥
र्दितोपादपीठकं ॥ २८ ॥ कृतांजलिप्रमाणौ च समुपाविशतां भुवि ॥ अथ स्थानस्थि ॥९७॥
ते तस्मिन् अमरद्वेषिणां वरे ॥ २९ ॥ सर्वे सामंतदैत्येंद्रास्तं द्रष्टुं समुपागताः ॥ तेषा

वमहावह्निशिखामत्यंतपावनी ॥ १०० ॥ आशीर्वादेन महता वर्धयामासरुत्त
माः ॥ तैः स्तूयमाना ललिता प्रचचाल रथोत्तमे ॥ १०१ ॥ भंडासुरं विनिर्जेतुं सुहृद्भिः
सहस्रेनिकैः ॥ १०२ ॥ इति श्री ब्रह्मांडपुराणे उत्तरभागे ललितोपाख्याने श्रुधखंडे
हयग्रीवागस्त्यसंवादे गिरिचक्रपर्वदेवताप्रकाशनं नाम पंचदशोध्यायः ॥ १५ ॥ ह
यग्रीव उवाच ॥ आकर्ण्य ललितादेव्या यात्रानिःसाणनिस्वनं ॥ महांतं क्षोभ
मायाता भंडासुरपुरालयाः ॥ १ ॥ यस्तत्रासीद्दुराशस्य भंडदैत्यस्य दुर्धियः ॥ महेंद्र
पर्वतोपांते महार्णवतटे पुरं ॥ २ ॥ तत्तु शून्यकनाम्नैव विख्यातं भुवनत्रये ॥ विषं
गाग्रजदैत्यस्य सदावासः किलाभवत् ॥ ३ ॥ तस्मिन्नेव पुरे तस्य शतयोजनविस्त
रे ॥ विनेशुरसुराः सर्वे श्रीदेव्यागमसंभ्रमात् ॥ ४ ॥ शतयोजनविस्तीर्णे तत्सर्वेपु

॥ ९८ ॥ स्मान्विजेष्यति ॥ तर्हि पल्लवभंगेश्च पाषाणस्य विदारणं ॥ ३८ ॥ उच्यमानमिदं हंत परि
॥ ९८ ॥ हासाय कल्पते ॥ विडंबना न किमसौ लज्जाकरमिदं न किं ॥ ३९ ॥ अस्मत्सैनिकना
सीरभटेभ्योपि भवद्भियः ॥ को दिशीकत्वमापन्नाः शक्राद्यास्त्रिदिवौकसः ४० ब्रह्मा
द्यश्च निर्भिन्नविग्रहा महद्वायुधैः ॥ विष्णोश्चक्रकथा वासीद्वित्रस्त समहेश्वरः ॥
४१ ॥ अन्येषामिह का वार्ता दिक्पाः सर्वे पराजिताः ॥ अस्माकमिषुभिस्तीक्ष्णैरधृष्ये
रंगपातिभिः ॥ ४२ ॥ सर्वत्र विद्रुवमाणो दुर्मर्षा विविधाः कृताः ॥ तादृशानामपि महा
पराक्रमभुजोष्मणां ॥ ४३ ॥ अस्माकं विजयायाधः स्त्री काचिदपि धावती ॥ यद्यपि ॥ श्री ॥
तथाप्येषा नावमान्या कथंचन ॥ ४४ ॥ अस्योस्ति रिपुरात्मज्ञो नाममात्यो जिगी ॥ ९८
षुभिः ॥ तस्मात्तदनुसारणार्थं प्रेषणीयास्तु किंकराः ॥ ४५ ॥ सकचग्रहमाकृष्य सा

नेतव्या मदरोद्धता ॥ देव त्वदीयशुद्धांतवर्तिनीनां मृगीदृशां ॥ ४६ ॥ चिरेण चेद्रुका
भावं सा दुष्टा संश्रयिष्यति ॥ एकैकस्मान्नु भटादस्मत्सैन्येषु परिवर्तिनः ॥ ४७
शंकने परिवित्रस्तं त्रैलोक्यं सचराचरं ॥ अत्र देवस्य चित्तं तु प्रमाणमिति दानवः
४८ ॥ निवेद्य मंडदैत्याय कोधतस्य व्यवीरधत् ॥ विषंगस्तु महासत्वो विचारज्ञो
विचक्षणः ॥ ४९ ॥ इदमाह महादैत्यमग्रजन्मानमुत्थितं ॥ देव त्वमेव जानासि सर्व
कार्यमरिंदम ५० ननु तत्रापि बलवन्नीतिवर्त्म निवर्ततां ॥ सर्वं विचार्य कर्तव्यं
विचारः परमा गतिः ॥ ५१ ॥ अविचारेण यत्कर्म समूलमपकृंतति ॥ परीयकटके
चाराः प्रेषणीयाः प्रयत्नतः ॥ ५२ ॥ तेषां बलाबलं ज्ञेयं जयस्य सिद्धिमिच्छता ॥ चा
रचक्षुर्हि प्रज्ञः सदाशंकितमानसः ॥ ५३ ॥ अशंकिताकारवांश्च गुप्तमंत्रः समं

॥ल॥ त्रिषु ॥ षडुपायान्प्रयुंजानः सर्वत्राप्यहिते पदे ॥ ५४ ॥ विजयं लभते राजा नाजालोभं
॥९९॥ क्षुविनश्यति ॥ अविमृश्यैव यः कश्चित् आरंभस्य विनाशकः ॥ ५५ ॥ विमृश्य तु
कृतं कर्म विशेषाज्जयदायकं ॥ तिर्यगित्यपि नारीति क्षुद्र इत्यभिराजभिः ॥ ५६ ॥
कार्या वैरिणि नावज्ञा शक्ते सर्वत्र संभवात् ॥ स्तंभोत्यन्तेन केनापि नरतिर्यग्वपुर्धृ
ता ॥ ५७ ॥ भूतेन सर्वभूतानां हिरण्यः करकोहतः ॥ पुरा हि चंडिका नाम नारी माया
विजृंभिणी ॥ ५८ ॥ निशुंभशुंभौ महिषं व्यापादितवती रणे ॥ न त्वसंगेन वहवस्त
था देत्या विशिनाः ॥ ५९ ॥ अतो वदामि नावज्ञा स्त्रीमात्रे क्रियतां क्वचित् ॥ शक्ति ॥श्री॥
रेव हि सर्वत्र कारणं विजयश्रियः ॥ ६० ॥ शक्तिराधारतां प्राप्ता स्त्रीपुंलिंगैर्न नूभ ॥९९॥
यं ॥ शक्तिस्तु सर्वतो भाति संसारस्य स्वभावतः ॥ ६१ ॥ अहितस्य दुराशयाः प्रवृत्तिर्ज्ञायतां तया

मेकैकदैत्यानां गणना न हि विद्यते ॥ २० ॥ स्वस्वनामसमुच्चार्यैप्रणेमुः शून्यकेश्व
रं ॥ स च तान्सकरान्सर्वान्नतिधारकनीनिकैः ॥ २१ ॥ संभावयंस्तमालोक्य कियं
तं विलक्षणो स्थितः ॥ अवोचत विशुक्रस्तमग्रजं दानवेश्वरं ॥ २२ ॥ मपमानमहा
सिंधुसमानगल्लनिस्वनः ॥ देव त्वदीयदोर्दंडविध्वस्तबलविक्रमाः ॥ २३ ॥ पा
पिनः पामराचारा दुरात्मानः कुराधमाः ॥ शरण्यमन्यतः क्वानाप्नुवंतो विषादिनः
॥ २४ ॥ ज्वलज्ज्वालाकुले वह्नौ पतिता नाशमागताः ॥ तस्मात् दैवात्समुत्पन्ना काचित्स्त्री
बलगर्विता ॥ २५ ॥ स्वयमेव किलास्माकं क्षीणान्देवान्वासवादिकान् ॥ तैः पुनः प्र
बलोत्साहैः प्रोत्साहितपराक्रमा ॥ २६ ॥ बहुस्त्रीपरिवारा च विविधायुधमंडिता ॥
अस्मान् जेतुं किलायाति ह्याकष्टं विधिवैशसं ॥ २७ ॥ अबलानां समूहश्चेत् बलिनो

केयं कस्मात्समुत्पन्ना किमाचारा किमाश्रया ॥ ६२ ॥ किंबला किंसहाया वा देव
तत्प्रविचार्यतां इत्युक्तस्सचिवं प्रोचे मनीतिकर्मविदामुना ॥ ६३ ॥ अवज्ञाभ्रुकुटिं
चक्रे स्त्रीति हेलापरायणः अरे नीतिविचारोयं समस्तेषु शत्रुषु ॥ ६४ ॥ युज्यते
वनितायां तु को विचारो महीयसां ॥ अस्मत्कुले महासत्वा अक्षौहिण्यधिपाश्च
ते ॥ ६५ ॥ पातुं समस्तजलधिन् अलं दग्धुं च विद्विषान् ॥ अरे पापसमाचार किं
वृथा शंकसे स्त्रियं ॥ ६६ ॥ तत्सर्वं हि मया पूर्वं चारद्वारावलोकितं ॥ अग्ने समु
द्युता काचित् ललिता नामधारिणि ॥ ६७ ॥ यथार्थनामवत्येषा पुष्पवत्ये शलाक
ति ॥ न सत्वं न च दोर्वीर्यं न संग्रामेषु वागतिः ॥ ६८ ॥ अश्वा विचारनिव हाल्किं तु मा
यापरायया ॥ न तत्सत्वेनाविद्यमाने स्त्रीकदंबकमात्मनः ॥ ६९ ॥ उत्पादितवती

॥ लु ॥ किंचित्तेन सर्वं विचेष्टते ॥ अथवा भवदुक्तेन न्यायेनास्त्कमहद्बलं ॥ ७० ॥ त्रैलोक्यलं
॥ १०० ॥ घिमहिमा भंडः केन विजिष्यते ॥ इदानीमपि मद्भाङ्कु बलसंसर्वं मूर्छिताः ॥ ७१ ॥ श्वसि
तचाति परवोन कदाचन नाकिनः ॥ केचित्पातालगर्भेषु केचिदंबुधिवारिषु ॥ ७२ ॥
केचिद्दिगंतकोणेषु केचित्कुंतेषु भूभृतां ॥ निलीना भद्भाविव रत्तात्यक्तदारसुतस्त्रि
यः ॥ ७३ ॥ भ्रष्टाधिकाराः प्रभवः छन्नवेषाश्चरंतिके ॥ नादृशेन — — जातिमम
वातुपराक्रमं ॥ ७४ ॥ अबला न चिरोत्पन्ना तेनैषा दर्पमश्नुते ॥ नजानंति स्त्रियो मू
ढा दृष्टाकल्पितसाहसाः ॥ ७५ ॥ विनाशमनुधावंति कार्याकार्यविमोहिताः ॥ अ ॥ श्री ॥
धवानां पुरस्कृत्य यद्या गच्छंति नाकिनः ॥ ७६ ॥ यक्षा महोरगा ज्ञिह्मद्याः साध्या वा ॥ १०० ॥
युयदुर्मताः ब्रह्मा वा पद्मनाभो वा रुद्रो वा सस्कराधिपः ॥ ७७ ॥ अन्ये वाहहरिनांना

धास्तेषांवेद्मुमहंप्रभुः ॥ अथवाममसेनाक्षःसेनान्योरणदुर्मदाः ॥ ७८ ॥ पक्षककर्कि
कापेषमिवपेष्येंतिवैरिणो ॥ कुटिलाक्षःकुरुंडश्चकरंकःकाकवासिनः ॥ ७९ ॥
वज्रदंतोवज्रमुखोवज्रलोमावलाहकः ॥ सूचीमुखःपादमुखोविकर्णोविक
टाननः ॥ ८० ॥ करालाक्षःकरटकोदमनोदीर्घजिह्वकः ॥ कुंभकोकुल्लुमल्लश्च
कलसःकल्किवाहनः ॥ ८१ ॥ वुल्कसपुंड्रकेतुश्चचंडबाहुश्चकक्कुरः ॥ जंबुका
क्षोजंभनश्चतीक्ष्णशृंगःत्रिकंटकः ॥ ८२ ॥ चंद्रगुप्तश्चतुबीकुश्चकोराक्षःश्चतु
स्थिराः ॥ वज्रघोषश्चोर्ध्वकेशोमहामायोमहाहनुः ॥ ८३ ॥ मखशत्रुर्मखास्कंदी
सिंहघोषःसिगालकः ॥ अंधकःसिंधुनेत्रश्चकूपकःकूपलोचनः ॥ ८४ ॥ गुहासो
गंडगल्कश्चचंडवर्मायमांतकः ॥ लक्षणःपदसेनश्चपुरुजित्सर्वमारकः ॥ ८५ ॥

॥ल॥ स्वर्गशत्रुः स्वर्गबलो दुर्गाख्यः स्वर्गकंटकः ॥ अनिमायो ब्रहन्मायैः ऊपमायउल्क
॥१०१॥ जित ॥८६॥ पुरुषेणो विषेणश्च कुंतिषेयः कुरूपकः ॥ मंत्रदर्शकश्शूरश्च मंगलोद्य
घणस्तथा ॥८७॥ कोलाटः कुटिलाश्वश्च दाशेरो बभ्रुवाहनः ॥ धूम्रहासो धूम्रके
तुः परिक्षिल्यापकंचुकः ॥८८॥ महामोहो महाहासो ह्रदो दुर्मतिः स्वर्णमेजयः ॥ शठके
तुः शठवक्त्रः शठदत्तः शठप्रियः ॥८९॥ दुःशागो दुर्विनीतश्च भिन्नकर्कश्च मूर
कः ॥ अट्टहासी महाहासी महाहासिश्च मदोल्कटः ॥९०॥ कुंभोल्कचः कुंभनासः कुं
भग्रीवः कुटोदरः ॥ हास्तिमेढ्रो महांडश्च कुंभांडः पूतिनाशिकः ॥९१॥ पूतिदंतः ॥श्री॥
पूतिचक्षुः पूत्यास्यः पूतिमेहनः ॥ इत्येवमादयः शूरा हिरण्यकशिपोः समाः ॥९२॥ ॥१०३॥
१३५॥ तासना ॥ भंडस्य तनयान्दुष्टान्नूअभ्यद्रवदरिंदमा ॥ २ ॥ तस्याः प्रीतिस्विकं सै
न्यं कुमार्या नहि वर्त्तते ॥ सर्वेहि ललितासैन्यं तत्सैन्यं समजायत ॥ ३ ॥ ततः प्रववृ
ते युद्धमत्यद्भुतपराक्रमं ॥ ववर्ष शरजालानि दैत्येंद्रेषु कुमारिका ॥ ४ ॥ भंडासुर
कुमारैस्तैर्महाराज्ञीकुमारिका ॥ यद्युद्धमतनोत्तत्तु स्पृहणीयं सुरासुरैः ॥ ५ ॥
अत्यंतविस्मितादैत्यकुमारानववर्षिणीं ॥ कर्णीरथस्थामालोक्य किरंतीं शर
मंडलं ॥ ६ ॥ क्षणक्षणे तु बालायाः क्षीयमाणं महारणं ॥ व्यजिज्ञियन्महाराज्ञीं प्रश्रा श्री॥
द्याः परिचारिकाः ॥ ७ ॥ मंत्रिणी दंडनाथे ते विस्मयेन रणं त्यजे। प्रेक्षकत्वमनुप्राप्ते ॥१३५
तूष्णीमेव बभूवतुः ॥ ८ ॥ सर्वेषां दैत्यपुत्राणामेकरूपा कुमारिका ॥

प्रत्येकभिन्नादहृशेबिंबमालेवभास्वतः ॥ ९ ॥ सायकैरग्निचूडालैस्तेषांमर्मणिभिंदती ॥
आश्चर्यमहत्तिव्योम्निपश्यतांत्रिदिवौकसां ॥ १० ॥ साधुवादैर्बहुविधैर्मंत्रिणीदंडनाथ
योः ॥ अर्च्यमानारणंचक्रेलघुहस्ताकुमारिका ॥ ११ ॥ द्वितीयेयुद्धदिवसंसमस्तमसारणे ॥
प्रकाशयामासबलंललिताइहितानिजं ॥ १२ ॥ अस्त्रप्रत्यस्त्रमोक्षेयातानत्सर्वानपि
भिंदती ॥ रक्तोत्पलमिवक्रोधसंरक्तंबिभ्रतीमुखं ॥ १३ ॥ नारायणास्त्रमोक्षेणमहारा
ज्ञीकुमारिका ॥ त्रिंशत्यक्षौहिणीसैन्यंभस्मसादमतीन्क्षणात् ॥ १४ ॥ अक्षौहिणीनां
क्षयतः क्षणात्कोपमुपागताः ॥ आकृष्ययुयाधन्वानस्तेपतन्नेकहेलया ॥ १५ ॥ ततःकि
लकिलेजातेशक्तीनांचदिवौकसां ॥ युगपत्त्रिंशतंबाणानसृत्साकुमारिका ॥ १६ ॥
हस्तलाघववत्याथमुक्तैश्चंद्रार्कसायकैः ॥ त्रिंशतात्रिंशतांमुंडपुत्राणामाहतंशिरः ॥ १७ ॥

॥ ल ॥ इति भंडस्य पुत्रेषु प्राप्तेषु यमसादनं ॥ अत्यंतविस्मयाविष्टा ववर्षुः पुष्पममरगाः
॥ ३२८ ॥ १८ ॥ सा च पुत्रीं महाराज्ञा विध्वस्तासुरसैनिका ॥ मंत्रिणीदंडनाथाभ्यामालिंग्यत
भृशं मुदा ॥ १९ ॥ तस्याः पराक्रमोन्मेषैः नृत्यंतो जयदायिभिः ॥ शक्तयस्तुमुलं चक्रुः
साधुवादैर्जगत्त्रयं ॥ २० ॥ सर्वाश्च शक्तिसेनान्यो दंडनाथपुरःसराः ॥ तदाश्चर्यं महारा
ज्ञै निवेदयितुमागताः ॥ २१ ॥ सिंहासनस्थितां देवीं दृष्ट्वा नेत्रैः स्मयान्विताः ॥ कुमारि
काकृतं कर्म विनिवेद्य पुनर्गताः ॥ २२ ॥ ताभिर्निवेद्यमानानि सा देवी ललितांबिका ॥
पुत्र्या भुजापदानानि श्रुत्वा प्रीतिं समाययौ ॥ २३ ॥ अंके पुत्रीं समारोप्य त्यस्य स्पृशत्याणि ॥ श्री ॥
नावपुः मूर्ध्युपाघ्राय सादेवीत्यानंदाश्रूण्यवमुंचत ॥ २४ ॥ समस्तमपि तच्चक्रं शक्तीनां त ॥ ३२८ ॥
त्पराक्रमैः अदृष्टपूर्वैर्दैत्येषु विस्मयस्य वशं गतं ॥ २५ ॥ इति श्री० भंडपुत्रवधो नाम० २३

हयग्रीव उवाच ॥ अथ पुत्रेषु नष्टेषु शोकानलपरिप्लुतः ॥ विललाप स दैत्येंद्रो मत्वा जा
तं कुलक्षयं ॥ १ ॥ हा पुत्र हा गुणोदारा हा मदेकपरायणाः ॥ हा मल्लेत्र स्कधाप्रा हा मम
त्कुलवर्धनाः ॥ २ ॥ हा समरस्त रूरथश्रेष्ठ मंद भंजनतत्पराः ॥ ३ ॥ मन्मथाः ॥ दिशत प्रतिवा
चं मे ममाके वत्सा ताधुना ॥ किमु दीनमिमं तात मय्यमत्य दिवं गताः ॥ ४ ॥ युष्मान्विना न शो
भंते मम राज्यानि पुष्पकाः ॥ रिक्तानि मम गेहानि रक्ता राजसभापि मे ॥ ५ ॥ कथमेव हि निः
शेषं हता यूयं दुराशयाः ॥ अप्रधृष्यभुजा सत्वान्भवतो मत्कुलांकुरान् ॥ ६ ॥ कथमेकपदे
दुष्टा वनिता संगरे वधीत् ॥ मम निष्ठानि सौख्यानि मम नष्टा कुलश्रियः ॥ ७ ॥ हतः परं कुतो
वीक्ष्ये सहासानि मुखानि वः ॥ भवंतः स्म कृते लब्धा मम पूर्वजनः कृते ॥ ८ ॥ नाशोयं भवतां
मेघ जातो नष्टस्ततोस्म्यहं ॥ हा हतोस्मि विपन्नोस्मि मंदभाग्योस्मि पुत्रकाः ॥ ९ ॥ इति

॥ल॥ शोकात्स परितः प्रलपन्मुक्तकुंतलः॥ मूर्छया लुप्तहृदयो निपपात नृपासनात् १०
॥१३७॥ विशुक्रस्य विषंगश्च कुटिलाक्षश्च संसदि॥ भंडमाश्वासयामासुर्दैवस्य कुटिलैः क्रमैः
११॥ विशुक्र उवाच॥ देव किं प्राकृत इव प्राप्तः शोकस्य वश्यतां॥ लपसि त्वं प्रतिस्फुता
न्न प्राप्त मृत्यून्न महाहवे॥१२॥ धर्मपापिं धमः पंथा वीराणामेव शाश्वतः॥ अशोच्य
माहवे मृत्युं प्राप्नुवंति यदर्हितं॥१३॥ एतदेव विनाशाय शल्यवद्बाधते मनः॥ यस्त्रीस
मागत्य हत्वा निर्हंति स्म भटान् रणे॥१४॥ इत्युक्ते तेन दैत्येन पुत्रशोकविमुच्यतां॥ भंडेन चंड
कालाग्नि सदृश क्रोध आददे॥१५॥ सनीत्व स्पर्शे उधून्वन् खड्गमुग्र यमोपमं॥ विस्फा ॥श्री॥
रिताक्षियुगला भृशं जज्वालते जसा॥१६॥ इदानीमेव तां दुष्टां खड्गेनानेन खंडशः॥ ॥१३७॥
शकली कृत्य समरे शमं प्राप्या मि बंधुभिः॥१७॥ इति रोषस्वलद्धूर्णः स्वसन्निवभुजं

गमः ॥ खड्गं विधून्वन्नुत्थाय प्रचचालातिमत्तवत् ॥ १८ ॥ तन्नूनिरुध्य च संभ्रातास
र्वे दानवपुंगवाः ॥ वाचमूचुररातिघ्नो धाज्वलंतो ललितां प्रति ॥ १९ ॥ न तदर्थे त्वया का
र्यं स्वामिन्संरंभ ईदृशः ॥ अस्माभिः सकलैर्युक्तैः रणोत्साहो विधीयते ॥ २० ॥ भवदाज्ञा
फलं प्राप्य समस्तं भुवनेहृदात् ॥ विमर्दयितुमीशास्मः किमुतां मुग्धभामिनीं ॥ २१ ॥
किं शोषयामः सप्ताब्धीन्भक्षयामो महागिरीन् ॥ अधरोत्तरमेवैतत् त्रैलोक्यं सचरा
चरं ॥ २२ ॥ भिनदाम सुरान्सर्वान्भिनदाम सुरालयात् ॥ पिनध्याम हरित्यालान्
आज्ञां देहि महामते ॥ २३ ॥ इत्युदीरितमाकर्ण्य महाहंकारगर्वितं ॥ उवाच वचनं भ
ण्डः प्रतिघारुणलोचनः ॥ २४ ॥ विशुक्र भवता गत्वा मायां तस्थितवर्ष्मणी ॥ जयवि
घ्नं महायंत्रं कर्त्तव्यं कटके द्विषां ॥ २५ ॥ इति तस्य वचः श्रुत्वा विशुक्रो रोषदूषिताः

॥ल॥ मायात्तिरोहितवपुः जगाम ललिताबलं ॥२६॥ अस्मिन्प्रपातुमुद्युक्ते सूर्यास्तंस
॥३३८ समुपागतः ॥ पर्यस्तकिरणस्तोमपाटलीकृतदिङ्मुखः ॥२७॥ अनुरागवती संध्या
प्रयातभानुमालिनं ॥ अनुदुद्राव तरसा कुंजे रंतुमिवोत्सुका ॥२८॥ वेगात्प्रपततो
भानोर्देहसंघात्समुत्थिताः ॥ चरमाब्धेरिव पयःकणास्तारा विरेजिरे ॥२९॥ अथास
सावतुबलं तमःकज्जलकालभं ॥ सात्यं कर्तुमिवोद्युक्तं सवर्णस्यास्य दुर्धियः ॥३०॥
मायारथं समारूढो गाढशार्वरसं पुनः ॥ अदृश्यवपुरापेदे ललिताकटकं खलः ॥३१॥
तत्र गत्वाज्वलज्ज्वालवह्निप्राकारमंडलं ॥ शतयोजनविस्तारमालोक्य तद्दुर्मतिः ॥श्री॥
॥३२॥ परितो विभ्रमंस्तालंमवकाशमवाप्तवान् ॥ दक्षिणद्वारमासाद्य निरुध्यो ॥३३८
क्षणमुद्धतः ॥३३॥ तत्रापश्यन्महासत्त्वा सावधाना धृतायुधाः ॥

आरूढयाना सन्नद्धवर्मणो द्वारदेशतः ॥ स्तंभीनीप्रमुखाः शक्तिः विंशत्यक्षो
हिणीयुताः ॥ सर्वथा द्वाररक्षार्थं निर्दिष्टा दंडनाथया ॥ विलोक्य विस्मयाविष्टश्चिं
तयित्वा चिरं तथा ॥ ३५ ॥ सालस्य बहिरेवासौ स्थित्वा यंत्रं समातनोत् ॥ गव्यूति
मात्रकायामे स्तत्समानप्रविस्तरे ॥ ३६ ॥ शिलापट्टे स्म महति प्रालिखे द्यंत्रमुत्त
मं ॥ अष्टदिक्ष्वष्टशूलेन संहाराक्षरमौलिना ॥ ३७ ॥ अष्टभिर्दैवतश्चापि युक्तं यं
त्रं समालिखत् ॥ अलसारूपणादीना निद्रा तंद्रा प्रमीलिका ॥ ३८ ॥ क्लीं बाधनि
रहंकारा इत्यष्टौ देवताः स्मृताः ॥ देवताष्टकमेतच्च शूलाष्टकपुटोपरि ॥ ३९ ॥ नि
योज्य निखिलं यंत्रं मायाविनममंत्रयत् ॥ पूजां विधाय यंत्रस्य बलिभिश्छाग
आमिभिः ॥ ४० ॥ तद्यंत्रं वैरिनिकटे प्राक्षिपत्स महासुरः ॥ प्रासादस्य बहिर्भाग

॥रु॥ वर्त्तिनातेन दुर्धिया ॥ ४१ ॥ क्षिप्तमुल्लंघ्यावरणं पपात करकांतरे ॥ तद्दृष्टेत्रस्य विका
॥१३९॥ रेण करकस्थास्त्रशंकया ॥ ४२ ॥ विमुक्तशस्त्रसंन्यासमास्थितादीनमानसा ॥ किं
हतैरस्त्रैः कार्यं शस्त्राशस्त्रिक्रमेरलं ॥ ४३ ॥ जयसिध्या फलं किंवा प्राणिहिंसा
च पापदा ॥ अमराणां कृते कार्ये किमस्माकं भविष्यति ॥ ४४ ॥ इत्थाकलकलं कृत्वा
न फलं युद्धकर्मणा ॥ कारवामिनी महाराज्ञी कावा सा दंडनायिका ॥ ४५ ॥ का वा स
मंत्रिणी श्यामा भृत्यत्वं नोथ कीदृशं ॥ ईहसर्वाभिरस्माभिर्भृत्यभूताभिरेरिको ॥ ४६ ॥
षसितांस्वामिनीं कृत्य किं फलं नो भविष्यति ॥ परेषां मर्मभिद्भूरैरायुधैर्नः प्रयो ॥श्री॥
जनं ॥ ४७ ॥ युद्धं शाम्यतु चास्माकमंगेशस्त्रक्षतप्रदं ॥ युद्धे च मरणं भावि दृष्टथास्मु ॥१३९॥
जैर्वितानन ॥ ४८ ॥ युद्धमृत्युर्भवेत्स्वर्ग इति तत्रभ्रमेव का ॥ उत्साहेन फलं नास्ति

निद्रैवैकाकरवावहा ॥ ४९ ॥ आलस्यसदृशंनास्ति चित्तविश्रांतिदायकं ॥ एतादृ
शीचनोज्ञात्वासा राज्ञीकिंकरिष्यति ॥ ५० ॥ तस्याराज्ञीत्वमपिनः समवायेनक
ल्पितं ॥ एवंचोपेक्षितेस्माभिः सापिनष्टबलाभवेत् ॥ ५१ ॥ नष्टसत्वाचसाराज्ञी
कान्नुशिक्षांकरिष्यति ॥ एवमेवरणारंभं विमुच्यविमलाशयाः ॥ ५२ ॥ शक्तयोनिद्र
याधुरंघूर्णमानाइवाभवन् ॥ सार्वभौमांघ्रकार्येषु महदालस्यमागतं ॥ ५३ ॥ शिथि
लंचाभवत्सर्वशक्तीनांकटकंमहत् ॥ जयविघ्नमहायंत्रमिति ज्ञात्वासदानवाः ॥ ५४ ॥
निर्विघ्नंतत्प्रभावेनकटकंप्रममंदिषुः ॥ द्वितीययुद्धदिवसस्यार्धरात्रेगतेसति ॥ ५५ ॥
निवृत्यनगरंभूयस्त्रिंशदक्षौहिणीयुतः ॥ आजगामपुनर्दैत्यो विशुक्रः कटकंवि
षा ॥ ५६ ॥ अश्रूयततस्तेतस्य रणानिःसाणनिःस्वनः ॥ तथापितानिरुद्योगाः शक्त

॥ल॥ यः करके भवन् ॥५७॥ ततो महानुभावत्वाद्विकारैर्विघ्नयंत्रजैः अस्पष्टे मंत्रि
॥१८०॥ णी दंडनाथे चिंतामवापतुः ॥५८॥ अहो बत महत्कष्टमिदमापतितं भयं क
स्य बाधविकारेण सैनिका निर्गतोद्यमाः ॥५९॥ निरस्तायुधसंभारा निद्रातंद्रा
विघूर्णिताः ॥ न मानयंति वाक्यानि नार्चयंति महेश्वरीं ॥६०॥ औदासिन्ये वितन्वं
ति शक्तयो निस्पृहा इमाः ॥ इति ते मंत्रिणी दंडनाथे चिंतापरायणे ॥६१॥ चक्रस्यंद
नमारूढे महाराज्ञीं समूचतुः ॥ मंत्रिणीयवाच ॥ देवी कस्य विकारोयं शक्तयो विग
तोद्यमाः ॥६२॥ नश्यंत्येवं तिमहाराज्ञि नवाज्ञां विश्वपालितां ॥ अन्योन्यं च विरक्तास्ताः ॥श्री॥
पराच्यः सर्वकर्मसु ॥६३॥ निद्रातंद्रीमुकुलिता दुवाक्यानि वितन्वते ॥ कादंबिनी मंत्रिणीका ॥१८०॥
महाराज्ञी चकापुनः ॥६४॥ युद्धं च कीदृशमिति क्षेपं भूरि वितन्वते ॥ अस्मिन्नेवांतरे शत्रुरागच्छति महाबलः ॥६५॥

उदंडैर्भेरीनिःस्वानैर्विभिंदंतीव रोदसी ॥ अत्रयत्यामहरूपं तत्र महाराज्ञी प्रपद्यतां
६६ ॥ इत्युक्त्वा सहदंडिन्या मंत्रिणी प्रणतिं व्यधात् ॥ ततः सा ललिता देवी कामेश्वर
मुखं प्रति ॥ ६७ ॥ दत्तदृष्टिः समहसत् इति व्यकरत्तौ चली ॥ तस्याः स्मितप्रभापुंजात्कुं
जराकृतिमान्मुखं ॥ ६८ ॥ कटक्रोडगलद्दानः कश्चिद्देवो व्यजृंभत ॥ जपापटलल्वैपोर्दं
पाटच्चरवपुर्द्युतिः ॥ ६९ ॥ बीजापुरं गदामिक्षुचापं शूलं सुदर्शनं ॥ अब्जपाशोत्पलव्री
हिमंजरीस्फुरदंकुशान् ॥ ७० ॥ रत्नकुंभं च दशभिर्हस्तैः सैकैः समुद्वहन् ॥ तुंदिलश्चंद्र
चूडालो मंदबृंहितनिस्वनः ॥ ७१ ॥ सिद्धलक्ष्म्या समाश्लिष्टः प्रणनाम महेश्वरीं ॥ तया
कृताशीः स महान् गणनाथो गजाननः ॥ ७२ ॥ जयविघ्नमहायंत्रं भेत्तुं वेगाद्विनिर्ययौ ॥
अंतरेवह्निसालस्य भ्रमद्दंताचलाननः ॥ ७३ ॥ निभृतं कुत्रचिल्लग्नं जयविघ्नं विलोक

॥ग॥ यन्॥ स देवो घोरनिर्घातदुःसहैर्दंतपातनैः॥७४॥ क्षणाच्चूर्णीकरोतिस्म जयविघ्नम
॥१४३॥ हाशिलां॥ तत्र स्थिताभिर्दुर्गाभिर्देवताभिः सहैव सः॥७५॥ परागशेषतां नीत्वा तद्यंत्रं
प विशीर्णहृद्वि॥ ततः किलकिलारावं कृत्वास्त्रस्य विघर्जिताः॥७६॥ उद्यताः समरं कर्तुं शक्त
यःशास्त्रपाणयः॥ सदंतिवदनःकेरगलिताकुंठनिःस्वनः॥७७॥ स सर्जस्म बहूनात्मरू
पान् दंतावराननान्॥ ते करक्रोडविगलन्मदकैर्ज्वलचंचले॥७८॥ चंचरीककुलैरग्रे
गीयमानमहोदयाः॥ स्फुटद्दाडिमकिंजल्कविक्षिप्तकररोचिषः॥७९॥ समवाराकरानेव
हेलयापातुमुद्यताः॥ आमोदप्रमुखाबुद्धिमुख्यशक्तिनिषेविताः॥८०॥ आमोदश्चप्र ॥श्री॥
मोदश्च सुमुखो दुर्मुखस्तथा॥ विघ्नश्च विघ्नकर्ता च षडेते विघ्ननायकाः॥८१॥ एसप्त ॥१४३॥
कोटिसंख्यानां हेरंबानामधीश्वरा॥ ते पुरश्चलितास्तस्य महागणपतेरणे॥८२॥ अग्नि

प्राकारवलयाद्दृनिर्गत्य गजाननः ॥ क्रोधहुंकारतुमुलः प्रलयध्वनदानवान् ॥ ८३ ॥
त्रिंशदक्षौहिणीयुक्तं विधुकं शक्रशासनं ॥ अवाकिरच्छरस्तोमैरिक्षुधन्वसुखच्युतैः ॥
॥ ८४ ॥ ततः प्रचंडटंकारबधिरीकृतविष्टपः ॥ पपात दैत्यसैन्येषु गजवक्त्रचमूगयाः
॥ ८५ ॥ अच्छिदग्निशितैर्बाणैर्गणनाथः स दानवान् ॥ गर्जितानि रुरुघोराणि कृ
त्वा कृत्वा च दानवान् ॥ ८६ ॥ गणनाथेन तस्याथ हृद्विधुक्रस्य महौजसः ॥ युद्धमुद्दंडटं
कारभिन्नकार्मुकनिस्वनं ॥ ८७ ॥ भ्रुकुटीकुटिलवक्त्रं दर्शीक्षमतिपाटलं ॥ विधुक्रोयु
धि क्षिप्राणः समयुध्यत तेन सः ॥ ८८ ॥ शस्त्रसंघट्टनिस्वानैर्हुंकारैश्च स्फुरद्द्विषां ॥
दैत्यसप्तिखुरक्षोडकुद्दालीकृदनिःस्वनैः ॥ ८९ ॥ फूत्कारैश्च गजेंद्राणां भट्टानां क्रं
दनैरपि ॥ हेषया च हयश्रेण्या रथचक्रस्वनैरपि ॥ ९० ॥ धनुर्ज्यागुणनिस्वानैश्च क्रचात्का

॥ल॥ रथैरपि॥ शरशात्कारघोषैश्च वीरभाषाकदंबकैः॥९१॥ अट्टहासैर्भटेंद्राणां सिंह
॥३४२ नादैश्च भूरिशः॥ क्षुभ्यदिगंबरं तत्र ववृधे युध्दमुध्दतं॥९२॥ त्रिंशदक्षौहिणीसे
नां विशुक्रस्य दुरात्मनः॥ प्रत्येकं पातयामास्कः गणनाथमहा[illegible]ः॥९३॥ दंतैर्भमवि
भिंदंतो वेष्टयंतश्च शुंडया॥ प्रोथयंतः कर्णतालैः पुष्कलावर्त्तकोपमैः॥९४॥ नासाश्वा
सैश्च षडषैर्विक्षिपंतः पताकिनीं॥ उरोभिर्मर्दयंतश्च शैलवक्षसमप्रभैः॥९५॥ पीडयं
तश्च पदाघातैर्विनिघ्नंस्तैस्तथोदरैः॥ विभिंदंश्च शृत्लेन कुर्वंतश्च पातनैः॥९६॥ शंख
स्वानेन महता पीडयंतो वरूथिनीं॥ गणनाथमुखोद्भूतजैर्गजैर्वक्रसहस्रशः ॥श्री॥
॥९७॥ धूलिशेषं समं रक्तं तरक्यं च क्रमेदोद्धताः॥ अथ क्रोधसमाविष्टो निज ॥३४२
सैन्यपुरोगमं॥ प्रेषयामास देवस्य गजास्करमसो पुरः॥९८॥ - - -

प्रचंडसिंहनादेन गजदैत्ये दुर्धिया ॥ सहाक्षौहिणियुक्तेन युयुधे स गणेश्वरः ॥ ९९ ॥
क्षीयमानं समालोक्य गजासुरभुजाबलं ॥ वर्धमानं च तद्वीर्यं विशुक्रस्पलायित ॥ १०० ॥
सरकरवधीरेंद्रः प्रचलन्नाखुवाहनः ॥ सप्ताक्षौहिणिकायुक्तं गजासुरममर्दयत्
॥ १०१ ॥ गजासुरे च निहते विशुक्रे च पलायिते ॥ ललितोतिकमापेदे महागणपतिर्मृ
धात् ॥ १०२ ॥ कालरात्रिश्च दैत्यानां सा रात्रिर्विरतिं गता ॥ ललिता चिमुदिता बभू
वास्य पराक्रमैः ॥ १०३ ॥ वितनार महाराज्ञी प्रीयमाणा महेशितुः ॥ सर्वदैवतपूजायाः
पूर्वपूज्यत्वमुत्तमं ॥ १०४ ॥ इति श्रीब्रह्मांडपुराणे उत्तरभागे ललितोपाख्याने युद्ध
खंडे हयग्रीवागस्त्यसंवादे गणनाथप्रादुर्भावतत्पराक्रमवर्णनं नाम द्वाविंशोध्या
यः ॥ २२ ॥ हयग्रीव उवाच ॥ रणे भग्ने महासत्वे भंडदैत्यः सहोदरं ॥ समग्रं कदनं प्राप्त

॥ ल ॥ संतप्तैर्बहुचिंतया ॥ १ ॥ उभावपि समेतौ तौ युक्तौ सर्वैश्च सैनिकैः ॥ प्रेषयामास युद्धा
॥ १४३ ॥ य भंडदैत्यः सहोदरौ ॥ २ ॥ तावुभौ परमक्रुद्धौ भंडदैत्येन दर्शितौ ॥ विषंगश्च विशु
श्री क्रौ महोद्यममवापतुः ॥ ३ ॥ कनिष्ठसहितं तत्र युवराजं महाबलं ॥ विशुक्र
मनुवव्राज सेना त्रैलोक्यकंपिनी ॥ ४ ॥ अक्षौहिणीचतुःशत्या सेनानामावृतश्च सः ॥
युवराजः प्रववृधे प्रतापेन महीयसा ॥ ५ ॥ उलूकजित्प्रभृतयो भागिनेया दशोद्ध
ताः ॥ भंडस्य ते भगिन्यां तु धूमिन्यां जातयौवनाः ॥ ६ ॥ कृतास्त्रशिक्षा भंडेन मातुलेन
महीयसा ॥ विक्रमेण विवल्गंतः सेनाथाः नो प्रतस्थिरे ॥ ७ ॥ उद्दंडचापनिर्घोषै ॥ श्री ॥
भीषयंतो दिशो दश ॥ द्वयोर्मातुलयोः प्रीतिं भागिनेया वितेनिरे ॥ ८ ॥ आरूढया ॥ १४३ ॥
नाः प्रत्येकं गाढाहंकारशालिनः ॥ आकृष्टगुरुधन्वानो विशुक्रमनुवव्रजुः ॥ ९ ॥

समग्र

यौवराज्यप्रधाविङ्गधैर्व्वचामकशोभितः ॥ आरूढवाहनः प्राप्तः विशुक्रो युद्धमेदिनीं

१० ॥ ततः किलकिलानादं कुर्वाणो सेनया वृतः ॥ विशुक्रः पटु दध्मानः सिंहना

दं भयंकरं ॥ ११ ॥ तत्क्षोभक्षुभितस्वांताः शक्तयः संभ्रमोद्धताः ॥ अग्निप्राकारवल

याभिर्जग्मुर्बद्धपंक्तयः ॥ १२ ॥ तद्विस्मयमिवाकाशं कुर्वत्यः शस्त्ररोचिषा ॥ रक्तांबुजवि

तमिव व्योमक्रोधारुणैर्मुखैः ॥ १३ ॥ अथ भंडकनीयांसावागतौ युद्धदुर्मदौ ॥ निशम्य

युगपद्योद्धुं मंत्रिणीदंडनायिके ॥ १४ ॥ गिरिचक्रं गेयचक्रमारूढे रथशेखरं ॥ धृता

तपत्रवलये चामरास्यां चवीजिते ॥ १५ ॥ अप्सरोभिः प्रवृत्ताभिर्गीयमानमहोदये ॥

निर्जग्मतू रणं कर्तुं सहाभ्यां ललिताज्ञया ॥ १६ ॥ श्रीचक्ररथराजस्य रक्षणार्थे नि

वेशिनां ॥ शताक्षोहिकां क्षेम सेनां वर्जयित्वास्त्रभीषणां ॥ १७ ॥ अन्यत्सर्वं च मूजा

॥ ल ॥ लं निर्जगाम रणोन्मुखं ॥ पुरतः शचलद्दंडनाथा रथनिषेदुषी ॥ १८ ॥ एकैव सा करांगु
॥ १४४ ॥ ल्या घूर्णयंती हलायुधं ॥ मुसलं चान्यहस्तेन भ्रामयंती मुहुर्मुहुः ॥ १९ ॥ नरलं दुकुला
चूडा स्फुरतोग्रमुखांबुजा ॥ इतस्ततः प्रचलिता सेनां त्रैलोक्यकंपिनी ॥ २० ॥ पश्यंती
मदिरापानवासिताधरपल्लवा ॥ पुरः प्रहर्त्री समरे सर्वदा विक्रमोद्यता ॥ २१ ॥ पोत्रि
णोपभ्रमरम्येण तस्या अनुप्रचलिता गेयचक्ररथस्थिता ॥ धनुषो ध्वनिना विश्वं पूर
छ् यंती मदोद्यैंता ॥ २२ ॥ वेणीकृतकचन्यस्त विलसच्चंद्रपल्लवा ॥ सुरक्ततीयनेत्रेण सिं
दूरतिलकत्विषा ॥ २३ ॥ पाणिनापभ्रमरम्येण मणिकंकणचारुणा ॥ तूणीरमुखतः ॥ श्री ॥
कृष्टं भ्रामयंती शिलीमुखं ॥ २४ ॥ जयवर्धस्व वर्धस्वेत्युक्तिहर्षसमाकुलैः ॥ नृत्यद्भि ॥ १६६ ॥
र्दिव्यमुनिभिः वर्धिताशीर्वचोमृतैः ॥ २५ ॥ गेयचक्ररथेंद्रस्य चक्रनेमिविघट्टनैः ॥ दा

रयंतीक्षितितलंदैत्यानांस्हदयैःसह ॥ २६ ॥ स्लोकान्तिशायिनाविश्वमनोमोहनकारिणा ॥
मीतिबंधेननारीभिःवह्नीभिर्गीतवैभवा ॥ २७ ॥ अक्षौहिणीसहस्राणामष्टकंसमर्द्दतं ॥ कर्ष रो
यंतीकल्पविश्लेषनिर्मर्यादाब्धिसंन्निभं ॥ २८ ॥ तस्याःशक्तिचमूचक्रेकाश्चित्कनकगोचि
षः ॥ अन्याःसिंदूररुचयःपीताःपाटलपाटलाः ॥ २९ ॥ काश्चिच्चंद्रिकोकारापराःकोमलकोम श्च
लाः ॥ अन्यास्तुहीरकप्रख्यापरागारुत्मतोपमाः ॥ ३० ॥ विशुद्धैःपंचभिर्बाणैर्मिश्रितैःश
तकोटिभिः ॥ व्यंजयंत्योदेहरुचिंकनिर्विद्धिविधायुधाः ॥ ३१ ॥ असंख्याःशक्तयश्चेलुःदं
डिन्याःसैनिकेतथा ॥ यथैवसैन्यसंनाहोमंत्रिण्याःकुंभसंभव ॥ ३२ ॥ यथाभूषणवेषा
दियथाप्राभवलक्षणं ॥ यथाभुजस्यविक्रांतिःयथैवाश्रितलक्षणं ॥ ३३ ॥ यथासर्वाघसं
हारोयथासर्वैश्वपूज्यता ॥ यथाभक्तिर्महाराज्ञीदंडिन्याश्चतथाखिलं ॥ ३४ ॥ विशेष

॥ल॰॥ स्तु परं तस्याः सचिवेश्याः परं करे ॥ महाराज्ञी वितीर्णं तद्राज्ञामुद्रांगुलीयकं ॥३५॥ इत्थं
॥२४५॥ प्रचलिते सैन्ये मंत्रिणीदंडनाथयोः ॥ तद्भारभंगुरा भूमिर्दोलालीलामलंबत ॥३६॥ धृत
तः प्रववृधे युद्धं तुमुलं रोमहर्षणं ॥ उद्धूतधूलिजंबाली भूतसप्तार्णवीजलं ॥३७॥ ह
यस्थैर्हयसादिन्यो रथस्था रथसंस्थितैः ॥ अधोरणैर्हस्तिपका पद्गैः पद्गाश्च संगताः ॥
३८॥ दंडनाथा विषंगेण समयुध्यत संगरे ॥ विशुक्रेण समं श्यामा वि[illegible]मणिकार्मुका
३९॥ अश्वारूढा च कारोच्चैः सहोल्कजिना रणं ॥ संपदेशि च जग्राह पुरुषेण
युयुत्सया ॥४०॥ कुंडिषेणेन समरं महामाया तदाकरोत् ॥ मलदेन समं चक्रे युद्ध ॥श्री॥
मुन्मत्तभैरवी ॥४१॥ लघुश्यामा च कारोच्चैः सभूरेण समं रणं ॥ स्वप्नेशी मंगलाख्ये ॥१४५॥
न दैत्येंद्रेण समं व्यधात् ॥४२॥ वाग्वादिनी तु जघटे द्रुघणेन समं रणे ॥ कोल्हाटेन

वक्रुहेनचंडकाल्यमकरोद्द्युयं॥४३॥अक्षौहिणीभिर्दैत्यानांशक्त्यक्षौहिणिकास्ततः
महांतंसमरंचक्रुः अन्योन्यक्रोधमूर्छिताः॥४४॥प्रवर्त्तमानेसमरेविशुक्रोदुहदान
वः॥वर्धमानांशक्तिचमूंक्षीयमाणांनिजांचमूं॥४५॥अवलोक्यरुषाविष्टः संकृष्ट
गुरुकार्मुकः॥शक्तिसैन्येसमस्तेपितृषास्त्रंप्रमुमोचह॥४६॥तेनदावानलज्वाला
दीप्तेनक्वथितंबलं॥तृतीययुद्धदिवसेयाममात्रंगतेरवौ॥४७॥विशुक्रमुक्ततर्षा
स्त्रव्याकुलाःशक्तयोभवन्॥क्षोभयंतींद्रियग्रामंतालुमूलंविशोषयन्॥४८॥
रुक्षयन्कर्णकुहरमंगेदौर्बल्यमावहन्॥पातयन्पृथिवीपृष्ठेदेहंविस्रंसितायुधं॥
४९॥आविर्बभूवशक्तीनामतितीव्रस्तृषाज्वरः॥युद्धेष्वनुद्यमकृतासर्वोत्साहवि
रोधिना॥५०॥तर्षेणातेनक्वथितंशक्तिसैन्यंविलोक्यसा॥मंत्रिसहयोत्रिण्याभृ यी

॥ल॥ शं चिंतामवापह॥९१॥ उवाच तां दंडनाथा मत्वा पारविशंकिनी॥ रथस्थितो रथगतात्
॥१४६॥ प्रतीकारकर्मणि॥९२॥ सखि पोत्रिणि दुष्टस्य तृषास्त्रमिदमागतं॥ शिथिलीकुरुते
सैन्यमस्माकं हि विधेः क्रमः॥९३॥ विशुष्कतालुमूलत्वात् वक्तुमप्यालि नक्षमाः॥
ई दृशीं नो गतिं श्रुत्वा किं वक्ष्यति महेश्वरी॥९४॥ दुष्टैरपकृते दैत्यैरुपायः प्रविचिंत्यतां
सर्वत्रश्चष्टसाहस्राक्षी हि यया मत्रपोत्रिणी॥९५॥ एकापि शक्तिर्नैवास्ति या तर्ष
क्षनपीडिता अत्रैवावसरे दृष्ट्वा मुक्तशस्त्रां पताकिनीं॥९६॥ रंध्रप्रहारिणो हं
त बाणैर्निघ्नंति दानवाः अत्रोपायस्त्वया कार्यो मया च समरोधमे॥९७॥ त्वदी ॥श्री॥
यरथपर्वस्थो योस्ति सौधुमहार्णवः॥९८॥ तमादिश समस्तानां शक्तीनां तर्षमुक्त ॥१४६॥
ये॥ नाप्तैः पानीयपानाद्यैरेता मोतर्षा संक्षयं॥९९॥ सरश्च मदिरासिंधुः सदुपाये

नहर्षिता६० आजुहाव स्फुरासिंधुमज्ञाचक्रेश्वरीरणे॥ समाह्वालसरक्ताक्षोग्राहे
माङ्गस्रकुविभूषितः॥ ६१॥ प्रणम्य दंडनाथां तां तदाज्ञापरिपालकः॥ आत्मा
नं बहुधा भुत्वा तरुणादित्यपाटलः॥ ६२॥ कश्चित्तापिंछवच्छामः कश्चिच्च धवलद्यु
तिः॥ कोटिशो मदिराधारः करिहस्तसमाकृतिः॥ ६३॥ ववर्ष मदिरासिंधुराजोयं ब
हुलीकृतः॥ पुष्कलावर्तकाद्येषु कल्पक्षयबलाहकैः॥ ६४॥ निषिच्यमानो मघा
ब्धिः भक्तिसैन्यं पपाव ह॥ यद्गंधाघ्रातमात्रेण मृत उत्तिष्ठति स्फुटं॥ ६५॥ दुर्ब
लः प्रबलश्च स्यात्सर्वस्व करांबुधिः॥ पराधसंख्यातीतास्तामद्यधारापरंपराः॥ ६६॥
प्रतीछंतस्स्वपानार्थं सुरैः शक्त उत्थिताः॥ यथा सा मदिरासिंधुवृष्टिर्दैत्येषु नोप
तत्॥ तथा सैन्यस्य परितो महाप्राकारमंडलं॥ लघुहस्ततया मुक्तैः शरजालैः
॥६७॥

॥रु॥ सहस्रशः ॥ ६८ ॥ चकारविस्मयकरीकदंबवनवासिनी कर्मणातेनसर्वेपिवि

॥३५७॥ स्मितामरुतोभवत् ॥ ६९ ॥ अथताःशक्तयोभूरिपिबंत्यस्मरपोनरे विविधा

मदिराधाराबलोत्साहविवर्धिनीः ॥ ७० ॥ यस्यायस्यामनःप्रीतिरुचिस्वादोय

थायथा ॥ तस्यातस्याक्षरासिंधुस्तांववर्षतथातथा ॥ ७१ ॥ तृतीययुध्धदिवसे

प्रहरद्वितयावधि ॥ मद्यसंततधाराभिःप्रववर्षक्षरांबुधिः ॥ ७२ ॥ गौडीःपैष्टी

चमाध्वीचवल्लीःकादंबरीस्तथा ॥ हैतालीलागलीयाश्चतालजातास्तथाक्ष

क्षराः ॥ ७३ ॥ कल्पवृक्षोद्भवादिव्यानानादेशसमुद्भवाः ॥ क्षस्वादुसौरभाग्या ॥श्री॥

श्चशुद्धगंधामदमदाः ॥ ७४ ॥ बकुलप्रसवामोदाध्वनंतीबुद्बुदोज्वलाः ॥ क ॥३५७॥

टुकाश्चकषायाश्चमधुरास्तिक्ततास्पृशः ॥ ७५ ॥ बहुवर्णसमाश्लिष्टह्लादिनी

पिच्छिलास्तथा ॥ ईषदाम्लाश्चकट्वाम्ला मधुराम्लास्तथापराः ॥ ७६ ॥ शस्त्रक्षती
रुजाहंत्री अस्थिसंधानदायिनी ॥ रणश्रमहरीः शीताः कवोष्णाश्चतथालघुः
७७ ॥ संतापहारिणी किंचानुष्णाः शीता जयप्रदाः ॥ नानाविधास्त्वमी धाराव
वर्षमदिरार्णवः ॥ ७८ ॥ अविच्छिन्नं याममात्रमेकैकातत्र योगिनी ॥ एरावतकर
प्रख्यां स्फधारां मुदावहां ॥ ७९ ॥ उत्तानं च वदनं कृत्वा विलोलरसनोच्चलं ॥ शक्तयः
प्रपपुः सिंधुमुद्रामीलितलोचनाः ॥ ८० ॥ इत्थं बहुविधैर्मद्यधारापानैः स्फरांबुधिः
आगत्य तर्पयित्वा ताः दिव्यरूपं समाश्रिता ॥ ८१ ॥ पुनर्गत्वा दंडनाथां प्रणम्य स
स्फरांबुधिः ॥ स्निग्धगंभीरघोषेण वाक्येनेदमुवाच तां ॥ ८२ ॥ देवी पश्य महाराज्ञी
दंडमंडलनायिके ॥ मया संतर्पिता मुक्ततर्षा शक्तिवरूथिनी ॥ ८३ ॥ काश्चिन्न

॥ल॥ त्यंति गायंति कलक्वणितमेखलाः ॥ नृत्यंतीनां पुरः काश्चित्करतालं वितन्व
॥३६८॥ ते ॥८४॥ काश्चित्प्रसंति स्मा वल्गाद्वल्गु वक्षोजमंडलाः ॥ पतंत्यन्योन्यमंगेषु का
श्चिदानंदमंथराः ॥८५॥ काश्चिद्वल्गंति च श्रोणीविगलन्मेखलांबराः ॥ काश्चिद्युद्धा
यसन्नद्धा घूर्णयंती निजायुधं ॥८६॥ इत्थं निर्दिश्यमानास्ताः शक्तीर्मैत्र्यसिंधुना ॥
अवलोक्य भृशं तुष्टा दंडिनीनमुवाच ह ॥८७॥ परितुष्टास्मि मध्याब्धे त्वया साध्य
मनुष्ठितं ॥ देवकार्यमिदं किंचत्वया निर्विघ्नतः कृतं ॥८८॥ अतो हि त्वं मत्प्रसादाद्वा
जपेयादिके मखे ॥ सोमपानवदत्यंतमुपयोज्यो भविष्यति ॥८९॥ मंत्रेण पूतं त्वां या ॥श्री॥
गे पासरिबलदेवताः ॥ यागेषु मंत्रपूतेन पीतेन भवता जनाः ॥९०॥ सिद्धिमृद्धिंबं ॥१६८॥
लं स्वर्गंअपवर्गं च बिभ्रतु ॥ महेश्वरीमहादेवो बलदेवश्च भार्गवः ॥९१॥

दत्तात्रेयस्तथान्येच त्वांपास्यंति महाजनाः ।। यागेसच्चित्तस्त्वं हि सर्वां सिद्धिं प्रदा
स्यसि ।। १२ ।। इत्थं वरप्रदानेन तोषयित्वाक्षरंबुधिं ।। मंत्रिणी त्वरयामास पुन
र्युद्धाय दंडिनी ।। १३ ।। पुनः प्रववृधे युद्धं शक्तीनां दानवैः सह ।। मुदाट्टहासनि
र्भिन्नादिगष्टकधराधरं ।। १४ ।। प्रत्यग्रमदिरामत्ताः पाटलीकृतलोचनाः ।। शक्त
यो दैत्यचक्रेषु न्यपतंल्लोकहेलया ।। १५ ।। हूयेन हूयमारेज शक्तीनां समरश्रियां ।।
मदरागेण चक्षूंषि दैन्यरक्तेन शस्त्रिता ।। १६ ।। तदा बभूव तुमुलं युद्धं शक्तिस्फर
हिषां ।। तदाभूत्स्फुरपिस्त्रंकां दिशीकत्त्वमागतः ।। १७ ।। प्रस्खलत्पदविन्यासः
ल मदिरारक्तहृदयः ।। स्वर्वदक्षरसंदर्पवीरभाषारसोद्धताः ।। १८ ।। कदंबगोलका
कारदृष्टसर्वांगयदूयः ।। युवराजस्य सैन्यानि शक्तयः समनाशयन् ।। १९ ।। अ

॥ल॥ क्षोहिणीशतेनैतत्र दंडिनी समताडयत् ॥ अक्षोहिणीसार्धशतं नाशयामास मंत्रिणी
॥१४९॥ १००॥ अश्वारूढाप्रभग्नयो मदारुणा विलोचना ॥ अक्षोहिणीसार्धशतं नित्युरंतक
मंदिरं ॥१०१॥ अंकुशेनातितीक्ष्णेन चतुरंगारोहिणी रणे ॥ उल्लूकजितमुख्यापरलो
कातिथिं व्यधात् ॥२॥ चंपत्करी मन्त्रतयः शक्तिर्दंडाधिनायिका ॥ पुरुषेणमुखान
न्यातत्र युद्धेषु दारयन् ॥३॥ अस्तं गते स विनरि ध्वस्ते सर्वबलं ततः ॥ विशुक्रं योध
यामास शामलाकोपशालिनी ॥४॥ अस्त्रप्रत्यस्त्रमोक्षेण भीषणेन दिवौकसां ॥
महता रणकृत्येन योधयामास मंत्रिणी ॥५॥ आयुधानि कृतीक्ष्णानि विशुक्रस्य ॥श्री॥
महौजसः ॥ क्रमेण शः खंडयंती सा केतनं रथसारथिं ॥६॥ धनुर्गुणं धनुर्दंडं खंडयंती ॥१४९॥
शिलीमुखैः ॥ अस्त्रेण ब्रह्मशिरसा ज्वलत्पावकरोचिषा ॥७॥ विशुक्रं मर्दया

मासमासोपत्तछीर्णविग्रहः॥ विषंगंचमहादैत्यंदंडनाथामदोद्धता॥८॥योधयामासचं
डेनमुसलेनविनिघ्नती॥ सचापिदुष्टदनुजःकालदंडनिभांगदां॥९॥उद्यम्यबाहुनायु
ध्यंचकाराशेषभीषणं॥ अन्योन्यमंगमभ्रंतौगदायुद्धप्रवर्तिनौ॥१०॥चंडाट्टहासमु
खरौपरिभ्रमणकारिणौ॥ कुर्वाणौविविधाश्चारीघूर्णितौतूर्णवेष्टने॥११॥अन्योन्य
दंडहननंमोहयंतौमुहुर्मुहुः॥ अन्योन्यमल्लतौरंध्रमीक्षमाणौमदोद्धतौ॥१२॥महा
मुसलदंडाग्रघट्टसंक्षोभितांबरौ॥ आयुध्यतांदुराधर्षौदंडिनीदैत्यशेखरौ॥१३॥
अथार्धरात्रसमयपर्यंतंकृतसंगरौ॥ सातन्मूर्ध्निनिजघ्नेतंहलेनाकृत्यवैरिणं॥१४॥
कठोरंताडनंचक्रेमुसलेनाथपोत्रिणी॥ ततोमुसलघातेनत्यक्तप्राणोमहासुरः॥१५॥
चूर्णितेनशरीरेणसमभूत्तसमाश्रयात्॥ इतिकृत्वामहत्कर्ममंत्रिणीदंडनायिके॥१६॥

॥ल॥ तत्रैव तं निशाशेषं निन्यतुः सह शक्तिभिः॥ सारात्रिरपि दंडस्य व्यरंसीत्सममानुषा
॥१५०॥ रणश्रांतं निजं सैन्यं निन्यतुः शिबिरं प्रति॥१७॥ इति श्रीब्रह्मांडपुराणे उत्तरभागे ल
लितोपाख्याने यु स्क हयग्रीवागस्त्यसंवादे विषंगविशुक्रवधो नाम त्रयोविंशो
ध्यायः॥२३॥ अगस्त्य उवाच सोदरव्यापहं श्रुत्वा भंडः किमकरोत्क्रुधा॥२॥ अश्वान
न महाप्राज्ञ वर्णितं मंत्रिणीबलं॥ विषंगस्य वधो युद्धे वर्णितो दंडनाथया॥३॥ श्रीदे
व्याश्रोतुमिच्छामि रथचक्रपराक्रमं॥ कथं तस्य रणोत्साहाः के के समं समयुध्यत॥
सहायाः के भवं तस्य हतभ्रातृतनूभवः॥ हयग्रीव उवाच॥ इदं शृणु महाप्राज्ञ ॥श्री॥
सर्वपापनिकृंतनं॥ ललिताचरितं पुण्यमणिमादिगुणप्रदं॥४॥ ॥१५०॥

विषयायनकालेषुपुंण्येषुसमयेषुच॥सिद्धिदंसर्वपापघ्नंकीर्त्तनंपंचपर्वसु॥५
तथाहतोरणोत्साहोश्रुत्वानिजसहोदरौ॥शोकेनमहताविष्टोभंडःप्रविललापसः
६॥विकीर्णकेशोधरणौमूर्छितःपतितस्तथा॥नलेभेकिंचिदाश्वासंभ्रातृव्यस
नकर्षितः॥७॥पुनःपुनश्चप्रलपन्कुटिलाक्षोणभूरिशः॥आश्वास्यमानःशोकेनमु
क्तःक्रोधमवापसः॥८॥कालंवहन्नतिक्रूरंभ्रमद्भ्रुकुटिभीषणं॥अंगारपाटलाक्ष
श्चनिश्वसन्कृष्णासर्पवत्॥९॥क्षिप्रंमुहुर्मुहुःस्पृष्ट्वाधून्वानःकरवालिकां॥क्रोध
हुंकारमातन्वन्गर्जन्नुत्पातमेघवत्॥१०॥उवाचकुटिलाक्षंचसमस्तपृतनाप
तिं॥ययेवदुहयामाबलायुद्धेविनाशिताः॥११॥भ्रातरोममपुत्राश्चसेनानाथाः
सहस्रशः॥तस्याःस्त्रियोतिधूर्त्तायाःकंठोत्थैःशोणितद्रवैः॥१२॥भ्रातृपुत्रमहाशो

॥ल॰॥ क वह्निं संवापयाम्यहं ॥ गच्छ रे कुटिलाक्ष त्वं सज्जीकुरु पताकिनीं ॥ १३ ॥ इत्युक्त्वा क
॥३९३॥ ठिणं वर्म वज्रपातसमं महत् ॥ दधानो भुजमध्येन बंधन्पृष्ठेन धषुधि ॥ १४ ॥ उत्थान
मोचन्निस्वानं करो बंधन्व धारयन् ॥ कालाग्निरिव संक्रुद्धो निर्जगाम निजात्पुरा
त् ॥ १५ ॥ तालजंघादिकैः सार्धं पुरद्वारनिवेशितैः ॥ चतुर्भिर्घृतशस्त्रौघैर्घृतवर्मभिरुध
तैः ॥ १६ ॥ पंचत्रिंशच्चमूनाथैः कुलिकक्षपुरःसरैः ॥ सर्वसेनापतीं द्रेया कुटिलाक्षेया
सत्क्रुधा ॥ १७ ॥ मिलित्वा भंडनाथेन चत्वारिंशच्चमूवराः ॥ दीप्तायुधा दीप्तकेशा निर्ज
ग्मुर्दीप्तकंकणाः ॥ १८ ॥ द्विसहस्राक्षौहिणीनां पंचाशीतिः शताधिका ॥ तमन्वगायया ॥श्री॥
वेकहेलया मथितुं द्विषः ॥ १९ ॥ भंडासुरे विनिर्याते सर्वसैनिकसंकुले ॥ शून्यके नग ॥३९३॥
रे तत्र स्त्रीमात्रमवशेषितं ॥ २० ॥ आभील्लनाम दैत्येंद्रो रथवर्यं महारथः ॥ सहस्रयु

म सिंहाद्य्आरुरोह रणोद्धतः॥ २१॥ तत्करेभज ज्वाल कालाग्निरिव दीप्तियान्॥
यातनानावानरवद्दुंश्वंष्ट्राहाससमाकृतिः॥ २२॥ इतस्ततश्च लंतोनां सेनानां धूलि
रुस्थिता॥ जोदुंतस्याभरं भूमिरक्षमेवादिवं ययौ॥ २३॥ केचिद्रूमेरपर्यीताः प्रचेलुर्व्यो
मवर्त्मना॥ केषांचित्स्कंधमारूढान्केचिच्चेलुर्महाबलाः॥ २४॥ नदिक्षु न च भूचक्रेन व्यो
मानि च वने म मुः॥ दुःख दुःखेन ते चेलुः अन्योन्याश्लेषपीडिताः॥ २५॥ अत्यंतसेनासंम
र्दीत्तु थ चक्रे विचूर्णिताः॥ केचित्पादेन नागानां मर्दिनान्यपतन्भुवि॥ २६॥ इत्थं प्रच
लता तेन समं सर्वैश्च सैनिकैः॥ वज्रनिर्घोषसद्दृशः सिंहनादोथ्य धीपन॥ २७॥ तेना
त्यंतकठोरेण सिंहनादेन भूयसा॥ मंडदैत्यमुखोत्थेन विदीर्णमघवज्जगत्॥ २८
५२ सागराः शोषमापन्नाः चंद्रार्कौ प्रपलायितौ॥ उडून्यपतन्पोम्नो भूमिर्दोलायिता

॥ ल ॥ भवत् ॥ २९ ॥ दिग्नागाश्चाभवन्नूत्रस्ताः मूर्छिताश्च दिवौकसः ॥ शक्तीनां कटकं
॥ १५२ चाभूद्दकांडत्रासविह्वलं ॥ ३० ॥ प्राणान्यंधारयामासुः कथमप्यश्ववारणाः ॥ भा
रुयो भयविभ्रष्टान्यायुधानि पुनर्ददुः ॥ ३१ ॥ वह्निप्राकारवलयं प्रशान्तं पुनरुत्थितं
दैत्येंद्रसिंहनादेन चमूनाथधनुःस्वनैः ॥ ३२ ॥ कंदनेश्चापियोधानां जगच्छब्दमिवा
भवत् ॥ तेन नादेन महता भंडदैत्यविनिर्गमं ॥ ३३ ॥ निश्चित्य ललितादेवी स्वयं यो
द्धुं प्रचक्रमे ॥ अशक्यमन्यशक्तीनामाकलय्य महाहवं ॥ ३४ ॥ भंडदैत्येन दुष्टेन स्वय
मुद्योगमास्थिता ॥ चक्रराजरथश्चास्याः प्रचचाल महोदयः ॥ ३५ ॥ चतुर्वेदमहाचक्रः ॥ श्री ॥
पुरुषार्थमहाहयः ॥ आनंदध्वजसंयुक्तो नवभिः पर्वभिर्युतः ॥ ३६ ॥ नवपर्वस्थ ॥ १५२ ॥
देवीभिराकृष्टगुरुधन्वभिः ॥ पराधिधिकसंख्याताः परिवारसमृद्धिभिः ॥ ३७

पर्वस्थानेषु सर्वेषु पालितः सर्वतो दिशं ॥ दशयोजनमुन्नम्रश्चतुर्योजनविस्तृतः
॥३८॥ महाराज्ञीचक्रराजरथेंद्रः प्रचलन्बभौ ॥ तस्मिन्प्रचलिते हृष्टं श्यामया दं
डनाथया ॥३९॥ गेयचक्रं च चालाग्ने किरिचक्रं च पृष्ठतः ॥ अन्यासामपि शक्तीनां
वाहनानि परार्धशः ॥४०॥ नृसिंहोष्ट्रनरव्यालमृगपक्षिहयात्मना ॥ गजभेरुंडशर
भव्याघ्रवातमृगात्मना ॥४१॥ शतशस्तु तिर्यंचोप्यन्ये वाहनतां गताः ॥ उद्दरु
स्त्रावचाशक्तिः भंडासुरवधोद्यताः ॥४२॥ योजनामात्रविस्तारमपि तद्द्वारमंडलं
वह्निप्राकारचक्रस्य न पर्याप्तं चमूपतेः ॥४३॥ ज्वालामालिनिका नित्या द्वारस्या
स्यं तु विस्तृतिं ॥ वितनान समस्तानां सैन्यानां निर्गमैषिणी ॥४४॥ अथ सा जगतां
माता महाराज्ञी महोदया ॥ निर्जगामाग्निवरणाद्द्वारात्तीव्रप्रतापिनी ॥४५॥

॥ल॥ देवदुंदुभयो नेदुः पतिताः पुष्पवृष्टयः॥ महामुक्तातपत्रं तु दिविदीतमदृश्यत

॥३५१॥ ४६॥ निमिनानि प्रसन्नानि सूचकानि जयश्रियां॥ अभवन्नुल्ललितासैन्ये उत्पा

तास्तु द्विषां बले॥ ४७॥ ततः प्रववृते युद्धं सेनयोरुभयोरपि॥ प्रसर्पद्विशिखस्तोम

बद्धांधतमसच्छटं॥ ४८॥ हन्यमानगजस्तोमस्रुतशोणितबिंदुभिः॥ ड्डीयमाणशर

छ्छेकोदैत्यश्वेतातपत्रकं॥ ४९॥ न दिशो न नभोभागो न भूमिर्न च किंचन॥ दृष्टं तु के

वलं–ध्वं रजोमात्रं चमूस्थितं॥ ५०॥ नृत्यत्कबंधनिवहविधूततटपादपा॥ दैत्यके

शशतत्रस्यशैकलकलिकोज्वला॥ ५१॥ श्वेतातपत्रवल्लयश्वेतपंकजनास्फ ॥श्री॥

रा चक्रकृत्तकरिग्रामपादकूर्मपरंपरा॥ ५२॥ शक्तिध्वस्तमहादैत्यगजगंडशि ॥१५१॥

लोच्चया विलूनकांडैः पतितैः सफेनालीघचामरैः॥ ५३॥ तीक्ष्णासिवल्लुरीजा

लनिबिडीकृतनीरभूः॥ दैत्यवीरेक्षणश्रेणीशक्तिसंपुटभास्कराः॥५४॥ दैत्यवाहन
संभूतनक्रमीनसमाकुला॥ प्रावहच्छोणिततनदी सेनयोर्युध्यमानयोः॥५५॥ इत्थंप्र
वृद्धेयुद्धेमृत्योश्चग्रासदायके॥ चतुर्थेयुद्धदिवसे प्रातरारभ्यभीषणं॥५६॥ प्रहर
द्वयपर्यंतं सेनयोरुभयोरपि॥ तत्र श्रीललितायाश्च भंडस्याप्यभवद्रणः॥५७॥
अस्त्रशस्त्रसंक्षोभतुमुलीकृतदिक्तटः॥ धनुर्ज्याजालटंकारलुंकारैरतिभी
षणः॥५८॥ तूणीरवदनाकर्षे संदधाने च धन्विनि॥ विमुंचन्विशिखान्पार्ष्णि
सर्वदा दृश्यता ह सः॥५९॥ हस्तलाघववेगेन न प्रज्ञायत किंचन॥ महाराज्ञीकरांभो
जव्यापारः शरमोक्षणे॥६०॥ संधाने रेकधा तस्या दशधा चापनिर्गमे॥ शतधा गग
ने दैत्यसैन्यप्राप्तौ सहस्रधा॥६१॥ दैत्यांगसंगे संप्राप्ताः कोटिसंख्याः शिलीमुखाः॥

हुं

॥ ल ॥ शरांधकारं सृजती भिंदंती रोदसी शरैः ॥ ६२ ॥ मर्माभिंदन्प्रचंडस्य महाराज्ञी महे
॥१५४॥ ष्वभिः ॥ ततः कोपारुणं नेत्रं वहन् भंडः सदानवः ॥ ६३ ॥ ववर्ष शरजालेन महताल
लितेश्वरीं ॥ अंधतामिस्रकं नाम महास्त्रं प्रमुमोच ह ॥ ६४ ॥ महातरणिबाणे
न तन्नुनोद महेश्वरी ॥ पाषाणास्त्रं महाघोरो भंडः प्रमुमुचे रणे ॥ ६५ ॥ गायत्र्य
स्त्रेण तस्य नुत्यै संस्मार जगदंबिका ॥ अंधास्त्रमसृजद्भंडः शक्तिदृष्टिविनाशके रा
॥ ६६ ॥ [illegible] ॥ चक्षुष्मतीमहास्त्रेण शमयामा
स तत्प्रसूः ॥ शक्तिनाशाभिधं भंडो मुमोचास्त्रं महारणे ॥ ६७ ॥ विश्वावसोरथास्त्रे ॥श्री॥
ण तस्य दर्पमपाकरोत् ॥ अंतकास्त्रं स सर्जोच्चैः संक्रुधः भंडदानवः ॥ ६८ ॥ महा ॥१५४॥
मृत्युंजयास्त्रेण नाशयामास तत्कुलं ॥ सर्वास्त्रस्मृतिनाशास्त्रमस्त्रं भंडोऽभ्यमुंचत ॥ ६९ ॥

धारयास्त्रेण पाचक्रेऽसीत तद्द्वयं समनाशयत् ॥ भयास्त्रमसृजद्दंडः शक्तीनां भीति
दायकं ॥७०॥ अभयंकरमैन्द्रास्त्रं मुमोच जगदंबिका ॥ महारोगास्त्रमसृजच्छक्तिसे
नासु दानवः ॥७१॥ [illegible] राजयक्ष्मादयो रोगास्ततोऽभूवन् सहस्रशः ॥
तन्निवारणासिध्यर्थं ललिता परमेश्वरी ॥७२॥ नामत्रयमहामंत्रं महास्त्रं सममुंच
त ॥ अच्युतश्चाप्यनंतश्च गोविंदस्तत्र रोस्थिताः ॥७३॥ ओंकारमात्रनिर्दग्धरोगास्ता
मगमन्मुदा ॥ नत्वा च तां महाराज्ञीं तद्द्रुक् व्याधिमर्दनं ॥७४॥ विधातुं त्रिषु लोकेषु
नियुक्ता स्वपदं ययुः ॥ आयुर्नाशनमस्त्रं तु मुक्तवान् भंडदानवः ॥७५॥ कालसंक
र्षिणीरूपमस्त्रं राज्ञी व्यमुंचत ॥ महासुरास्त्रमुद्दामं व्यसृजच्चंडदानवः ॥७६॥ त
तः सहस्रशो जाता महाकाया महाबलाः ॥ मधुश्च कैटभश्चैव महिषासुर एव च ॥७७॥

॥७॥ धूम्रलोचनदैत्यश्च चंडमुंडादयोसुराः ॥ चिक्षुरश्चामरश्चैव रक्तबिजासुरस्त
॥१५५॥ था ॥७८॥ शुंभश्चैव निशुंभश्च कालकेया महाबलाः ॥ धूम्राते सर्वे दानवश्रेष्ठाः जिधानश्चापरे॥
कठोरैः शस्त्रमंडलैः ॥७९॥ शक्तिसेनां मर्दयंतो नंदतश्च भयंकरं ॥ हाहेति क्रंदमा तस्माद्दस्त्रात्समु
नश्च शक्तयो दैत्यमर्दिताः ॥८०॥ ललितां शरणं प्राप्ताः पाहि पाहीति सस्वरं ॥ अ थिताः॥ २॥
थ देवी भ्रूभंकुरधा रोषाट्टहासमातनोत् ॥८१॥ ततः समुदिता काचित् दुर्गानामय
शस्विनी ॥ समस्तदेवतेजोभिः निर्मिता विश्वरूपिणी ॥८२॥ शूलं च शूलिना चक्रं च
क्रिणा च समर्पितं ॥ शंखं वरुणदत्तं च शक्तिं दत्ता हविर्भुजा ॥८३॥ चापमक्षयतूणीरं म ॥श्री॥
रुद्दत्तं महाध्वनि ॥ वज्रिदत्तं च कुलिशं घंटामैरावतार्पितां ॥ कालदत्तं महादंडं ॥१५५॥
पाशं पाशधरार्पितं ॥ ब्रह्मदत्तां कुंडिकां च चषकं धनदार्पितं ॥ मृत्युदत्तो रवड्गश्च

दोहारं जलधिनार्पितं ॥ विश्वकर्मप्रदिष्टानि भूषणानि च बिभ्रती ॥ अंगैः सह
स्रकिरणश्रेणीभास्कररश्मिभिः ॥ ८५ ॥ आयुधानि समस्तानि दीपयंती महोद
या ॥ अन्यदत्तै रथान्यैश्च शोभमाना परिच्छदैः ॥ ८६ ॥ सिंहवाहनमारुह्य युद्धं नाराय
णी व्यधात् ॥ तया ते महिषप्रख्या दानवा विनिपातिताः ॥ ८७ ॥ चंडिकासप्तशत्यां तु
यथा कर्म कृतं तया ॥ तथैव समरं चक्रे महिषादिमदापहं ॥ ८८ ॥ तत्कृत्वा दुष्करं कर्म
महाराज्ञीं ननाम सा ॥ मूकास्त्रमसृजद्दुष्टः शक्तिसेनास्य दानवः ॥ ८९ ॥ दक्षहस्तां
गुष्ठनखा महाराज्ञाः समुत्थितः ॥ महामत्स्याकृतिः श्रीमान् आदिनारायणो भुवि ॥ ९०
महावाग्वादिनीं नाम ससर्ज जगतां प्रसूः ॥ विद्यारूपस्य वेदस्य तस्कस्तमहौजसः
९१ ॥ ससर्ज तत्र समरे दुर्मदो मुंडदानवः ॥ तेन ते देवै हतारः सोमकाद्या विनाधि

॥८३॥ ताः॥९२॥ आर्णवास्त्रं महावीरैः पंडदैत्यो रणेऽसृजत्॥ ततोऽद्दामपयःपूरे शक्तिसैन्यै
॥१५६॥ रमज्जत॥९३॥ अथ श्रीललितादक्षहस्ततर्जनिकानखात्॥ आदिकूर्मः समु
त्पन्नो योजनायुतविस्तरः॥९४॥ धृतास्तेन महाभोगकर्परेण प्रधीयसा॥ तत्सामु
द्रं च भगवान् सलीलं सलिलं पपौ॥९५॥ शक्तयो हर्षमापन्नाः समुद्रास्त्रभयं जहुः॥
हिरण्याक्षमहास्त्रं तु विजहौ दुष्टदानवः॥९६॥ तस्मात्सहस्रशो तोजो हिरण्या
क्षा गतायुधाः॥ तैर्हन्यमाने शक्तीनां सैन्ये संत्रासविह्वले॥९७॥ दनस्ततः प्रचल
ति शिथिले रणकर्मणि॥ अथ श्रीललितादक्षहस्तमध्यांगुलीनखात्॥९८॥ महाव ॥श्री॥
राहः समभूत् श्वेतः कैलाससन्निभः॥ तेन वज्रसमानेन पोत्रेणाभिविदारिताः॥९९॥ ॥१५६॥
कोटिशस्ते हिरण्याक्षा मध्यमाना क्षयं गताः॥ अथ भंडस्त्वति क्रोधात्भ्रुकुटिं विततानन ह
॥१००॥

तस्यभ्रूकुटितोजातोहिरंण्याः कोटिसंरक्षकाः॥जलदादित्यवह्निमाद्रीस्त्रप्रहर
णाश्चते॥१०१॥अमर्दयंछक्तिसैन्यंप्रल्हादंचाप्यपीडयन्॥यःप्रल्हादोक्तिशक्ती
नांपरमानंदलक्षणः॥१०२॥सएवबालकोभूत्वाहिरण्यपरिपीडितः॥त्रिपुरांशर
णंप्राप्तस्तेनराज्ञीकृपामगात्॥३॥अथशक्त्यानंदरूपंप्रल्हादंपरिरक्षितुं॥दक्षह
स्तानामिकाग्रंधुनोतिस्मजस्मसू॥४॥तस्माध्वनसटाज्वालःप्रज्वलछ्लोचनत्रयः॥
सिंहास्यःपुरुषाकाराकंठस- ध्वोजनार्दनः॥५॥नखायुधःकालरुद्ररूपीघोराट्टहास
वान्॥सहस्रदंडदोर्दंडोल्लालिताज्ञानुपालकः॥६॥हिरण्यकशिपून्सर्वाभंडभ्रूकु
टिसंभवान्॥क्षपयाद्विपाटयामासनखैःकुलिशकर्कशैः॥७॥बलीश्चास्त्रंमहाघो
रंसर्वदैवतनाशनं॥अमुंचल्ललितादेवीप्रतिभंडमहासुरः॥८॥तदस्त्रदर्पनाशा

॥९॥ यवामनाः शतशोभवन् ॥ क्षणेक्षणेवर्धमानाश्च सहस्रा महाबला ॥९॥ वल्लीद्राक्षा
॥१९७॥ समुद्भूतान्बध्नंतः पाशमंडलैः ॥ दशसहस्रकनिष्ठाग्राजाता कामेशयोषितः ॥१०॥ महा
कायामहोत्साहा स्तद्दृष्ट्वे समनाशयन् ॥ हेहयास्त्वंसमसृजद्भंडदैत्योरणाजिरे ॥११॥
तस्मात्सहस्रशोजाताः सहस्रार्ज्जुनकोटयः ॥ अथश्रीत्रिपुरावामहस्तांगुष्ठनखो
त्थितः ॥१२॥ प्रज्वलद्भार्गवोनाम सक्रोधः सिंहनादवान् ॥ धारयामर्दयन्नेनात्कुठार
स्यकठोरया ॥१३॥ सहस्रार्जुनसंख्यानान्क्षणादेवव्यनाशयन् ॥ अथक्रुद्धोभंडदैत्यः
क्रोधहुंकारमातनोत् ॥१४॥ तस्मात्हुंकारतोजातः चंद्रहाससकृपाणवान् ॥ सहस्रा ॥श्री॥
क्षौहिणीरक्षः सेनयापरिवारितः ॥१५॥ कनिष्ठंकुंभकर्णंच मेघनादंचनंदनं ॥ गृहीत्वा ॥१९७॥
शक्तिसैन्यंतदतिद्रुरममर्दयत् ॥१६॥ अथश्रीत्रिपुरावामहस्ततर्जनिकानखान्

कोदंडरामः समभूत्लक्ष्मणेन समन्वितः ॥ १७ ॥ जटामकुटवान् वल्कीबद्धतूणी
रपृष्ठभृत् ॥ नीलोत्पलदलश्यामो धनुर्विस्फारयन्मुहुः ॥ १८ ॥ नाशयामास दिव्यास्त्रैः
क्षणाद्राक्षससैनिकं ॥ मर्दयामास पौलस्त्यं कुंभकर्णं च सोदरं ॥ १९ ॥ लक्ष्मणो मेघ
नादं च महावीरमनाशयत् ॥ द्विविदास्त्रं महाभीमं असृजत्स्वं दुदानवः ॥ २० ॥ तस्मात्स
हस्रशो जाताः कपयः पिंगलोचनाः ॥ क्रोधेनात्यंततानास्ताः प्रत्येकं हनुमत्समाः ॥ २१
व्यनाशयंछक्तिसैन्यं क्रूरकिंकारकारिणः ॥ अथश्रीत्रिपुरावामहस्तमध्यांगुलीनखात्
२२ ॥ आविर्भवन् हलधरः क्रोधमध्यारुणेक्षणः ॥ नीलांबरापिनद्धांगः कैलासाचलनि
र्मलः ॥ २३ ॥ द्विविदास्त्रसमुद्भूतान् कपीन् सर्वान् विनाशयन् ॥ राजा स्करं नाम महत्ससर्जा
स्त्रं महासुरः ॥ २४ ॥ तस्माद स्त्रात्समुद्भूता बहवो नृपदानवाः ॥ शिशुपालोदंतवक्त्रः

॥ल॥ शाल्वः काशीपतिस्तथा ॥ २५ ॥ पौंड्रको वासुदेवश्च रुक्मी हंसकडिंबकौ ॥ शंबरश्च प्र
॥३५८॥ लंबश्च तथा बाणासुरोपि च ॥ २६ ॥ कंसश्चाणूरमल्लश्च मुष्टिकोत्पलशेखरौ ॥ अरिष्टो धे
नुकः केशी कालीयो यमलार्जुनौ ॥ २७ ॥ पूतनाशकटश्चैव तृणावर्त्तादयोसुराः ॥ अने
कैः सहसेनाभिरुत्थिताः शस्त्रपाणय ॥ २८ ॥ तान्विनाशयितुं सर्वान् वासुदेवः सना
तनः ॥ श्रीदेवीवामहस्ताब्जानामिकानखसंभवः ॥ २९ ॥ चतुर्व्यूहं समातेने चत्वारस्ते
ततोभवन् ॥ वासुदेवो द्वितीयस्तु संकर्षण इति स्मृतः ॥ ३० ॥ प्रद्युम्नश्चानिरुद्धश्च ते
सर्वे शोघतायुधाः ॥ तानशेषान्दुराचारान् भूमेर्भारप्रवृत्तिकान् ॥ ३१ ॥ नाशयामासु ॥श्री॥
रुर्विशत्वेषो पन्तान्महासुरान् ॥ अथ तेषु विनष्टेषु संक्रुद्धः पौंड्रदानवः ॥ ३२ ॥ वर्म ॥१५८॥
विष्णावकघोरकल्पस्त्रं समसुंचत ॥ ततः कल्पस्त्रनोजाकौ औध्रो पुंड्रो श्च भूं त्ति षोः

आंध्राः पुंड्राश्च भूतिभाः॥ किराताश्च वराहाणाः यवनाः पापवृत्तयः॥ देववित्स्यावका
धर्मद्रोहिणः प्राणिहिंसकाः॥ २४॥ वर्णाश्रमेषु सांकार्यकारिणो मलिनांगकाः॥ त्रिपु
रासक्तिसैन्यानि भूयो भूयो व्यमर्दयन्॥ २५॥ अथ श्रीललितिवामहस्तमध्यस्य भास्वतः॥
कनिष्ठकानखोद्भूतः कल्किनामा जनार्दनः॥ २६॥ अश्वारूढः प्रदीप्तश्चाररहहासं च
कार ह॥ तस्यैव ध्वनिना सर्वे वज्रनिष्पेषवधुना॥ २७॥ किराता मूर्छितानेशुः शक्तयः
श्चातिहर्षिताः॥ दशावतारनाथास्ते कृत्वेस्यं कर्म दुष्करं॥ २८॥ ललितांबान्नमस्कृत्य
बद्धांजलिपुटास्थिताः॥ प्रतिकल्पं धर्मरक्षां कर्तुमस्या द्विजन्मभिः॥ २९॥ ललितांबानि
युक्तास्ते वैकुंठाय प्रतस्थिरे॥ इत्थं समस्तेष्वस्त्रेषु नाशितेषु दुराशयः॥ ३०॥ महामोहा
स्त्रमसृजच्छक्तस्तेन मूर्छितं॥ शांभवास्त्रं विसृज्यांबा महामोहास्त्रमक्षिणोत्तू॥ ३१॥

॥ल॥ अस्त्रप्रत्यस्त्रधाराभिरित्थं जाते महाहवे ॥ अस्तं शैलगभस्तीशो गंतुमारभतारुण:
॥३५०॥ ४२॥ अथ नारायणास्त्रेण सा देवी ललितांबिका ॥ सर्वास्त्रक्षौहिणीस्तस्य भस्मसा
त्करोद्रणे ॥ ४३॥ अथ पाशुपतास्त्रेण दीप्तकालानलत्विषा ॥ चत्वारिंशच्चमूनाथान्
महाराज्ञी व्यमर्दयत् ॥ ४४॥ अथैकशेषं तं दुष्टं निहतोशेषबांधवं ॥ महाकामेश्वरास्त्रे
ण सहस्रादित्यवर्चसा ॥ ४५॥ गतासुमकरोत्स्तात ललिता परमेश्वरी ॥ क्रोधेनप्र
ज्वलितं च जगद्विद्रवकारिणं ॥ ४६॥ महासारं महासत्वं भंडं चंडपराक्रमं ॥ तदस्त्रप्रोद्ग
तो ज्वालैः शून्यकं तस्य पत्तनं ॥४७॥ सस्त्रीकं च सबालं च सगोष्ठधनशेषकं ॥ निर्दग्धमासी ॥श्री॥
त्सहसा स्थलमात्रमशिष्यत ॥ ४८॥ शून्यकं तत्पुरं नाम शून्यमासीत्सधार्थवत् ॥ भंडस्य ॥३५०॥
संक्षयेनासीत्त्रैलोक्यं हर्षनर्त्तितं ॥ ४९॥ विजयश्रीयुतां देवीं दृष्ट्वा हर्षसमन्विता: ॥

शंखयोदध्वनुस्तूर्णभेरीमंगलकाहलेः ॥८०॥ विकिरन्पुष्पवृष्टिंश्चदेवाहर्षसमन्विताः ॥
देवदुंदुभयोनेदुर्ववुर्वासंतवायवः ॥८१॥ दिशःप्रसन्नतामापुनभश्चविमलंतथा ॥ मंग
लारार्त्तिकंचक्रुर्देवगंधर्वयोषितः ॥८२॥ ननृतुश्चाप्सरश्श्रेष्ठाउर्वशीमेनकादयः ॥
प्लवनंव्यदधुर्हर्षाद्देवगंधर्वकिन्नराः ॥८३॥ स्मृत्वास्मृत्वामहाराज्ञापौरुषंचतुरा
चरं ॥ अभूत्कंटकितंसर्वंकिमेतदितिविस्मितं ॥८४॥ विश्वावसुप्रभृतयोगंधर्वाः
स्वरगायकाः ॥ तुंबुरुर्नारदश्चैव साक्षाद्देवीसरस्वती ॥८५॥ जयमंगलपद्यानिकंठ
तिपट्टुगीतिभिः ॥ हर्षसंफुल्लवदनास्फुरत्पुलकभूषणाः ॥८६॥ मुकुंजयजयत्येवंस्तु
वानाललितेश्वरीं ॥ हर्षेणांधामदोन्मत्ताःप्रनृत्यंतःपदेपदे ॥८७॥ सप्तर्षयोवसि
ष्ठाद्याऋग्यजुःसामरूपिभिः ॥ अथर्वरूपैर्मंत्रैश्चवर्धयंतोजयश्रियं ॥८८॥ हविषैव

॥ल॥ महावह्निशिखामत्यंतपावनीं ॥ आशीर्वादेन महता वर्धयामासुरुत्तमाः ॥५९॥ तै

॥१६०॥ स्तूयमाना ललिता व्रीडानम्रीकृतानना ॥ भंडासुरं विनिर्जित्य गंतुमुद्योगमाद

धे ॥६०॥ अथ संपत्करी देवी चचालाग्ने स्वसेनया ॥ पाशायुधसमुत्पन्ना हयारू

ढा स्वसेनया ॥६१॥ लोलाभिः केतुमालाभिः उल्लिखंती घनाहतं ॥ व्यचलत्तुरतो दे

व्या बहुविक्रमशालिनी ॥६२॥ पार्श्वद्वयं समाश्रित्य महाराज्ञाः प्रचेलतुः ॥ मुद्रि

णी दंडनाथे ते आरुह्य रथपुंगवौ ॥६३॥ इत्थं विधाय समरकार्यमनिंद्यरूपा श्रीच

क्रराजरथमंडलमंडितः श्रीः ॥ कामेश्वरी त्रिजगतां जननी बभाष विद्योतमानवि ॥श्री॥

भवा विजयश्रियाढ्या ॥६४॥ सैन्यं समस्तमपि संगरखड्गभिन्नं भंडासुरप्रबलबाण ॥१६०॥

कृशानुतप्तं ॥ ॥ ॥ ॥ श्री ॥ ॥ ॥

अस्तंगते सवितरि रिक्षो मथितौ प्रभावाश्री देवता शिबिरमात्मन आनिनाय ॥ ६५ ॥
योभंडदानववधं ललितांवयेमं कृत्स्नं सकृत्पठति तस्य तपोधनेंद्र ॥ नाशं प्रयाति क
दनानि धृताह्सिद्धे भुक्तिश्च मुक्तिरपि वर्त्तत एव हस्ते ॥ ६६ ॥ इमं पवित्रं ललिता
पराक्रमं समस्तपापघ्नमशेषसिद्धिदं ॥ पठंति पुण्येषु दिनेषु ये नरा भजंति ते भाग्यस
मृद्धिमुत्तमां ॥ ६७ ॥ इति श्रीब्रह्मांडपुराणे उत्तरभागे ललितोपाख्याने युद्धकांडे ह
यग्रीवागस्त्यसंवादे र्व कै ट भंडासुरवधो नाम चतुर्विंशोध्यायः ॥ २४ ॥ अग
स्त्योवाच ॥ अश्वानन महाप्राज्ञः श्रुतमाख्यानमुत्तमं ॥ विक्रमो ललितादेव्या विशि
ष्टो वर्णितस्त्वया ॥ १ ॥ चरितै रत्नघैर्देव्याः संप्रीतोस्मि हयानन ॥ श्रुत्वा च महती शक्ति
मंत्रिणीदंडनाथयोः ॥ २ ॥ पश्चात्किमकरोत्तत्र युद्धानंतरमंबिका ॥ चतुर्थदिनशर्वर्यां

ल विभातायांहयानन॥३॥ श्रीहयग्रीवउवाच॥ शृणुकुंभभयप्राज्ञ पत्रयाजगदंब
१६१ या॥ पश्चादाचरितंकर्म निहतेभंडदानवे॥४॥ शक्रोनामखिलंसैन्यंदैत्यायुध
शरार्दितं॥ मुहुराल्हादयामासलोचनैरमृताप्लुतैः॥५॥ ललितापरमेशान्याः
कटाक्षमृतधारया॥ जहुर्युक्ष्मरिश्रांतिंशक्रयःप्रीतमानसाः॥६॥ अस्मिन्नवस
रेदेवाभंडमर्दनतोषिताः॥ सर्वेपिसेवितुंप्राप्ताब्रह्मविष्णुपुरोगमाः॥७॥ ब्रह्मा
विष्णुश्चरुद्रश्चशक्रोदिक्पालास्तथैवच॥ आदित्यावसवोरुद्रामरुतःसाध्यदेवता:
ताः॥८॥ सिद्धाःकिंपुरुषायक्षनिरृत्याद्यानिशाचराः॥ प्रल्हादाद्यमहादैत्याःस ॥श्री॥
र्वेप्यंडनिवासिनः॥९॥ आगत्यतुष्टुवुःप्रीत्यासिंहासनमहेश्वरीं॥ नमोनमस्तेज ॥१६१॥
गदेकनाथेनमोनमःश्रीत्रिपुराभिधाने॥ नमोनमःपंडमहासुरघ्नीनमोस्तुकामेश्व

रश्यामकेशी॥२९॥चिंतामणेचिंतितदानदक्षेचिंत्येचिदाकारतरंगमाले॥३०॥चित्रांबरे
चित्रजगत्प्रसूतेचित्राख्यनित्याभिगतेनमस्ते॥मोक्षप्रदेमुग्धशशांकचूडेमुग्ध
स्मितेमोहविभेददक्षे॥३१॥मुद्रेश्वरीचर्चितराज्यतंत्रेमुद्राप्रियेदेविनमोनमस्ते॥
क्रूरांधकध्वंसिसिकोमलांगीकोपेषुकालीतनुमादधाने॥३२॥क्रोडाननापालित
सैन्यचक्रेक्रोडीकृतनाशेषमयेनमस्ते॥षडंगदेवीपरिवारगुप्तेषडंगयुक्तश्रुति
वाक्यमृग्ये॥३३॥षट्चक्रसंस्थेचषडूर्मिहंत्रीषड्भावरूपेललितेनमस्ते॥कामे
श्वरीमुख्यसमस्तनित्याकांतासनांतेकमलायताक्षी॥३४॥कामप्रदेकामिनि
कामशंभोःकाम्यकलानामधिपेनमस्ते॥दिव्यौघसिद्धौघनरौघरूपेदिव्येदि
नाधीशसहस्रकांते॥३५॥देदीप्यमानेदययासनाथेदेवादिदेवप्रमदेनमस्ते॥

॥ लु ॥ सदाणिमाद्यष्टकसेवनीये सदाशिवात्मोज्ज्वलमंचवासे ॥१६॥ सौम्ये सदैकायनपा
॥१६२॥ दपूज्ये सवित्रिलोकस्य नमो नमस्ते ॥ ब्राह्मीमुखैर्मातृगणैर्निषेवे ब्रह्मप्रिये ब्रा
ह्मणि बंधहंत्री ॥१७॥ ब्रह्मामृतस्रोतसि राजहंसी ब्रह्मेश्वरी श्रीललिते नमस्ते ॥
संक्षोभिणीमुख्यसमस्तमुद्रासंवेशिते सर्वरणप्रहंत्री ॥१८॥ संसारलीलाकरि
सारसाक्षी सदा नमस्ते ललितानोधिथे ॥ नित्याकरी षोडशकेन कामाकर्षिण्य
धीशी प्रथमेन सेव्ये ॥१९॥ नित्ये निरातंकदयाप्रपंचे नीलालकश्रेणि नमो न
मस्ते ॥ अनंगपुष्पादिभिरुन्मदाभिरनंगदेवीभिरसिप्रसेव्ये ॥२०॥ अभव्यहंत्र्य ॥श्री॥
क्षरराशिरूपे त्रितारिवर्गे ललिते नमस्ते ॥ संक्षोभिणीमुख्यचतुर्दशार्चिमाला ॥१६२॥
वृत्तोद्धारमहाप्रदीप्ते ॥२१॥ आत्मानमाविभ्रत्ति बिम्बमाद्ये शुभ्राशये शुभ्रपदेन

॥ल॥ कामेश्वरोत्संगसद्मनिवासे कालात्मिकेकेदलितानुकंपे ॥ कल्पावसानोत्थितकाल
॥१६३॥ रूपे कामप्रदे कल्पलते नमस्ते ॥२०॥ सवीरुधोसांद्रसुधासुशीले सारंगशावाक्षि सरो
जवर्णे सारस्यसारस्य सवेकभूमे समस्तविद्येश्वरि संस्तुतिस्ते ॥२१॥ तवप्रभावेन
विदग्निजायाः श्रीशंभुनाथप्रकटीकृतायाः ॥ भंडासुराद्याः समरप्रचंडा हता जग
त्कंटकतां प्रयाताः ॥२२॥ नव्यानि सर्वाणि वपूंषि देवी त्वत्सांद्रकारुण्यसुधासु वाचः ॥
त्वया समस्तं भुवनं सहर्षं संजीवितं स्करि सभ्यलभ्ये ॥२३॥ श्रीशंभुनाथस्य महाश
यस्य हितोत्तेजः प्रसरात्मकोयः ॥ स्थाण्वाश्रमे कृतनपाविरक्तः सती वियोगेन नि ॥श्री॥
रस्तभोगः ॥२४॥ तेनाद्रिवंशे धृतजन्मलाभा कन्यामुमां योजयितुं प्रवृत्ताः ॥ वयं स्मरं ॥१६३॥
प्रेषितवंतरवतस्यांतिकं घोरतपःस्थितस्य ॥२५॥ तेनाथ वैराग्यतपोविघातक्रुधे

नलल्लाटकृशानुदग्धः ॥ भस्मावशेषोमदनस्ततोभून्नतो हि भंडासुर एष जातः ॥२६॥
ततो वधस्तस्य दुराशयस्य स्यात्तो भवस्मारणदुर्मदस्य ॥ अथास्मदर्थे स्वतनुत्यजस्त्वं
कामस्य संजीवनमाशुकुर्याः ॥२७॥ इयं रतीभर्तृवियोगखिन्ना वैधव्यमत्यंतमभव्य
माप्ता ॥ पुनश्च दुत्पादितकामसंगा ह्वविष्यति श्रीललिते सनाथा ॥२८॥ त्वया यसृष्टेन
मनोभवेन संमोहितः पूर्ववदिंदुमौलिः ॥ चिरं कृतात्यंतमहातपस्यां तापर्वतीं द्राक्करि
रोष्यतीशः ॥२९॥ तयोश्च संगे भविता कुमारः समस्तगीर्वाणचमूविनेता ॥ तेनैव वीरे
णरणे निरस्यः स तारको नाम सुरारिराजः ॥३०॥ यो भंडदैत्यस्य दुराशयस्य मित्रं स
लोकत्रयधूमकेतुः ॥ श्रीकंठपुत्रेण रणे हतश्चेत्पापाप्रतिष्ठैव तदा भवेन्नः ॥३१॥ त
स्मात्वमेव त्रिपुरे जनानां आनंदकं मन्मथवीरवर्यं ॥ उत्पाद्य रत्याविधवत्वदुःखं

॥ल॥ मया कुरुव्याकुलकुंतलायाः ॥ ४० ॥ एषात्यनाथा भवतीं प्रपन्ना भर्तृप्रणाशेन कृशांग
॥१६४॥ यष्टिः ॥ नमस्करोति त्रिपुराधिनाथे तदत्र कारुण्यकलां निधेहि ॥ ४१ ॥ हयग्रीव उवाच
नमस्करोति ॥ इत्थं स्तुत्वा महेशानीं ब्रह्माद्या विबुधोत्तमाः ॥ तारंतीं दर्शयामासुर्मलिनां
शोकखेदिनीं ॥ ४२ ॥ सपर्यश्रुमुखीं घूर्णा कुंतलां धूलिधूसरां ॥ ननाम जगदंबायै वैधव्या
त्यक्तभूषया ॥ ४३ ॥ अथ नत्वदर्शनोत्पन्नकारुण्या परमेश्वरी ॥ कांतं कटाक्षया
मास कामेश्वरमनीश्वरी ॥ ४४ ॥ ततः कटाक्षकृदुत्पन्नः स्मयमानमुखांबुजः ॥ पूर्वदेहा
धिकरुचिर्मन्मथो मदमेदुरः ॥ ४५ ॥ द्विभुजः सर्वभूषाढ्यः पुष्पेषुः पुष्पकार्मुकः ॥ आ ॥श्री॥
नंदयन् कटाक्षेण पूर्वजन्मप्रियां रतिं ॥ ४६ ॥ अथ सा रतिदेवी च महत्यानंदसागरे ॥१६४॥
मज्जंती निजभर्तारं अवलोक्य मुदं गता ॥ ४७ ॥ स च कंदर्पवीरोपि नमस्कृत्य महे

मस्ते ॥ २१ ॥ स सर्वसिध्यादिकशक्तिवृंदे सर्वज्ञविज्ञातपदारविंदे ॥ सर्वाधिपे सर्व
गते समस्तसिधिप्रदे श्रीललिते नमस्ते ॥ २२ ॥ सर्वज्ञतायुक्प्रथमाभिरन्यदेवीभि
रध्याश्रितचक्रभूमे ॥ सर्वापराकांक्षितपूरयित्री सर्वस्य लोकस्य सवित्रि पाहि ॥ २३ ॥
वंदे वशिन्यादिकवाग्विभूतिवर्धिष्णुचक्रद्युतिवाहवाहे ॥ बलाहकश्यामकचे वचो
ध्येवरप्रदे स्कंदरि पाहि विश्वं ॥ २४ ॥ बाणाधिके रायुधसार्वभौमे भंडासुरानेकव
नीतदावे ॥ प्रत्यग्रतेजोज्वलितांबुराशे प्रपाल्यमाने परितो नमस्ते ॥ २५ ॥ कामे
शिवज्रेशि भगेशिरूपे कल्ये कले कालविलोपदक्षे ॥ कथावशेषीकृतदैत्यसैन्ये
कामेशकांते ललिते नमस्ते ॥ २६ ॥ बिंदुस्थिते बिंदुकलैकरूपे विद्यात्मिके त्वं
हितचित्प्रकाशे ॥ स्फुरत्कुचाभोगविलोलहारे स्फुरत्प्रभा वै वरदे नमस्ते ॥ २७ ॥

॥ ल ॥ पिनां भवमोहनः ॥ ५६ ॥ त्वमिदं शापयेकरिष्यंति त्वयि वा विमुखाशयाः ॥ अवश्यं क्लीब
॥ १६५ ॥ वते वस्या तेषां जन्मनि जन्मनि ॥ ५७ ॥ ये पापिनो दुरात्मानो मद्भक्तद्रोहिणश्च ये ॥ तान
गम्यास्कतारेषु पातयित्वा विनाशय ॥ ५८ ॥ येषां मदीयमूर्जास्कमद्भक्तेभ्या हृतं मनः ॥ ते
षां कामस्क खं सर्वं संपादय समीप्सितं ॥ ५९ ॥ इति श्रीललिता देव्या कृताज्ञा वचनः
स्मरः ॥ तथेति शिरसा बिभ्रद् दंजलिर्निर्ययौ स्मरः ॥ ६० ॥ तस्यानंगस्य सर्वेभ्यो रोमकूपे
भ्य उत्थिताः ॥ बहवः शोभनाकारा मदना विश्वमोहनाः ॥ ६१ ॥ ते विमोह्य समस्तं च ज
गच्चक्रं मनोभवः ॥ पुनस्थाण्वाश्रमं प्राप चंद्रमौलि जिगीषया ॥ ६२ ॥ वसंतेन च मित्रे ॥ श्री ॥
ण सैन्यार्द्धीत रोचिषा ॥ रागेणापीड्य मर्दैन मंदानिलरथेन च ॥ ६३ ॥ पुंस्कोकिलगल ॥ १६५ ॥
स्तान काहलीभिश्च संयुतः ॥ श्रृंगारवीरसंपन्नो रत्यालिंगितविग्रहः ॥ ६४ ॥ जैत्र

शरासनं धुन्वन्न प्रवीराणां पुरोगमः ॥ तपो निघ्नं चंद्रमौलिं ताडयामास सायकैः ॥
६५ ॥ अथ कंदर्पबाणौघैस्ताडितश्चंद्रशेखरः ॥ ताप्यमानो विरही संतप्तो धैर्य
विमुक्तवान ॥ ६६ ॥ भूयो भूयो गिरिसुतां पूर्वदृष्टामनुस्मरन ॥ अनंगबाणदहनैस्तप्यमा
नस्य शूलिनः ॥ ६७ ॥ न चंद्ररेखा नो गंगा देहतापच्छिदे भवत ॥ नंदी भृंगी महाका
लप्रमुखैर्गणमंडलैः ॥ ६८ ॥ आहृतेषु पद्मायने वि लुलुंठ मुहुर्मुहुः ॥ ६९ ॥ शिलीभू
तान्हिमपयःपूरान ध्ववसच्छिदः ॥ भूयः शैलसुतारूपं चीत्रपटे न खे लिखन ॥ ७० ॥
तदालोकनतो दूरमनंगार्तिमवर्धयत ॥ तामालिख्य ड्रिया नम्रां वीक्ष्यमाणां कटा
क्षतः ॥ ७१ ॥ तं चित्रपट्टमंगेषु रोमहर्षेषु चाक्षिपत ॥ चित्रासंगेन महता महत्या रति
संपदा ॥ ७२ ॥ भूयः संस्मरतापेन विव्यथे विषमेक्षणः ॥ तामेव सर्वतः पश्यन्तसा

॥ल॥ मेवमनोदिशान् ॥ ७३ ॥ तथैवसंलग्नसार्धंउन्मादेनोपपन्नवान् ॥ तन्मयीभूयतत्त्वद्
॥१६६॥ यस्तच्चित्रस्तत्परायणः ॥ ७४ ॥ तत्कथारूपयथानीतसमस्तरजनीदिनः ॥ तच्छीलवर्ण
नव्यग्रस्तद्रूपालोकनोत्सुकः ॥ ७५ ॥ तस्याश्चाभोगसंकल्पमालाकरणमालिकः ॥ तन्म
यत्वमनुप्राप्तस्तदायातितरांशिवः ॥ ७६ ॥ इमांमनोभवरुजंअचिकित्स्यांसधूर्जटिः ॥ अ
वलोक्यविवाहायभृशमुद्यमवानभूत् ॥ ७७ ॥ इत्थंविमोहितंदेवंकंदर्पोललितांग
या ॥ अथतांपर्वतसुतांआशुगैरभ्यताडयत् ॥ ७८ ॥ प्रभूतविरहज्वालामलिनेश्व
सितानिलैः ॥ शुष्यमाणाधरदलाभृशंपांडुकपोलभूः ॥ ७९ ॥ नाहारेशयनेचैवनस्वां ॥श्री॥
गेधृतिमिच्छति ॥ सखीसहस्ररचितैर्नित्यंशीतोपचारकैः ॥ ८० ॥ पुनःपुनस्तप्य ॥१६६॥
मानापुनरेवचविक्लवा ॥ नजगामरुजाशांतिंमन्मथाग्रेमहीयसः ॥ ८१ ॥

श्वरी ॥ विज्ञापयदिदंवाक्यंभक्तिनिर्भरमानसः ॥ ८८ ॥ यद्दग्धमीशनेत्रेणवपुर्मेल
लितांबिके ॥ त्वदीयस्यकटाक्षस्यप्रसादात्पुनरागतं ॥ ८९ ॥ तवपुत्रोस्मिदासोस्मिका
पिकृत्येनियुंक्ष्वमां ॥ इत्युक्तापरमेशानीतमाहमकरध्वजं ॥ ९० ॥ देव्युवाच ॥ गच्छ
वत्समनोजन्मनभयंतवविद्यते ॥ मत्प्रसादाज्जगत्सर्वंमोहयाव्याहताशुगः ॥ ९१ ॥ त्वद्बा
पापातनाज्जातधैर्यविप्लवईश्वरः ॥ पर्वतस्यसुतांगौरीपरिणेष्यतिसत्वरं ॥ ९२ ॥
सहस्रकोटयःकामामत्प्रसादात्त्वदुद्भवाः ॥ सर्वेषांदेहमाविश्यवात्स्यंतिरतिमुत्तमां ॥ ९३ ॥
मत्प्रसादेनवैराग्यसंक्रुद्धोपिनईश्वरः ॥ देहदाहेविधातुंतेनसमर्थोभविष्यति
॥ ९४ ॥ प्रत्युक्तासौकातरात्मात्वद्बाणहतमानसः ॥ स्वभार्याविरहाशक्तोदेवस्या
र्थंप्रदास्यति ॥ ९५ ॥ अद्यप्रभृतिकंदर्पमत्प्रसादान्महीयसः ॥ अदृश्यमूर्तिःसर्वेषांप्रा

॥ल॥ कैलासमागत्य समस्तैः प्रथमैः सह ॥ पार्वतीमानिनायाशु त्रिनाथस्य प्रियमावहन्
॥३६७॥ १०॥ रममाणस्तया सार्धं कैलासे मंदिरे तथा ॥ विंध्याद्रौ हिमशैले च मलये पारिया
त्रके ॥ ११ ॥ नानाविधेषु स्थानेषु रतिं प्राप महेश्वरः ॥ ओ[illegible]थ तस्यां समसृजोग्रं वीर्यं
सा वोढुमक्षमा ॥ १२ ॥ भुव्यत्यजत्सा पिवद्गो कृत्तिकाश्च सोशिषत् ॥ ताश्च गंगाजले
मुंचन् सा च स्वशरकानने ॥ १३ ॥ ततो जातो महावीरो महासेनः षडाननः ॥ गंगयाचां
तिकं नीतो धूर्जटेर्वृद्धिमागमत् ॥ १४ ॥ संवर्धमानो दिवसे दिवसे तीव्रविक्रमः ॥ शि
क्षितो निजतातेन सर्वविद्या अवाप्तवान् ॥ १५ ॥ अथ तातकृतानुज्ञः सुरसैन्यपति ॥श्री॥
र्भवन् ॥ तारकं मारयामास समस्तैः सह दानवैः ॥ १६ ॥ पुनस्तारकदैत्येंद्रवधसंतो ॥३६७॥
षशालिना ॥ शक्रेण दत्ता स गुहः देवसेनामुपागमत् ॥ १७ ॥ सा शक्रतनयादे

वसेना नाम्नी यशस्विनी ॥ आसाद्य रमणं स्कंदं आनंदं भृशमादधौ ॥ १८ ॥ इत्थं
संमोहिताशेषविश्वचक्रो मनोभवः ॥ देवकार्यं स संपाद्य जगाम श्रीपुरं पुनः ॥ १९ ॥
यत्र श्रीनगरे पुण्ये ललितापरमेश्वरी ॥ वर्तते जगतां मध्ये तन्न नासेवितं ययौ ॥ २० ॥ इति
श्रीब्रह्मांडपुराणे उत्तरभागे ललितोपाख्याने हयग्रीवागस्त्यसंवादे मदनपुनर्भवो
नाम पंचविंशोध्यायः ॥ २५ ॥ अगस्त्य उवाच ॥ किमिदं श्रीपुरं नाम केन रूपेण वर्तते ॥ के
न वा निर्मितं पूर्वं तत्सर्वं मे निवेदय ॥ १ ॥ कियत्प्रमाणं किं वर्णं कथयस्व मम प्रभो ॥ त्व
मेव सर्वसंदेहपंकशोषणभास्करः ॥ २ ॥ हयग्रीव उवाच ॥ यथा चक्ररथं प्राप पू
र्वोक्तैर्लक्षणैर्युतं ॥ मयो होगानस्तोत्पन्ना ललिपरमेश्वरी ॥ ३ ॥ व्यजेष्ट भंडनामा
नमस्कृतं लोककंटकं ॥ तदा देवा महेंद्राद्यास्संतोषं बहु भेजिरे ॥ ४ ॥ अथ कामशि

॥ ल ॥ वस्यापि ललिता शश्च सुंदरं ॥ नित्योपभोगसेवार्थं मंदिरं कर्तुमुत्सुका ॥ ५ ॥ कुमा
॥ १६८ ॥ र ललिता देव्या ब्रह्मा विष्णु महेश्वराः ॥ वर्धकिं विश्वकर्माणं स्मराणो सिल्पि
को विदं ॥ ६ ॥ अस्मरणां सिल्पिनं च मयं माया विचक्षणं ॥ आहाय कृत सत्कारा देवि
रे ललिता ज्ञया ॥ ७ ॥ कारणपुरुषा ऊचुः भो विश्वकर्म शिल्पिज्ञ भो भो मय महोदय
भवंतौ सर्वशास्त्रज्ञौ घटनामार्गकोविदौ ॥ ८ ॥ संकल्पमात्रेण महाशिल्पिकल्पविशा
रदौ ॥ युवाभ्यां ललितादेव्या नित्यज्ञान महोदधे ॥ ९ ॥ षोडशक्षेत्रमध्ये तु तत्क्षेत्रसम
संख्यया ॥ कर्त्तव्याः श्रीनगर्यो हि नानारत्नैरलंकृता ॥ १० ॥ यत्र षोडशधा भिन्ना ललि ॥ श्री ॥
ता परमेश्वरी ॥ विश्वत्राणाय सततं निवासं रचयिष्यति ॥ ११ ॥ अस्माकं हि प्रियमि ॥ १६८ ॥
दं मरुतामपि च प्रियं ॥ सर्वलोकप्रियमिदं तस्मान्नैव विलंब्यता ॥ १२ ॥ इति कारण

नानि द्रांपार्वती भेजे विरहेणोपतापिता ॥ स्वतनोस्तानवेनासौ पितुः खेदमवर्धयत
॥ ८२ ॥ अमती कारपरुषं विरहं दुहितुः शिवे ॥ अवलोक्य सशैलेंद्रो महादुःखमवा
सवान् ॥ ८३ ॥ भद्रे त्वं तपसा देवं तोषयित्वा महेश्वरं ॥ भर्त्तारं तं समृच्छेति पित्रा सं
प्रेरिताथ सा ॥ ८४ ॥ हिमवच्छैलशिखरे गौरीशिखरनामनी ॥ चकार पतिलाभाय
पार्वती दुष्करं तपः ॥ ८५ ॥ शिशिरेषु जलावासा ग्रीष्मे पंचाग्निमध्यगा ॥ अर्केनि
विष्टदृष्टिश्च स्म घोरं तप आस्थिता ॥ ८६ ॥ तेनैव तपसा तुष्टः सान्निध्यं दत्तवांछि
वः ॥ अंगीचकार तां भार्यां वैवाहिकविधानतः ॥ ८७ ॥ अथ प्रालेयशैलेंद्र दत्तां
तां नलिनेक्षणां ॥ सप्तऋषिद्वारतः पूर्वं प्रार्थितश्चोद्धतश्च सः ॥ ८८ ॥ तयाचरममा
यो सौ बहुकाले महेश्वरः ॥ ओषधीप्रस्थनगरे श्वशुरस्य गृहे वसन् ॥ ८९ ॥ पुनः

॥ल॥ सः॥२०॥ सृजतां दिव्यघटनापण्डितौ शिल्पिनौ युवां॥ एषु क्षेत्रेषु क्लृप्ता नाम्ना श्रीदेवी
॥१६९॥ श्रीमहत्पुरी॥२१॥ नाम्ना नित्या नाम्नैव प्रथिता नि न संशयः॥ साहि नित्यास्वरूपेण
कालव्याप्तिकरी वरा॥२२॥ सर्वं कलयते देवी कलनाकलया जगत्॥ नित्यायाश्च
महाराज्ञी नित्यायाश्च नतद्भिदा॥२३॥ अतस्त्वदीयनाम्ना तु स्वनाम्ना प्रथनं पुरां॥
कामेश्वरीपुरी चैव भगमालापुरी तथा॥२४॥ नित्यक्लिन्नापुरीत्यादि नामानि प्रथिता
न्यलं॥ ततो नामादिवर्णस्य योगे पुण्यतरे दिने॥२५॥ महाशिल्पिप्रकारेण पुरीरच
यतां शुभा॥ इति कारणकृत्येड्ये ब्रह्माविष्णुमहेश्वरे॥२६॥ मोकोश्री पुरास्तेषु क्षेत्र ॥श्री॥
क्षेत्रेषु चक्रतुः॥ अथ श्रीपुरविस्तारं पुराधिष्ठानदेवताः॥२७॥ कथयाम्यवधा ॥१६९॥
र्यैव लोपामुद्रायतेशृणु॥ योमेरुरखिलाधारस्तुंगसाहस्रयोजनः॥२८॥ चतुर्द
शजगच्चक्रसंप्रोतनिजविग्रहः॥ तस्य शृंगाणि चत्वारि पूर्वनैऋतिवायुषु॥२९॥
मध्यस्थले च जातानि प्रोच्छ्रायस्तेषु कथ्यते॥ पूर्वोक्तशृंगत्रितयं शतयोजनमुन्न
तं॥३०॥ शतयोजनविस्तारं तेषु लोकास्त्रयो मताः॥ ब्रह्मलोको विष्णुलोकः शि
वलोकस्तथैव च॥३१॥ एतेषां ग्रहविन्यासान् वक्ष्याम्यवसरांतरे॥ मध्यस्थितस्य
शृंगस्य विस्तारं चोच्छ्रयं शृणु॥३२॥ चतुःशतं योजनानामुच्छ्रितं विस्तृतं तथा॥ तत्रै
व शृंगे महती शिल्पिभ्यां श्रीपुरं कृतं॥३३॥ चतुःशतं योजनानां विस्तृतं कुंभसंभ
व॥ तत्रायं प्रविभागस्ते प्रविविच्य प्रदर्श्यते॥३४॥ प्राकारः प्रथमः प्रोक्तः कालाय
सविनिर्मितः॥ षट्शताधिकसाहस्रयोजनायतवेष्टनः॥३५॥ चतुर्दिक्षु द्वारयु
क्तः चतुर्योजनमुच्छ्रितः॥ सालमूलपरीणाहो योजनायतमब्धिप॥३६॥

॥ल॥ सालाग्रस्य तु गव्यूतेरर्धं चातापितापन ॥ सालद्वारस्य चोन्नत्यमेकयोजनमिश्रि
॥१७०॥ तं ॥३७॥ द्वारे द्वारे कपाटे द्वे गव्यूत्यर्धप्रविस्तरे ॥ एकयोजनमुन्नत्ते कालायसविनिर्मि
ते ॥३८॥ उभयोरर्गलद्वंद्वमर्धक्रोशसमायतं ॥ एवं चतुर्षु द्वारेषु सदृशं परिकीर्त्तितं
॥३९॥ गोपुरस्य च संस्थानं कथये कुंभसंभव ॥ पूर्वोक्तस्य च सालस्य मूले योजनसं
मिते ॥४०॥ पार्श्वद्वये योजने द्वे समादाय विनिर्मितं ॥ विस्तारमपि तावंतं संप्रा
प्तद्वारनिर्मितं ॥४१॥ पार्श्वद्वये द्वियोजिन्या मध्ये सालस्य योजनं ॥ मेलयित्वा
पंचसंख्या योजनं विस्मृतं मतं ॥४२॥ द्वारपार्श्वद्वयेनैव क्रोशे द्वौ क्रोशयुग्मतः ॥ ॥श्री॥
मेलयित्वा पंचसंख्यायोजना द्वारमायतं ॥४३॥ एवं प्रकारतस्तत्र गोपुरं रचितं ॥१७०॥
मुने ॥ तस्माद्गोपुरमूलस्य वेष्टो विंशति योजनः ॥४४॥ उपर्युपरि वेष्टस्य ह्रास

देवानां वचनं तं निशम्य तौ ॥ विश्वकर्ममयौ नत्वा व्यभाषेतां तथास्त्विति ॥३३॥ पु
नर्नत्वाहष्टवंतौ तौ तानूकारणपूरुषान ॥ केषु क्षेत्रे कर्त्तव्या श्रीनगर्यो महोदय ॥
३४॥ ब्रह्माद्याः परिपृष्टास्ते प्रोचुस्तौ शिल्पिनौ पुनः ॥ क्षेत्राणां परिभागं तु कल्पयं
तौ यथोचितं ॥३५॥ कारुण्यपुरुषा ऊचुः ॥ प्रथमं मेरुपृष्ठे च निषधे च महीधरे ॥ हेम
कूटे हिमगिरौ पंचमे गंधमादने ॥३६॥ नीलमेघे च शृंगाख्ये महेंद्रे च महागिरौ ॥
हि क्षेत्राणि नव वै तानि भौमानि विदितान्यथ ॥३७॥ औदकानि कुसंप्रेव प्रोक्तान्यखि
लसिंधुषु ॥ लवणाब्धौ क्षुरसाब्धि सुराब्धिघृतसागराः ॥३८॥ दधिसिंधुः क्षीर
सिंधुर्जलसिंधुषु सप्तम ॥ पूर्वोक्तानव शैलेंद्रा पश्चात्सप्त च सिंधव ॥३९॥ आह
त्य षोडश क्षेत्राण्येवं श्रीपुरकृतये ॥ एषु दिव्यानि वेश्मानि ललितायामहौज

॥ल॥ मन्वितः॥ द्वारे द्वारे गोपुराणि पूर्ववल्लक्षयन्ति च ॥५३॥ कालायसस्य कोसस्ययोंतर्देशः
॥१७१॥ समंततः॥ नानावृक्षमहोद्यानं तस्योत्कुंकुंमसंभव ॥५४॥ उद्भिज्जालेयावदस्ति
तत्सर्वं तत्र वर्तते ॥ परः सहस्रास्तरवः सदापुष्पाः सदाफलाः॥५५॥ एलालवंग
तक्कोलास्तदाकर्पूरशाखिनः॥ पीलवः काकतुंडाश्च सर्जकाश्चासनास्तथा ॥५६॥
कांचनाराश्चवल्लिकुचाः फनसाखर्जूरास्तथा॥ पाटलाश्च फलिन्यश्च जटालोजघ
नेफलाः॥५७॥ कर्णिकाश्च कुरुंडाश्च बंधुजीवाश्च दारुभाः॥ अश्वकर्णा हस्तिक
र्णाश्चांपेयकनकद्रुमाः॥५८॥ यूथिकास्तालपर्णाश्च लांगल्यश्च सदाफलाः॥ ॥श्री॥
सालास्तमालाहिंताला कर्बूराश्चारबर्बुराः॥५९॥ इक्षवः क्षीरिणश्चैव श्लेष्मात ॥१७१॥
कविभीतकाः॥ हरितक्यश्चकाकुपुष्पी घोटाच स्वर्णपुष्पिकाः॥६०॥ भल्लातक

श्चखदिराश्चकोराश्चंदनद्रुमाः॥ कालागरुद्रुमाः कालस्कंधाः चिंचावटास्तथा॥६१॥
औदुंबरास्तथाश्वत्थाशमीवृक्षाश्चद्रुद्रुमाः॥ रुचकाः कुटजाश्चैव एवमाद्याः सह
स्रशः॥६२॥ नानाऋतुसमाविष्टा देव्याः शृंगारहेतवः॥ नानावृक्षामहोद्याने वर्तंते
वरशाखिनः॥६३॥ कोस्यसालस्यांतराले सप्तयोजनदूरतः॥ चतुरस्रस्तांब्रसालः
सिंधुयोजनमुन्नतः॥६४॥ अनयोरंतरक्षोणी प्रोक्ता कल्पकवाटिका॥ कर्पूरम
ञ्जमिश्चारुरत्नबीजसमन्विते॥६५॥ कांचनत्वग्रुहारुचिरैः लैफेस्तेसफलद्रुमाः॥
वीरांबराणि दिव्यानि प्रवालान्यपि शाखिषु॥६६॥ अमृतंस्यान्मधुरसः पुष्पाणि
तविभूषणं॥ ईदृशा बहस्तत्र कल्पवृक्षाः प्रकीर्तिताः॥६७॥ एषांकक्षाद्वितीयास्या
त्कल्पवाटीनुनामतः॥ ताम्रसालस्यांतरालेसीससालः प्रकीर्तितः॥६८॥ अन

॥ ल ॥ योरुभयैस्तिर्यग्देशः स्यात्सप्तयोजनः ॥ तत्र संतानवाटी स्यात् कल्पवाल्पवाटीस
॥ १७२ ॥ माकृतिः ॥ ६९ ॥ सीससालस्यांतराले सप्तयोजनदूरतः ॥ आरकूटमयः सालः पूर्वसा
लसमाकृतिः ॥ ७० ॥ तयोर्मध्ये मही प्रोक्ता हरिचंदनवाटिका ॥ कल्पवाटीसमाकारा
फलपुष्पसमाकुला ॥ ७१ ॥ एवं सर्वेषु सालेषु पूर्ववद्द्वारकल्पनं ॥ पूर्ववद्गोपुराणां
चं मुकुटानां च कल्पनं ॥ ७२ ॥ गोपुरद्वारकुक्षिश्च द्वारे द्वारे च संमतिः ॥ आरकूट
स्यांतराले सप्तयोजनदूरतः ॥ ७३ ॥ पंचलोहमयः सालः पूर्वसालसमाकृतिः ॥
तयोर्मध्यमही प्रोक्ता मंदारद्रुमवाटिका ॥ ७४ ॥ पंचलोहस्यांतराले पंचयो ॥ श्री ॥
जनदूरतः ॥ रौप्यसालस्तु संप्रोक्तः पूर्वोक्तैर्लक्षणैर्युतः ॥ ७५ ॥ तयोर्मध्यमही ॥ १७२ ॥
प्रोक्ता पारिजाततरुवाटिका ॥ दिव्यामोदसुसंपूर्णा फलपुष्पभरोज्वला ॥ ७६ ॥

एवम्प्रकथ्यते ॥ गोपुरस्योन्नतिः प्रोक्ता पंचविंशतियोजना ॥ ४५ ॥ योजने योजने द्वारं
सकपाटं मनोहरं ॥ भूमिकाश्चापि तावंतो यथोर्ध्वह्रासः संयुताः ॥ ४६ ॥ गोपुराग्रस्य
विस्तारो योजनामात्रमाश्रितः ॥ आयामोपि च तावान्स्यात् तत्र त्रिमकुटं स्मृतं ॥ ४७ ॥
मुकुटस्य विचेस्तारः क्रोशमात्रे घटोद्भव ॥ क्रोशद्वयसमुन्नत्योह्रासो गोपुरस्य
स्मुने ॥ ४८ ॥ मुकुटस्यांतरक्षोणी क्रोशार्धेन च संमिता ॥ मुकुटाः पश्चिमप्राच्या
दक्षिणद्वारगोपुरे ॥ ४९ ॥ दक्षिणोत्तरमुकुटाः पश्चिमद्वारगोपुरे ॥ दक्षिणे द्वारव
प्रोक्ता उत्तरद्वाःकिरीटिका ॥ ५० ॥ पश्चिमद्वावत्पूर्वद्वारे मुकुटकल्पनं ॥ कालाय
सस्य सालस्यांतरे मारुत योजने ॥ ५१ ॥ अंतरे कांस्यसालस्य पूर्ववद्गोपुरान्वितः
सालमूलप्रमाणं च पूर्ववत्परिकीर्तितं ॥ ५२ ॥ कांस्यसालोपि पूर्वादि दिक्षु द्वारस

॥ल॥ सेवार्थं नगरी त्वन्या महामन्नाटवीस्थले ॥ यद्यत्रैव गृहं तस्य बहुयोजनदूरतः
॥३७३॥ ८५ ॥ श्रीदेव्या नित्यसेवायां मंत्रिण्या न घटिष्यति ॥ अतश्चिंतामणिगृहोपांतेति
भवनं कृतं ॥ ८६ ॥ तस्याः श्रीमंत्रिनाथायाः करत्वद्यामयेन च ॥ श्रीपुरीमुद्रिणीदे
व्या मंदिरस्य गुणान् बहून् ॥ ८७ ॥ वर्णयिष्यति को नाम यदि जिह्वासहस्रवान् ॥ का
दंबरी कृधा ताम्रनयना कलवीणया ॥ ८८ ॥ गायंत्यस्तत्रवीलंती मान्या मातंगक
न्यका ॥ ८९ ॥ अगस्त्य उवाच ॥ मतंगो नाम कः प्रोक्तो तस्य कन्याः कथं च ताः ॥ सेवंते
मंत्रिणीनाथां सदा मददोमेलसाः ॥ ९० ॥ हयग्रीव उवाच ॥ मतंगो नाम तपसामे ॥श्री॥
कराशिस्तपोधनः ॥ महाप्रभावसंपन्नो जगत्सर्जनलंपटः ॥ ९१ ॥ तपशक्त्याती ॥३७३॥
व्रया च सर्वत्राज्ञाप्रवर्तकः ॥ तस्य पुत्रस्य मातंगो मुद्रिणीमंत्रिनायिको ॥ ९२ ॥

घोरैस्तपोभिरत्यर्थं पूजयामास धीरधीः ॥ मतंगमुनिपुत्रेण रुचिरं समुपस्थितो
९३ ॥ मंत्रिणी कृतसान्निध्या वृणीष्व वरमित्यभात् ॥ सोपि सर्वमुनिश्रेष्ठो मा
तंगस्तपसो निधिः ॥ ९४ ॥ उवाच तां पुरो दत्तसान्निध्यां श्यामलांबिकां ॥ देवीत्व
त्स्मृतिमात्रेण मम सर्वार्थसिध्ययः ॥ ९५ ॥ ज्ञात्वा एवाणिमाद्यास्ते सर्वा अविभूतयः ॥
प्रापणीयं न मे किंचिदस्त्यं व भुवनत्रये ॥ ९६ ॥ सर्वतः प्राप्तकामस्य भवत्याश्वर
णस्मृतेः ॥ तथापि तव सान्निध्यमिदं नो निफलं भवेत् ॥ ९७ ॥ एकं वरं प्रार्थये हं
तं वरं पूरयांबिके ॥ पूर्वं हिमवता सार्धं सौहार्दपरिहासवान् ॥ ९८ ॥ क्रीडामतन
वेवाक्यैस्तच्चेतनम्रगल्भितं ॥ अहं गौरीगुरुरिति श्लाघमात्मनि तेनिवान् ॥ ९९ ॥
तद्भाग्यं मम नैवाभूद्यतस्तत्राधिको गुणः ॥ उभयोर्गुणसाम्ये तु मित्रयोराधिके गुणे ॥ १०० ॥

॥५॥ एकस्य कारणाज्जाते तत्रान्यस्य स्पृहा भवेत् ॥ गौरीगुरुःस्वश्लाघ्यार्थप्राप्तकामो
॥३७४॥ ऽप्यहं तपः ॥ १०१ ॥ कृतवांस्त्वं त्रिपुरानाथे तत्त्वं मत्तनया भव ॥ यतो मन्नामविख्यातं भ
विष्यति न संशयः ॥ १०२ ॥ इत्येकं वचनं श्रुत्वा मतंगस्य महामुनेः ॥ तथास्त्विति तिरो
धत्त सा च प्रीतो भवन्मुनिः ॥ ३ ॥ मातंगस्य महर्षेस्तु पत्न्याः स्वप्ने सदा मुदा ॥ नापिंछमं
जरीमेकां ददौ कर्णावतंसतः ॥ ४ ॥ तत्स्वप्नस्य प्रभावेन मातंगस्य सधर्मिणी ॥ नाम्ना
सिद्धिमतीगर्भे लघुश्यामामधारयत् ॥ ५ ॥ ततएव समुत्पन्ना मातंगी तेन कीर्तिता
लघुश्यामेति सा प्रोक्ता श्यामेयं मूलकंदभूः ॥ ६ ॥ पितृस्पृहमहाविद्यांअधीत्य ॥श्री॥
कलशोद्भव ॥ तत्प्रभावाल्लघुश्यामा ससर्ज स्वसमा वरं ॥ ७ ॥ मातंगकन्यका ॥३७४॥
स्तद्या कोटीनामपि कोटिशः ॥ लघुश्यामा महाश्यामा मातंगीवृंदसंयुता ॥ ८ ॥

रौप्यसालस्यांतराले सप्तयोजनदूरतः ॥ हेमसालः प्रकथितः पूर्ववद्वारशोभितः ॥ ७७ ॥
तयोर्मध्यमही प्रोक्ता कदंबतरुवाटिका ॥ तत्र दिव्यौनीयवृक्षा योजनद्वयमुन्न
ताः ॥ ७८ ॥ सदैव मदिरास्पंदमेदुरप्रसवोज्वलाः ॥ एभ्यः कादंबरी नाम योगिनी
भोगदायिनी ॥ ७९ ॥ विशिष्टा मदिरोत्पन्ना मंत्रिण्याः सततं प्रिया ॥ तेनापि वृक्षाः
स्फच्छाया बकुलाः पल्लवाकुलाः ॥ ८० ॥ आमोदलोलभृंगालीझंकारैः पूरितोदराः
तत्रैव मंत्रनाथाया मंदिरं स्फमनोहरं ॥ ८१ ॥ कदंबवनवाटास्तु विदिक्षु ज्वलना
दितः ॥ चत्वारि मंदिराण्युच्चैः कल्पितान्यादिशिल्पिना ॥ ८२ ॥ एकैकस्य तु गेहस्य
विस्तारः पंचयोजनं ॥ पंचयोजनमायामः सप्तावरणतास्थिता ॥ ८३ ॥ एवमन्यद्वि
दिक्षु स्यात्सर्वत्र प्रियकद्रुमाः ॥ निवासनगरी सेयं श्यामायाः परिकीर्तिता ॥ ८४ ॥

॥ल॥ कयतः कृत्स्नं प्रथमो ध्यातवासिनो ॥१६॥ कालचक्रं महत्तत्र तथैवा ततताङ्गतं ॥ च
॥३७८॥ तुरावरणोमे तन्मध्ये बिंदुमनोहरं ॥१७॥ त्रिकोणं पंचकोणं च षोडशच्छदपंकजं
अष्टारपंकजं चैव महाकालस्तन्मध्यमः ॥१८॥ त्रिकोणे तु महाकल्या महासंध्या
महानिशा ॥ एतास्तिस्रो महादेव्यो महाकालस्य शक्तयः ॥१९॥ पंचकोणे कृतत्रेता द्वा
पराः च कलिस्तथा ॥ मन्वंतराच विज्ञेया महाकालस्य शक्तयः ॥२०॥ तत्रैव पंचकोणा
ग्रे प्रत्यूषं च पितृप्रसूः ॥ प्राह्णापराह्णमध्याह्ना पंचकालस्य शक्तयः ॥२१॥ अथ षोड
शपत्राब्जे स्थिता शक्तीर्मुने शृणु ॥ दिनानि शात मिस्रा च ज्योतिश्चैव तु पक्षिणी ॥२२॥ श्री
प्रदोषा च निशीथा च प्रहरा पूर्णिमापि च ॥ राका चानुमती चैव तथैवामावसी पुनः ॥२३॥ ॥३७८॥
सिनीवाली कुहूर्भद्रा उपरागा च षोडशी ॥ एताः षोडशपत्रस्थाः शक्तयः षोडश ॥

स्मृताः ॥२४॥ कला काष्ठा निमेषा च क्षणा चैव लवा त्रुटिः ॥ मुहूर्तो कुतुपाहोरात्र कूप
क्षस्तथैव च ॥२५॥ कृष्णपक्षायना चैव विषुवा च त्रयोदशी ॥ संवत्सरा च परिवत्सरे
दावत्सरापि च ॥२६॥ एताः षोडशपत्रारवासिन्यः शक्तयः स्मृताः ॥ -- त्सरा ततश्चै
दुः वत्सरा वत्सापि च ॥२७॥ तिथिर्वारा च नक्षत्रा योगा च करणापि च ॥ एतास्तु श
क्तयो नागपत्राम्भोरुहसंस्थिताः ॥२८॥ कलिः कल्या च कलना काली चैव चतुष्टयं ॥
द्वारपालकतां प्राप्तं कालचक्रस्वभास्वतः ॥२९॥ एता महाकालदेव्यो मदप्रहसिता
ननाः ॥ मदिरापूर्णचषकं विभ्रतं चारुयाप्रभं ॥३०॥ दधाना श्यामलाकारा सर्वा
कालस्य योषितः ॥ ललितापूजनध्यानजपस्तोत्रपरायणाः ॥३१॥ निषेवंते महा
कालं कालचक्रासनस्थितं ॥३२॥ अथ कल्मकवाद्यास्तु रक्षकः कुंभसंभव ॥

॥स॰॥ वसंतर्तुर्महातेजा ललिताप्रियकारकः ॥३४॥ पुष्पसिंहासनासीनः पुष्पमाध्वीम
॥१७६॥ दारुणः ॥ पुष्पायुधः पुष्पभूषा पुष्पछत्रेण शोभितः ॥३५॥ मधुस्त्रीमाधवस्त्रीच द्वे दे
व्यौ तस्य दीपिते ॥ प्रसूनमदिरामत्ते प्रसूनशरलालसे ॥३६॥ संतानवाटिकापालो ग्री
ष्मर्तुः स्त्रीप्रलोचनः ॥ ललिता किं करो नित्यं तस्या आज्ञाप्रवर्त्तकः ॥३७॥ शुक्रस्त्रीश्च
शुचस्त्रीश्च तस्य भार्ये उभे स्मृते ॥ हरिचंदनधारी तु मुने वर्षर्तुना स्थिता ॥३८॥ सवर्ष
र्तुर्महातेजा विद्युल्लिंगललोचनः ॥ वज्राट्टहासमुखरो मत्तजीमूतवाहनः ॥३९॥
जीमूतकवचच्छन्नो मणिकार्मुकधारकः ॥ ललितापूजनजपस्तोत्रपरायणः ॥ ॥श्री॥
॥४०॥ नभस्त्रीश्च नभस्यस्त्री सरसासरस्यमालिनी ॥ अंबादुलानीत ॥१७६॥
नीचाभ्रयंती मेघयंतीच ॥४१॥ वर्षयंती च पूर्णिका वारिधारा च शक्तयः ॥॥

अनंगशक्तित्वमापन्ना सेवंते प्रियकप्रियां ॥ इति मातंगकन्यानां उत्पत्तिं कुंभसं
भव ॥९॥ कथिताः सप्तकक्ष्याश्च साला लोहादिनिर्मिताः ॥ अगस्त्योवाच ॥ लोहा
दि सप्तसालानां रक्षकायेव संतिवै ॥१०॥ तन्नाम कीर्तय प्राज्ञ येन संशयभेदनं
हयग्रीव उवाच ॥ नानावृक्षमहोद्याने वर्त्तते कुंभसंभव ॥११॥ महाकालः सर्वलोक
भक्षकः श्यामविग्रहः ॥ श्यामकंचुकधारी च मदारुणविलोचनः ॥१२॥ ब्रह्मांडच
षके पूर्णबिंबान्वि श्वरसासवं ॥ महाकालिं घनश्यामां अनंगाद्धीमयोगवन् ॥१३॥
सिंहासने समासीनः कल्यायो कनकात्मिके ॥ नलि ध्यानसंपन्नो ललितापूज
नोत्सुकः ॥१४॥ वितन्वन् ललिताभक्ते श्वायुषो दीर्घदीर्घतां ॥ कालमृत्युप्रमुख्यै
श्च किंकरैः सोभिपूजितः ॥१५॥ महाकालो महाकालो ललिताज्ञाप्रवर्त्तकः ॥ विश्वं

॥ल॥ राकृतिः ॥५०॥ शिशिरर्तुर्मुनिश्रेष्ठ वर्तते कुंभसंभव ॥ साकस्मात्तेन सर्वत्र शिशिराकृ
॥३७७॥ तभूतला ॥५१॥ तन्नूसिनी ततः श्यामा देवता शीतलाकृतिः ॥ तपश्रीश्च तपस्यश्री
तस्य स्त्रीयोषिदुत्तमे ॥५२॥ ताभ्यां सहार्चयेत्त्वं वा ललितां विश्वपालिनीं ॥ अगस्त्य
उवाच ॥ गंधर्ववदन श्रीमान् नानारक्षादिसम्नके ॥५३॥ प्रथमोद्यानपालस्त्व महाका
लो मया श्रुतः ॥ चतुरावरणं चक्रं त्वया तस्य प्रकीर्तितं ॥५४॥ षण्णां चर्तूनामन्ये
षां कल्पकाद्यासु वाटिषु ॥ पालकं त्वं श्रुतं त्वत्तः चक्रदेव्यस्तु न श्रुताः ॥५५॥ अतस्य
वसंतादिचत्रावरणदेवताः ॥ क्रमेण ब्रूहि भगवान् सर्वज्ञस्त्वं यतो महत् ॥५६॥ ॥श्री॥
हयग्रीव उवाच ॥ आकर्णय मुनिश्रेष्ठ तत्र चक्रस्थदेवताः ॥ कालचक्रं पुराप्रोक्तं ॥३७७॥
वासंतं चक्रमुच्यते ॥५७॥ त्रिकोणपंचकोणाचना गच्छदसरोरुहं ॥ षोडशारं सरो

जं चं दशारद्वितयं पुनः ॥५८॥ चतुरस्रं च विज्ञेयं सप्तावरणसंयुतं ॥ तन्मध्ये बिंदुच
क्रस्थो वसंतर्तुर्महाद्युतिः ॥५९॥ तदंकद्वयसंलग्ने मधुश्रीमाधवश्रियौ ॥ उभाभ्यां
निजहस्ताभ्यां उभयोस्तनसेककं ॥६०॥ निपीडयेन्नन्यहस्तयुगलेन ससौरसं ॥ स्व
पुष्पमदिरापूर्णं चषकं पिशितं महत् ॥६१॥ एवमेव तु सर्वर्तुध्यानं विधिविमर्दन ॥ ष
र्तोस्तु पुनर्ध्यानं शक्तिद्वितयमादिमं ॥६२॥ अंकस्थितं तु विज्ञेयं शक्तयोन्याः समी
पगाः ॥ अथ वासंतचक्रस्थादेविश्शृणु वदाम्यहं ॥६३॥ प्रथमा मधुशुक्ला च मधुशुक्ल
द्वितीयका ॥ मधुशुक्ला तृतीया च मधुशुक्ला चतुर्थिका ॥६४॥ मधुशुक्ला पंचमी च मधुशुक्ला
च षष्ठिका ॥ मधुशुक्ला सप्तमी च मधुशुक्ला ष्टमी पुनः ॥६५॥ नवमी मधुशुक्ला तु दशमी
मधुशुक्लतः ॥ मधुशुक्लैकादशी च द्वादशी मधुशुक्लतः ॥६६॥ मधुशुक्ल त्रयोदशी याम

॥ल॥ धुशुक्ला चतुर्दशी॥ मधुशुक्लापौर्णिमी च प्रथमा मधुकृष्णातः॥६८॥ मधुकृ
॥१७८॥ ष्णाद्द्वितीया च मधुकृष्णात्तृतीयका॥ मधुकृष्णा चतुर्थी च मधुकृष्णा तु पंचमी
॥६९॥ षष्ठी तु मधुकृष्णा स्यात् सप्तमी मधुकृष्णातः॥ मधुकृष्णाष्टमी चान्या न
वमी मधुकृष्णातः॥७०॥ दशमी मधुकृष्णात्तु विंध्यगर्वनिषूदन॥ मधुकृष्णै
कादशी तु द्वादशी मधुकृष्णातः॥७१॥ मधुकृष्णात्त्रयोदश्यां मधुकृष्णा चतुर्द
शी॥ मध्यमा चेति विज्ञेया त्रिंशदेतास्तु शक्तयः॥७२॥ एवमेव प्रकारेण मा
धवाख्योपरिस्थिताः॥ शुक्लप्रतिपदाद्यास्तु शक्तयस्त्रिंशदन्यकाः॥७३॥ मिलि ॥श्री॥
त्वा षष्टि संख्यास्तु ख्यातास्तावा संति शक्तयः॥ स्वे स्वे मंत्रे स्वतंत्रचक्रे पूजनीया ॥१७८॥
विधानतः॥७४॥ वसंतचक्रराजस्य --- ॥ श्री ॥ ॥ ॥ ॥

वर्षर्तोर्द्वादशाश्रोक्ता मदारुणविलोचनाः॥४२॥ ताभिः समं सवर्षर्तुः शक्तिभिः परमेश्वरीं॥
सदैव पूजयन्नास्ते निजोर्धे पुष्पमंडले॥४३॥ रक्षिता भक्तदेशांस्तु भूषयंत्यस्य संपदा॥
तद्वैरिणां तु वसुधा मनांसि दृष्ट्वा निपीडयन्॥४४॥ वर्त्तते सततं देवीकिंकरो जलदाग
मः॥ मंदारवाटिकायां तु सदा शरदृतुर्वसन्॥४५॥ तां कक्षां रक्षति श्रीमान् लोकचि
त्तप्रसादनः॥ इषश्चोर्ज्जश्च तथोर्ज्जस्त्रीस्तस्य नौ प्राणनायिके॥४६॥ ताभ्यां सह ऋतुस्ता
मं निजोर्धेः पुष्पमंडले॥ अभ्यर्चयति साम्राज्ञीं श्रीकामेश्वरयोषितं॥४७॥ हेमंतर्तुर्म
हातेजा हिमशीतलविग्रहः॥ सदा प्रसन्नवदनो ललिताप्रियकिंकरः॥४८॥ निजो
र्धैः पुष्पसंभारैरर्चयन्परमेश्वरीं॥ पारिजातस्य वाटीं तु रक्षन्नार्तिखलमर्दन॥४९॥
सहस्त्रीश्च सहस्यस्त्री स्तस्य द्वे योषिते शुभे॥ कदंबवनवाट्यास्तु रक्षकः शिशि

सप्तावरणभूमयः॥ षष्टिस्याद्देवताषष्टीस्त्वासु भूमिषु संस्थिताः॥७५॥ प्रविभज्या
र्चीतीयास्कः तत्तन्मंत्रेण धेसांके॥ यथावासं तच्चक्रे स्यात्तथैवांगेषु नर्तुषु॥७६॥ देव
तास्तु परंभिन्नाः शुक्लकृष्णादि कीर्त्तयेत्॥ एवमेव प्रकारेण शुचिशुक्लादिभेदतः
७७॥ शक्तयः षष्टिसंख्याता ग्रीष्मचक्रे महोदयाः॥ एवं षर्त्वादि चक्रे भेदान्नभन
भस्यजान्॥७८॥ षष्टिषष्टितु शक्तीनां चक्रे चक्रे प्रतिष्ठिताः॥ ग्रंथविस्तरभीत्या
त तत्संख्या नाह्रिरन्यते॥७९॥ आर्त्तव्यः शक्तयस्त्वेता ललिताभक्तिसौख्यदाः॥
ललितापूजनध्यानजपस्तोत्रपरायणाः॥८०॥ कल्यादिवादिकाषड्डु संचरंत्योमहा
लसाः॥ स्वस्वपुष्पोत्थमधुभिस्तर्पयंतो महेश्वरीं॥८१॥ मिलित्वाचैव संख्याताः षट्
फलशतत्रयं॥ एवं सप्तसु सालेषु पालकाश्च चक्रदेवताः॥८२॥ नामकीर्त्तनपूर्वंतु प्रो

॥ल॥ का स्तुभ्यं मप्रछते ॥ अन्येषामपिसालानां उपदानस्वरूपकं ॥ ८७ ॥ विस्तारं तत्रश
॥१७१॥ कीश्रं कथयाम्यवधारय ॥ ८८ ॥ इति श्री ब्रह्माण्डपुराणे उत्तरभागे ललितोपाख्याने
अयतनखंडे हयग्रीवागस्त्यसंवादे श्रीनगरलोहादिसप्तप्रकारवस्त्वादिकथनंना
मषड्विंशोध्यायः ॥ २६ ॥ श्रीहयग्रीव उवाच ॥ कथितं लोहसालानां कथितं शिल्पिभिः
कृतं ॥ अथ रत्नमयाः सालाः प्रकीर्त्यं तेवधारय ॥ १ ॥ सुवर्णमयसालस्य पुष्परागमय
स्य च ॥ सप्तयोजनमात्रं तु मध्येनरमुदाहृतं ॥ २ ॥ तत्र सिध्धा सिध्धनार्यो खेलंति
मदलालसा ॥ रसैरसायनैश्चैव खड्गैः पादांबुजैरपि ॥ ३ ॥ ललितायां भक्तियुक्ता ॥श्री॥
स्तर्पयंतो महाजनान् ॥ वसंति विविधास्तत्रपिबंत्यो मदिरारसान् ॥ ४ ॥ पुष्परागा ॥१७१॥
दिसालानां पूर्ववद्द्वारकॢप्तयः ॥ पुष्परागादिसालेषु कवाटार्गलगोपुरं ॥ ५ ॥ पुष्प

रागाद्द्विज ज्ञेयं मुद्यदादित्यभास्वरं ॥ हेमप्राकारचक्रस्य पुष्परागमयस्य च ॥ ६ ॥
अंतरे या स्थली सापि पुष्परागमयी स्मृता ॥ वक्ष्यमाणमहासालकेष्वेनि खिलास्व ६३
पि ॥ ७ ॥ तद्वर्णपक्षिणस्तत्र तद्वर्णा निर्झरांसि च ॥ ७ ॥ तद्वर्णललितानद्यः तद्वर्णाश्च
मणिद्रुमाः ॥ सिद्धजातिषु यो देवीमुपास्य विविधैः क्रमैः ॥ ८ ॥ ते तत्र स्वस्वसंपन्ना
सिद्धास्तत्र च सांगनाः ॥ ललितामंत्रजप्तारो ललिताक्रतुतत्पराः ॥ ९ ॥ ते सर्वे ल
लितादेव्या नामकीर्तनकारिणः ॥ पुष्परागमहासालांतरे मारुतयोजने ॥ १० ॥ पद्मरा
गमहासालः चतुरस्रः समंततः ॥ स्थली च पद्मरागाढ्या गोपुराद्यं च तन्मयं ॥ ११ ॥
तत्र चारणलोकस्थाः पूर्वदेहविनाशतः ॥ सिद्धिं प्राप्ता महाज्ञीचरणांभोजसेवकाः
१२ ॥ चारणानां स्त्रियश्चापि चार्वंगी मदलोचनाः ॥ गायंत्यो ललितादेव्या गीतवै

॥ल॥ धामुहुर्मुहुः॥१३॥ तत्रैव कल्पवृक्षाणामदस्थाद्वेदिकास्थिता ॥ भर्तृभिः सहचारिण्यः
॥३८॥ पिबंति मधुरं मधु॥१४॥ पद्मरागमहासालांतरे मारुत योजने ॥ गोमेधिकस्य साल
स्तु पूर्वसालसमाकृतिः॥१५॥ तदंतरे योगिनीनां भैरवाणां च कोटयः॥ कालसंकर्षिणी
मेनां सेवंते तत्र मूर्तयः॥१६॥ गोमेधिकमहासालांतरे मारुत योजने ॥ अत्युत्तुंगो
हीरसालस्तयोर्मध्ये च हीरभूः॥१७॥ तत्र देवीं समभ्यर्च पूर्वजन्मनि कुंभज ॥ वसंत्य
प्सरसां वृंदैः सार्धं गंधर्वपुंगवाः॥१८॥ महाराज्ञी गुणगणा गायंतो वल्लकी स्वनैः॥
कामभोगैकरसिकाः कामसंनिभविग्रहाः॥१९॥ स्तुकुमारप्रभृतयः श्रीदेवीभक्ति ॥श्री॥
शालिनः॥ उर्वशी मेनका चैव रंभा बालंबुसा तथा॥२०॥ मंजुघोषा सुकेशी च पूर्वचि ॥३८॥
त्तिघृताचिका ॥ कृतस्थला च विश्वाची पुंजीकस्थलया च ह ॥२१॥ ॥

॥ल॥ महाराज्ञीमंत्रजपैः विघ्नानाशेषकल्मषाः ॥ नृत्यंते श्चैव गायंते आवर्तंते कुंभसंभव
॥३८॥ ३०॥ तत्रैव बाह्यकक्षोण्यां वज्रा नाम नदी मुने ॥ वज्राकारैर्निविडैर्निभा समा तटद्रुमैः
॥३१॥ कज्जरत्नैकरसिकता वज्र इव मणोदका ॥ सदा वहंती सा सिंधुः परितस्त्रिपा
वनी ॥३२॥ ललितापरमेशान्याभक्ता ये मानवो नमाः ॥ ते तस्या उदकं पीत्वा वज्ररूप
कलेवराः ॥३३॥ दीर्घायुषो निरोगाश्च भवंति कलशोद्भव ॥ भंडासुरेण गलिते मुक्तवज्रे
शतक्रतुः ॥३४॥ तस्यास्तिरे तपस्तेपे वज्रेशी प्रतिभक्तिमान् ॥ वज्रला दुहिता देवी
वज्रं दत्वा बलिद्विषे ॥३५॥ पुनरेतद्धि सोपि कृतार्थः स्वर्गमेषिवान् ॥ अथ वज्रास्य ॥श्री॥
सालस्यांतरे मारुत योजने ॥३६॥ वैडूर्यसालस्तुत्तुंगः पूर्ववक्त्रो पुरान्वितः ॥ स्थली चत ॥३८१॥
त्र वैडूर्यनिर्मिता स्वराकृतिः ॥३७॥ पातालवासिनो ये ये श्रीदेव्यर्चनसाधकाः ॥ ते सि

द्धमूर्तयस्तत्र वसंति सुखमेदुराः ॥३८॥ शेषकार्कोटकमहापद्मवसुकिशंखकाः ॥ तक्ष
कः शंखचूडश्च महादंतो महाफणाः ॥३९॥ इत्येवमादयस्तत्र नागा नागस्त्रियोपि च
बलींद्रप्रमुखानां च दैत्यानां धर्मवर्तिनां ॥४०॥ गणास्तत्र सदा नागैः सार्धं वसंति सांग
नाः ॥ ललितामंत्रजप्तारो ललिताशास्त्रदीक्षिताः ॥४१॥ ललितपूजका नित्यं वसंत्यसु
रभोगिनः ॥ तत्र वैडूर्यकक्ष्यायां नद्यः शिशिरयाधसः ॥४२॥ सरांसि मत्तहंसानि सार
सालंकृतानि च ॥ भवनानि च दिव्यानि वैडूर्यमणिवंति च ॥४३॥ तेषु क्रीडंति ते नागा
असुराश्च सहांगनाः ॥ वैडूर्याख्य महासालांतरे मारुतयोजने ॥४४॥ इंद्रनीलमहा
सालः चक्रवाल इवापरः ॥ तन्मध्यकक्ष्याभूमिश्च नीलरत्नमयी मुने ॥४५॥ तत्र नद्य
श्च मधुराः सरांसि शिखराणि च ॥ नानाविधानि भोग्यानि वसूनि सरसान्यपि ॥४६॥

॥स॥ ये भूर्लोकगता मर्त्या ललिताक्रमसाधकाः ॥ ते देहान्ते शचुनीलोकस्यां माप्य वसे
॥३८॥ ति हि ॥ ४७ ॥ तत्र दिव्यानि वस्तूनि भुंजाना वनितासखाः ॥ पिबंत्यो मदिरं मद्यं नृत्यंतो
भक्तिनिर्भराः ॥ ४८ ॥ सरस्तटेषु सिंधूनां कुंजेषु कलशोद्भव ॥ लतागृहेषु रम्येषु मंडपे
षु महर्द्धिषु ॥ ४९ ॥ सदा जयंतः श्रीदेवीं पटंतः स्थापितद्गुणान् ॥ निवसंति महाभागा
नारिभिः परिवेष्टिताः ॥ ५० ॥ कर्मक्षये पुनर्यांति भूर्लोके मानुषीं तनुं ॥ पूर्ववासनया
युक्तः पुनरर्चंति चक्रिणं ॥ ५१ ॥ पुनर्यांति श्रीनगरे शक्रनील महास्थलीं ॥ तत्स्थलस्ये
वसंपर्का द्रागहेष समुद्भवैः ॥ ५२ ॥ नीलैर्भावै सदा युक्ता वर्त्तंते मनुजा मुने ॥ ये ॥श्री॥
पुनर्यांति नो मर्त्या निर्द्वंद्वा नियतेंद्रियाः ॥ ५३ ॥ ते मुने चिंतमयां भूत्वा संवि ॥३८॥
शंति महेश्वरीं ॥ इंद्रनीलाख्यसालस्यांतरे मारुतयोजने ॥ ५४ ॥ ॥

तिलोत्तमेति देवानां वेश्या एताहृशोपराः ॥ गंधर्वैः सह नव्यानि कल्पवृक्षमधूनि च ॥ २२ ॥
पिबंत्यो ललितादेवीं ध्यायंत्यश्च मुहुर्मुहुः ॥ स्वसौभाग्यविद्धयर्थं गायंत्यश्च तन्म
नुं ॥ २३ ॥ चतुर्दशसु चोत्पन्ना स्थानेष्वप्सरसोखिलाः ॥ तत्रैव देवीमर्चंत्यो वसंति मु
दिताशयाः ॥ २४ ॥ अगस्त्य उवाच ॥ चतुर्दशापि जन्मानि तासामप्सरसां विभो ॥ कीर्त
यत्वं महाप्राज्ञ सर्वविद्याकलानिधे ॥ २५ ॥ हयग्रीव उवाच ॥ ब्रह्मणो हृदयं कामो मृ
त्युरुर्वश्च मारुतः ॥ तपनस्य कराश्चेंदुकरा वेदाश्च पावक ॥ २६ ॥ सौदामिनी च पीयू
षां दक्षकन्ये जलं तथा ॥ जन्मनः कारणान्येतान्याम नंती मनीषिणः ॥ २७ ॥ गीर्वाणप
त्य नारीणां स्फुरत्सौभाग्यसंपदां ॥ एताः समस्ता गंधर्वैः सार्थमर्चंति चक्रिणीं ॥ २८ ॥ किं
नराः सह नारीभिस्तथा किंपुरुषा मुने ॥ स्त्रीभिः सह मदोन्मत्ताः हीरकस्थलमाश्रिताः ॥ २९ ॥

॥ल॥ मंत्रचोरान् कुमंत्रांश्च कुविद्याधरमाश्रितान् ॥ ६३ ॥ नास्तिकान् पापशीलांश्च तथैव प्रा
॥३८॥ णिहिंसकान् ॥ स्त्रीद्विषां लोकविद्विषान् अन्यानपि च पापिनः ॥ ६४ ॥ कालसूत्रे रौरवे
च कुंभीपाके च कुंभज ॥ असिपत्रवने घोरे कृमिभक्षे प्रतापिनी ॥ ६५ ॥ ज्वालाभक्षे
सूचिवधे तथैवांगारतापिनी ॥ एवमादिषु कष्टेषु नरकेषु घटोद्भव ॥ ६६ ॥ पातय
त्याज्ञया तस्याः श्रीदेव्याश्च महौजसः ॥ तस्यैव पश्चिमे भागे निर्ऋतिः खड्गधारकः ॥ ६७
राक्षसं लोकमाश्रित्य वर्त्तते ललितार्चकः ॥ तस्य चोत्तरभागे तु द्वारयोरंतरस्थले
६८ ॥ वारुणं लोकमाश्रित्य वरुणो वर्त्तते सदा ॥ वारुण्यास्वादनोन्मत्तः शुभ्रांगो ॥श्री॥
झषवाहनः ॥ ६९ ॥ सदा श्रीदेवतामंत्रजापी श्रीक्रमसाधकः ॥ श्रीदेवतादर्शनस्य ॥३८॥
दूषिणः पाशबंधनैः ॥ ७० ॥ बध्नात्ययं न धीमान् भक्तानां बंधमोचकः ॥ तस्य चोत्तरको

णेषु वायुलोको महाद्युतिः ॥ ७१ ॥ तत्र वायुः शरीराश्च सदानंदमहोदयाः ॥ सिद्धादि
व्यर्षयश्चैव पवनाभ्यासिनो परे ॥ ७२ ॥ गोरक्षप्रमुखाश्चान्ये योगिनो योगतत्पराः ॥
एतैः सह महासत्वस्तत्र श्रीमारुतेश्वरः ॥ ७३ ॥ ध्वजहस्तो मृगपते वाहने महति स्थि
ता ति ॥ ललितजपनध्यानक्रमपूजनतत्परः ॥ ७४ ॥ सप्तधाभिन्नमूर्त्तिश्च वर्त्तते कुंभसं
भव ॥ इडा च पिंगला चैव सुषुम्ना तस्य शक्तयः ॥ ७५ ॥ तिस्रो मारुतनाथस्य सदाम
धुमदालसाः ॥ आनंदपूरितांगीभिरन्याभिः शक्तिभिर्वृतः ॥ ७६ ॥ समारुतेश्वरः श्री
मान् सदा जपति चक्रिणीं ॥ येन सत्वेन कल्पांते त्रैलोक्यं सचराचरं ॥ ७७ ॥ परागम
यतानीत्वा विनाशयति तत्क्षणात् ॥ तस्य सर्वस्य वृध्यर्थं तामेव ललितेश्वरीं ॥ ७८
पूजयत्यानवं यन्नास्ते सर्वाभरणभूषितां ॥ तल्लोकपूर्वभावस्थे यक्षलोके महाद्युतिः ॥ ७९

॥ल॥ यक्षेन्द्रो वसति श्रीमान् तद्द्वारद्रुममध्यगः ॥ निधिभिश्च नवाकारैर्निधिवृद्ध्यादिशक्ति
॥३८५॥ भिः ॥८०॥ सहितो ललिताभक्तान् पूरयन् धनसंपदा ॥ यक्षिभिश्च मनोज्ञाभिरनुकूलप्र
वर्त्तिभिः ॥८१॥ विविधैर्मधुभेदैश्च संपूजयति चक्रिणीं ॥ मणिभद्रः पूर्णभद्रो मणि
मान् मणिकंधरः ॥८२॥ इत्येवमादयो यक्षाः सेनान्यस्तत्र शाक्तिवे ॥ तल्लोकपूर्वभागे
तु रुद्रलोको महोदयः ॥८३॥ अनर्घरत्नखचितास्तत्र रुद्रोऽधिदेवता ॥ सदैव
मन्युनादीप्ताः सदाबद्धमहेषुधीः ॥८४॥ अधिज्यं च धनुर्बिभ्रज्ज्वलत्पिंगललो
चनः ॥ जटामुकुटशोभाढ्यः सर्वाभरणभूषितः ॥८५॥ स्वसमानैर्महासत्वैर्लोक ॥श्री॥
निर्दहदक्षकैः ॥ अधिज्यकार्मुकैर्दक्षैः षोडशावरयास्थितैः ॥८६॥ आवृतः स ॥३८५॥
ततं वक्त्रे जपंस्तां देवतामनुं ॥ श्रीदेवीध्यानसंपन्नो श्रीदेवीपूजनोत्सुकः ॥८७॥

मुक्तारत्नमयः सालः पूर्ववद्गोपुरान्वितः ॥ अत्यंतभास्वरस्वच्छा तयोर्मध्यस्थली मुने ॥५५॥
सर्वापि मुक्ताखचिता शिशिरातिमनोहरा ॥ ताम्रपर्णी महापर्णी सदामुक्तामहोदकाः
॥५६॥ एवमाद्या महानद्यो वहंत्यत्र महास्थले ॥ तासां तीरेपि सर्वेपि देवलोकनिवासि
नः ॥५७॥ वसंति पूर्वजनुषी श्रीदेवीमंत्रसाधकाः ॥ पूर्वोद्यत्स्कभागेषु लोकाश्चक्षादि
गोचराः ॥५८॥ मुक्तासालस्य परितः संयुक्तद्वारदेशिकाः ॥ मुक्तासालस्य नीलस्य द्वार
योर्मध्यदेशतः ॥५९॥ पूर्वभागे शक्रलोकः स्तत्कोणे वह्निलोकभूः ॥ याम्यभागे यमपुरं
तत्र दंडधरः प्रभुः ॥६०॥ सदा श्रीदेवतामंत्रजापी तीव्रस्वभाववान् ॥ आज्ञाधरो यमभ
टैश्चित्रगुप्तपुरोगमैः ॥६१॥ सार्धं निपीडयत्येव श्रीदेवीसमयद्रुहः ॥ गुरुशासनदु
राचारान् ललिताद्वेषकारिणः ॥६२॥ कूटभक्तिपरान्मूर्खान् स्तब्धानत्यंतदर्पितान् ॥

॥ल॥ चवर्षन्ति षवः प्रदीप्तापिंगलेक्षणाः॥ अर्णवे चांतरिक्षे च वर्त्तमाना महौजसः॥९५॥
॥१८५॥ जटावंतो धनुष्मंतो नीलग्रीवाः कपर्द्दिनः॥ ये त्वन्नेषु विविध्यंते पात्रेषु पिबतो जं
नान्॥९६॥ ये पथो रक्षका रुद्रा ये च तीर्थनिवासिनः॥ सहस्रसंख्याये चान्ये स्रुका
वंतो निषंगिणः॥९७॥ ललिताज्ञाप्रणेतारो दिशो रुद्वितास्थिरे॥ ते सर्वे स्कमहात्मा
नः क्षपाहि श्वत्रये दहः॥९८॥ श्रीदेवीध्याननिष्णातान् श्रीदेवीमंत्रजापिनः॥
श्रीदेवतायां भक्तांश्च पालयंति कृपालयः॥९९॥ षोडशावरणं चक्रं मुक्ताप्राकारमं
डले॥ आश्रित्य रुद्रास्ते सर्वे महारुद्रं महोदयं॥१००॥ हिरण्यबाहुप्रमुखा ज्वलन्म ॥श्री॥
न्युमुपासते॥ इति ते रत्नसालस्था कक्ष्या स्तत्र स्थिता अपि॥१०१॥ संक्षेपतो म ॥१८५॥
या प्रोक्तो मुक्ताख्यावरणावधी॥२॥ इति श्रीब्रह्मांडपुराणे उत्तरभागे ललितोपा

ख्याने ऽअयनन खंडे हयग्रीवागस्त्यसंवादे पुष्यरागादिमुक्ताप्राकारांतरकथनं नाम
सप्तविंशोध्यायः॥२७॥ हयग्रीव उवाच॥ षोडशावरणं चक्रे किं तद्रुद्राधिदेवतं॥ तत्राः
स्थिताश्च रुद्राः के केन नाम्ना प्रकीर्तिताः॥१॥ केषावरणविंबेषु किं नामानो वसंति
ते॥ योगिकं रौठिकं नाम षां ते ब्रूहि कृपानिधे॥२॥ हयग्रीव उवाच॥ तत्र रुद्रालयः प्रो
क्तो मुक्ताजालकनिर्मितः॥ पंचयोजनविस्तारः तत्संख्यायामशोभितः॥३॥ षोडशा
वरणेषु क्तो मध्ये पीठं मनोहरं॥ मध्ये पीठे महारुद्रो ज्वलन्मन्युस्त्रिलोचनः॥४॥
सज्जकार्मुकहस्तश्च सर्वदा वर्त्तते मुने॥ त्रिकोणे कथिता रुद्रास्त्रय एव घटोद्भ
व॥५॥ हिरण्यबाहुः सेनानी दिशां पतिस्तथापरः॥ वृक्षश्च हरिकेशाश्च तथा पशु
पतिः परः॥६॥ ससिंजरास्त्विषीमांश्च पथीनां पतिरेव च॥ एतेषु कोणगाः किंचि

॥ल॥ बभ्रुशार्ङ्गकोणके ॥७॥ विद्याधरपतिश्चैव हरिकेशोपवीतिनो ॥ पुष्टानांप
॥३८५॥ तिरप्यन्यो भवो हेतिस्तथैव च ॥८॥ दशपत्रेत्वावरणे प्रथमो जगतां पतिः ॥ रुद्र आतता
विनो क्षेत्रेपतिः सूतस्तथापरः ॥९॥ अहंत्योन्यो वनपतिः रोहितस्थपतिस्तथा
वृक्षाणां पतिरप्यन्यः एते सज्जशरासनाः ॥१०॥ मंत्रीच वाणिश्चैव तथा कक्षपति
स्तथा ॥ भुवंतस्तु चतुर्थस्या पंचमो वरिवस्कृतः ॥११॥ ओषधीनां पतिश्चैव षष्ठः
कलशसंभव ॥ उच्चैर्घोषाक्रंदयंतो पत्तीनां च पतिस्तथा ॥१२॥ कृत्स्नवीतश्च धा
वश्च सत्वानां पतिरेव च ॥ एते ह्वादशपत्रस्थाः पंचमावर्णदेवता ॥१३॥ सहमान ॥श्री॥
श्च निव्याधिराव्याधिनिपतिस्तथा ॥ कुंकुमश्च निषंगी च स्तेतानां च पतिस्तथा ॥१८५॥
१४॥ निषंगीस्यादिषुधिमान् तस्कराणां पतिस्तथा ॥ वंचश्च परिवंचश्च

अनेककोटिरुद्राणि गणमंडितपार्श्वभूः ॥ ताश्च सर्वा महीनांगो नवयौवनगर्विताः
८८॥ ललिताध्याननिरता सदालसमदालसा ॥ ताभिश्चासाकं स श्रीमान् महारुद्र
त्रिशूलभृत् ॥८९॥ हिरण्यबाहुप्रमुखै रुद्रैरन्यैर्निषेवितः ॥ ललितादर्शनभ्रष्टानु
द्धतान् पुरुभिः कृतान् ॥९०॥ शूलकोट्यादिनिर्भिन्नै नेत्रोघैः कटुपावकैः ॥ दहंस्ते
षां पशून्भृत्यान् प्रजांश्चैव विनाशयन् ॥९१॥ आज्ञाधरो महावीरो ललिताज्ञाप्र
वर्त्तकः ॥ रुद्रलोके निरुचिरे वर्त्तते कुंभसंभव ॥९२॥ महारुद्रस्य तस्यक्रषे परिवा
राप्रमाथिनः ॥ रुद्रस्यानानसंख्या तान्कोवावक्तुं प्रभुर्भवेत् ॥९४॥ ये रुद्रा अधिभू
म्यां च सहस्राणां सहस्रशः ॥ मेनरिक्षे हि वर्त्तंते सहस्राणां सहस्रशः ॥ दिवि ये पि
च वर्त्तंते सहस्राणां सहस्रशः ॥ येषामन्नमिषुश्चैव येषां वातस्तथेषवः ॥९५॥ येषां

॥ल॥ श्चैव व्राताव्राताधिपास्तथा ॥२३॥ गणाश्च गणपतयो विरूपो विश्वरूपकः ॥ महां
॥१८७॥ तक्षुल्लकाश्चैव रथिनश्च तथापरे ॥२४॥ रथाश्च रथपत्याख्या सेनासेनानयस्तथा
क्षत्तारः संग्रहीतारः तक्षाणो रथकारकाः ॥२५॥ कुलालाश्चेति धर्मीस्तेनवमाहु
त्तिदेवताः ॥ रुद्रास्त्वेतेन विश्वरूपा विशंत्यत्रैष्य वस्थिता ॥२६॥ कर्मारश्चैव पुंजिष्ठा
निषाधाश्चेषुकृरूणाः ॥ धन्वकाराम्मृगयवः श्वनयः श्वान एव च ॥२७॥ तथा श्वप
तयश्चैव भवारुद्रोघरोद्भव ॥ शर्वः पाशुपतिर्नीलग्रीवश्चशितिकंटकः ॥२८॥
कपर्दिव्युप्तकेशाश्च सहस्राक्षस्तथापरः ॥ शतधन्वा च गिरिशः शिपिविष्टश्च ॥श्री॥
कुंभजः मीढुष्टमाइतिप्रोक्ता रुद्रादशमसालगाः ॥ द्वाविंशत्सुदलेष्वेते संस्थि ॥१८७॥
ताः प्रभुसंमिताः ॥३०॥ अथैकादशचक्रस्याद्दृषुमद्दश्च वामनः ॥ बृहंश्च वर्षीयां

श्चैव वृद्धस्त्वं वृधवा सह ॥३१॥ अग्र्यः प्रथमआशुश्च जिरोन्यः शीघ्रशोभ्यकौ
ऊर्म्यो वस्वन्य रुद्रोच स्त्रोतस्यो द्वीप एव च ॥३२॥ ज्येष्ठश्चैव कनिष्ठश्च पूर्वजोव
परजस्तथा ॥ मध्यमश्चापगल्भश्च जघन्यश्च घरोद्भव ॥३३॥ चत्वारिंशतिसं
ख्याता येते रुद्रा महाबलाः ॥ बुध्न्यः सोभ्यश्च रुद्राश्च प्रतिसर्यकयाम्यकौ ॥३४
क्षेम्यो वैर्यश्चिरवल्यश्च तत्तश्लोक्यावसान्यकौ ॥ वन्य कक्ष श्रवाश्चैव ततोन्यस्तुप्र
तिश्रवाः ॥३५॥ आशुषेणश्चाशुरथः शूरश्च तव सान्निधे ॥ अवभिंदश्च वर्मी च
वरूथी बिल्मिनास्तत ॥३६॥ कवचीश्रुतसेनश्च श्रुतो दुंदुभ्य एव च ॥ अहनन्यश्च
धृष्णूचेत्येते षड्विंशतिः स्मृताः ॥३७॥ द्वादशावरणस्थाश्च महाकाया महाबलाः ॥
प्रमृशश्चैव दूतश्च प्रहितश्च निषंगिकः ॥३८॥ अन्यस्त्विषुधिमानस्तीक्ष्णे

॥ल॥ पुश्च तथा युधी॥ स्वायुधश्च स्कधन्वा च स्कत्यंप ध्यश्च कुंभज॥ ३९॥ काव्यो नीव्य
॥१८८ स्तथा सृद्यः सरस्यो विंध्यमर्दन॥ तथा चाद्यो नाघ नामा वेशंतः कूप्य एव च॥ ४०॥
अवस्यावर्णवर्ष्यीश्च मेध्यो विद्युत्य एव च॥ ईध्र्यातप्य तथा वात्या रेष्मीचश्च तथा
परः॥ ४१॥ धारस्तव्यो वास्तुपश्चैव सोमश्चेति महाबलाः॥ त्रयोदशावरणगा बलि
स्त्रिशद्दले ध्वमी॥ ४२॥ संस्थिता सर्वगा रुद्रा एवं नामान्वृत्तिं मुने॥ रुद्रस्ताम्रो
रुणश्शंगस्तथा पशुपतिर्मुने॥ ४३॥ उग्रो भीमस्तथैवाग्रेवधदूरेवधाअपि॥ हंता
चैव हनीयांश्च वृक्षस्य हरिकेशवः॥ ४४॥ तारः शंभुर्मयोभूश्च शंकरश्च मयस्क ॥श्री॥
रः॥ शिव शिवतरश्चैव तीर्थ्य कूल्यस्तथैव च॥ ४५॥ पार्यो वार्यो प्रतरणो तथा चो ॥१८८॥
तरणो मुने॥ आतार्यलाद्य नामानो शष्पयुफेन्यस्तथा परः॥ ४६॥ ॥

स्तायूनां च पतिस्तथा॥ ३५॥ निचेरुश्चेति विज्ञेया षष्ठावरणदेवताः॥ आधः परिचरोर
ण्यपतिः किंच सृकावयः॥ ३६॥ जिघांसंतो मुष्णतां च पतयः कुंभसंभव॥ असीमंत
श्च स्कभा ज्ञ तथा नक्तंचरा मुने॥ ३७॥ प्रकृतानां पतिश्चैव उष्णीषी च गिरिचरः॥ कु
लुंचानां पतिश्चैव मंतः कलशोद्भव॥ ३८॥ धन्वाविधश्चातन्वानाप्रतिपूर्वदधा
नकाः॥ आयच्छंतः षोडशैते षोडशारनिवासिनः॥ १९॥ विसृजंतस्तथास्यंतः वि
ध्यंतश्चापि सिंधुप॥ आसीनाश्च शयानाश्च स्वपंतो जाग्रतस्तथा॥ २०॥ तिष्ठंतश्चै
व धावंतो सभाश्चैव सभाधिपाः॥ अश्वाश्चैवाश्वपतयः आव्याधिन्यस्तथैव च
२१॥ विविध्यंतश्चोगणाश्च स्तृंहंतो विंध्यमर्दन॥ गृत्साश्चाष्टादशविधा देव
ताह्यमाहतो॥ २२॥ अष्टादशारपत्रेषु रुद्रास्त्वेते संस्थिताः॥ अथ गृत्सपति

॥ल०॥ र्तकः॥ वर्त्तते जगज्जतां मध्ये मुक्तसालेशकोणके॥ ५२॥ शतरुद्रियसंख्याता एते रुद्रा
॥१८९॥ महाबलाः॥ ललिताभक्तिसंपन्ना पालयंती दिवानिशं॥ ५३॥ विभक्ता ललितादे
व्यां प्रत्यहं योजयंत्यमी॥ इत्थं शक्रादिदिक्पाला मुक्तासाले समाश्रिताः॥ ५४॥ ललि
तापरमेशान्या सेवामेव वितन्वते॥ अथ सुकाख्यसालस्य अंतरे मारुतयोजनो॥ ५५॥
सालो मरकताभिख्यः चतुर्योजनमुच्छ्रितः॥ पूर्ववद्गोपुरादीनां संस्थानेश्च समशोभि
त॥ ५६॥ तत्र श्रीदंडनाथाया दहनादिविदिग्गताः॥ चत्वारो निलयाः प्रोक्ता मंत्रिगृह
विस्तराः॥ ५७॥ किंचिच्चक्ररथेंद्रस्य याः पर्वणि समाश्रिताः॥ भंडासुरमहायुद्धे ता ॥श्री॥
देव्यस्तत्र जागती॥ ५८॥ सर्वा स्थली मरकतश्रेणीभिः खचिता शुभाः॥ हेमतालव ॥१८९॥
नाद्याश्च सर्ववृक्षसमाकुला॥ ५९॥ तत्र देव्यः समस्ताश्च दंडनाथासमाश्रयाः॥ हलो

पूर्णा हलपूर्णा मुसलाः संचरंत्यमी॥ संख्यातीतास्तालवृक्षा नवस्वर्णविचित्रिताः॥
योर्यजनायतकाडांश्च दलैर्युक्ता विशंकटैः॥ ६१॥ हेमत्वचो तिसुस्निग्धसच्छायाः
फलभंगुराः॥ आमूलाग्रं लंबमानास्तालहासा घटाकुलाः॥ ६२॥ वर्त्तते दंडनाथा
याः प्रीत्यर्थं शिशुभिः कृताः॥ तत्र तालस्रवापूरं पीत्वा पीत्वा मदाकुलाः॥ ६३॥ जंभिन्या
द्याश्चक्रदेव्यो हेतुकाद्याश्च भैरवाः॥ सप्तविघ्नं देव्यश्च नृत्यंतो मदविह्वलाः॥ ६४॥ ह
चतुर्विदिक्षु दंडिन्या यत्र यत्र महाद्भुतान्॥ तत्र पूर्वादिदिग्भागे देवीसदृश[illegible]र्चसः
६५॥ उन्मत्तभैरवी स्वैव स्वप्नेशी चतिरस्कृतिः॥ तथा किरिपिथा देवी सेवंते दंडनायि
कां॥ ६६॥ एषा कुसुमरकता प्रकृतिः सर्वतो दिशः॥ निवासे दंडनाथाया केवलत्वाभि
मानिकः॥ ६७॥ तस्यास्त्यसेवावासोत्यो महामध्यादविस्थले॥ तत्कक्ष्यापादवीयं स्वा

॥ ल॥ सेवार्थं तत्र तद्गृहे ॥ ६८ ॥ अधोमरकताकारमालांते स्वत्ययोजने ॥ प्राकारो विद्रु
॥ १९०॥ माकारः प्रातरर्यमपाटलः ॥ ६९ ॥ तत्र स्थली च सकला विद्रुमेणैव निर्मिता ॥ तत्र
विद्रुमसंकाशो ब्रह्मा नलिनविष्टरः ॥ ७० ॥ ब्रह्मलोकात्समागत्य सार्धं सर्वैर्मुनी
श्वरैः ॥ महाश्रीललितादेव्याः सेवनार्थमतंद्रितः ॥ ७१ ॥ मरीच्याद्यैः प्रजासृड्भिर्व
र्त्तते साकमव्ययः ॥ चतुर्दशापि विद्यास्ता उपविद्याः सहस्रशः ॥ ७२ ॥ चतुःषष्टिक
लाश्चैव शरीरिण्यो महत्तराः ॥ प्राकारे विद्रुमाकारे ब्रह्मलोके समाश्रिताः ॥ ७३ ॥
वर्त्तते जगतां मध्ये ललिता देवताज्ञया ॥ अथ विद्रुमसालस्यांतरे मारुतयोज ॥श्री॥
ने ॥ ७४ ॥ माणिक्यमंडपन्नामा कस्यांतरमुदीरितं ॥ नानारत्नकृतः सालः पूर्ववि ॥१९०॥
द्गोपुरान्वितः ॥ ७५ ॥ माणिक्यमंडपस्थाने परितः सर्वतो दिशं ॥ वर्त्तते विष्णुलोकस्तु

एते त्रिंशत्महारुद्रा दीप्तकोपा उदायुधाः ॥ ४६ ॥ चतुर्दशावर्णगाममहारुद्रमुपा
सते ॥ सिकत्यस्य प्रवात्यश्च ईरिण्यश्च प्रपथ्यकः ॥ ४७ ॥ किंशिलक्षयणौश्चैव
कपर्दी विपुलस्त्यकः ॥ गोष्ठ्यो गृहः सल्पगेह्यौ कात्स्यश्याद्गह्वरेष्ठ्यः ॥ ४८ ॥ ह्रादयश्च
निवेष्ठ्यश्च पांसव्यश्च रजश्चकः ॥ शुष्को हरित्यो लोप्यश्चौलप्याधोसूर्मएव च
४९ ॥ पर्णश्च वर्णशिधश्च तथोपगुरमाणकः ॥ आविघ्नं तारिदंचैव प्रनिदनि
रिकस्तथा ॥ ५० ॥ देवानां हृदयं चैव ह्यित्रिंशत्रुद्रदेवताः ॥ वर्त्तते सायुधाः प्राज्ञ नित्यं
पंचदशावृत्तो ॥ ५१ ॥ षोडशोषवणाके पूर्वा-- द्विद्वारवर्त्तिनः ॥ विक्षिणका विचिन्व
कास्तथा निर्हतनामकाः ॥ ५२ ॥ अमीवत्काश्च दीप्तास्त्रा महारुद्रमुपासते ॥ इति
षोडशसालेषु स्थितै रुद्रैः सहस्रशः ॥ ५३ ॥ सेवितस्तु महारुद्रो ललिताज्ञाप्रव

॥ल॥ त्यां जलदप्रदः ॥८४॥ वायव्यां वामनो वज्री तरुणादित्यदीप्तिमान् ॥ ईशान्यां पुंड
॥१९१॥ रीकाक्षः श्रीधरपंङ्क्तिशायुधः ॥८५॥ विद्युत्प्रभो हृषीकेशः अधस्ताद्दिशि सुद्युती
पद्मनाभः शार्ङ्गपाणिः सहस्राक्षो समप्रभः ॥८६॥ माणिक्यमंडपस्थानमनुलोमे
नवेष्टते ॥ सर्वायुधः सर्वशक्तिः सर्वज्ञः सर्वतोमुखः ॥८७॥ इंद्रगोपकसंकाशः पा
शहस्तो पराजितः ॥ दामोदरस्तु सर्वात्मा ललिताभक्तिनिर्भरः ॥८८॥ माणिक्यमंड
पस्थानं विलोमेन विवेष्टितं ॥ इति द्वादशभिर्देवैर्भगवानंबुजेक्षणः ॥८९॥ माणिक्य
मंडपगते विष्णुलोके विराजिते ॥ अथ नानारत्नसालांतरे मारुतयोजन ॥९०॥ ॥श्री॥
सहस्रस्तंभकं नाम मंडपं सुमनोहरं ॥ नानारत्नैस्तु खचितं नानाकल्पैरलंकृतं ॥९१॥ ॥१९२॥
नानारत्नकृतः सालस्तुंगस्तत्राभिवर्त्तते ॥ एका पंक्तिः सहस्रैश्च स्तंभैस्तीर्यप्रव

र्त्तिते ॥९२॥ ताहश्यपंक्तयो बाह्यः स्तंभानां तु चतुर्दिशं ॥ उपर्याच्छादनं चापि पूर्व
वद्रत्नदारुभिः ॥९३॥ शिवलोकस्तत्र महान् जागर्त्ति स्थगितद्युतिः ॥ शैवागमामू
र्त्तिमंतः तत्राष्टाविंशतिस्मृताः ॥९४॥ नंदीभृंगीमहाकालप्रमुखस्तत्र चोत्तमाः ॥
षड्विंशत्च देवाश्च गजवक्त्रा सहस्रशः ॥९५॥ शिवलोको त्वमेतस्मिन् सह
स्रस्तंभमंडपे ॥ ईशानः सर्वविद्यानां राजते चंद्रशेखरः ॥९६॥ ललिताज्ञापालक
श्च ललिताज्ञाप्रवर्त्तकः ॥ ललितामंत्रजापी च नित्यमानंदमानसः ॥९७॥ शैव्या
इष्टा स्वभक्तानां ललितामंत्रसिध्धये ॥ अंतर्वहिः स्तमःपुंज निर्भेदनपरीयसीं
॥९८॥ महाप्रकाशरूपां तां मेधाशक्तिं प्रकाशयन् ॥ सर्वज्ञः सर्वकर्त्ता च सहस्र
स्तंभमंडपे ॥९९॥ वर्त्तमानो महादेवः श्रीदेवीमेव सेवते ॥ इत्थं कारण्यकल्पं

॥ ल ॥ स्त्राश्रीदेवीभक्तिनिर्भराः॥ ३० ॥ तत्तत्सालांतसमाश्रित्यवर्त्ततेकुंभसंभव ॥ इतिश्री
॥ १९२ ॥ ब्रह्मांडपुराणेउत्तरभागेललितोपाख्यानेअयतनखंडे हयग्रीवागस्त्यसंवादेरु
लो दि व का रेकंथनंनामअष्टाविंशोध्यायः॥ २८ ॥ श्रीहयग्रीवउवाच ॥ अथ
यापित्रयादीनांकक्ष्याभेदान्प्रचक्ष्महे ॥ एषांश्रवणमात्रेणजायतेश्रीमहोदय ॥ १ ॥
सहस्रस्तंभसालस्यांतरेमारुतयोजने ॥ मनोमयमहासालः सर्वरत्नविनिर्मितः॥ २ ॥ पूर्व
वद्गोपुरद्वारकपाटार्गलसंवृतः॥ तन्मध्यकक्ष्याभागस्तुसर्वोप्यमृतवापिकाः॥ ३ ॥
यत्पीत्वायोगिनः सिद्धावज्रकायामहाबलाः॥ भवंतिपुरुषाः प्राज्ञस्तातथैव ॥ श्री ॥
हिरसायनं ४ ॥ ॥ ॥ ॥ ॥ ॥ १९२ ॥

ललितासेवनोत्सुकः॥ ७६ ॥ तत्रवैष्णवलोकेतुविष्णुस्साक्षात्सनातनः॥ चतुर्थीदश
धाश्चैवतथाद्वादशधापुनः॥ ७७ ॥ विभिन्नमूर्त्तिसततंवर्त्ततेमाधवस्सदा ॥ भंडासु
रमहायुद्धेयेश्रीदेवीनखोद्भवाः॥ ७८ ॥ दशावतारदेवास्तेतेपिमाणिक्यमंडपे
पूर्वकक्षांतरेभ्यस्त—तस्यायाविशिष्टता ॥ ७९ ॥ उपर्यश्वादनायात्रंमाणिक्याद्रि
षतांगणेः॥ तत्रकक्षांतरेदेवः शंखचक्रगदाधरः॥ ८० ॥ भिन्नोद्वादशमूर्तिश्चपूर्वा
व्यासारक्षती ॥ जांबुनदप्रभश्चक्रीपूर्वस्यांदिशिकेशवः॥ ८१ ॥ पश्चान्नारायण
शंखीनीलजीमूतसन्निभः ॥ इंदीवरदलश्यामंस्तदर्धंमाधवोवती ॥ ८२ ॥ गोवि
दोदक्षिणेपार्श्वेधन्विचंद्रप्रभोमहान् ॥ उत्तरेहलभृद्विष्णुः पद्मकिंजल्कसंन्नि
भः॥ ८३ ॥ आग्नेयामरविंदाभोमूसलिमधुसूदनः॥ त्रिविक्रमः खड्गपाणिःनैऋ

॥ल॥ श्वरी ॥ तस्यास्तत्रोत्पलश्यामास्ताराया: परिचारिका: ॥१३॥ रत्ननौकासहस्रे
॥१९३॥ ण खेलंती सरसीजले ॥ अपरं पारमायांति पुनर्यांति परं तटं ॥१४॥ वीणावेणुमृदं
गादिन्वादयंतो मुहुर्मुहु: ॥ कोटिशस्तत्र ताराया: नाविक्यो नवयौवना: ॥१५॥ मुहुर्गा
यंति नृत्यंति वाहयंती मुहुस्तरी: ॥ अरित्रपाणय: काश्चित्काश्चिच्छुंगांबुपाणय: ॥१६॥
पिबंत्यस्तत्क्षुधातोयं संचरत्यस्तरौ शतै: ॥ तासां नौकावाहिकानां शक्तीनां शामल
त्विषां ॥१७॥ प्रथानभूता तारांबा जल्पाय- मनक्षमा ॥ आज्ञाविनायनस्ता रामंत्रि
णी दंडनाथयो: ॥१८॥ त्रिनेत्रस्यापि नोदत्ते वापिकां भसि सन्तरीं ॥ गायंती नौचलं ॥श्री॥
तीनां नौकाभिमणि सानुभि: ॥१९॥ महाराज्ञी महौदर्यैः वदंतीनां पदे पदे ॥ पिबंती ॥१९३॥
नाम धुस्फीतं माणिक्यचषकोदरे: ॥२०॥ प्रतिनौका मणिगृहे वसंती नाम नोहरे ॥

तारा तरणि शक्तीनां समवायोति सुंदर: ॥२१॥ काश्चिन्नौका: स्फुरणाभा काचिद्गल
स्फुतामुने ॥ मकराकारमापन्ना: काश्चिन्नौका मृगानना: ॥२२॥ काश्चित्सिंहाननाना
व: काश्चिद्दंताबलानना: ॥ इत्थं विचित्ररूपाभिर्नौकाभि: परिवेष्टिता ॥२३॥ तारां
बामहतीं नौकां अधिरूढा विराजते ॥ आत्मानुरूपवेषण्लललिमंत्रजापिना ॥२४॥
सार्धं प्रियतमेनैव रत्नमालामुपेयुषी ॥ अनुलोमविलोमेन संचारं वापिकाजले
॥२५॥ तन्वाना सततं तारा कश्यामेनांहि रक्षति ॥ मन:सालस्यांतराले सप्तयोज
नहूरत: ॥२६॥ बुधिसाल इति ख्यात: चतुर्योजनमुच्छ्रित: ॥ तन्मध्या कक्ष्याभाग
स्तु सर्वोप्यानंदवापिका ॥२७॥ तत्र दिव्यं महामत्स्यं बकुलामोदमेदुरं ॥ प्रतनक
नश्चायं तज्जलत्वेन वर्त्तते ॥२८॥ आनंदवापिकागाधपूर्ववत्सरिकीर्चितं ॥ सोपा

॥ ल ॥ नादिक्रमश्चैव पक्षिणस्तत्र पूर्ववत् ॥ २९ ॥ तत्रस्थं सलिलं मध्यं पायं पायं तटस्थि
॥ १९४ ॥ ताः ॥ विहरंति मदोन्मत्ताः शक्तयो मदपाटलाः ॥ ३० ॥ साक्षाच्च वारुणी देवी तत्र
नौकाधिनायका ॥ यां स्रुधामालिनीमाहुर्यमाकुरमृतेश्वरीं ॥ ३१ ॥ सा तत्र मणिनौ
कास्था शक्तिसेनासमावृता ॥ ईषदालोकमात्रेण त्रैलोक्यमददायिनी ॥ ३२ ॥ तरु
णादित्यसंकाशा मदरक्तकपोलभूः ॥ पारिजातप्रसूनेन परिवीतकचोच्चया ॥ ३३
॥ वहंति मदिरापूर्णं चषकं लोलदुत्पलं ॥ पक्वपिशितखंडं च मणिपात्रे तथान्य
के ॥ ३४ ॥ नायकेनानुकूलेन साकं श्रीमंत्रजापिना ॥ वारुणीतरणीश्रेणीनायि ॥ श्री ॥
का तत्र राजते ॥ ३५ ॥ सा प्याज्ञयैव सर्वेषां मंत्रिणीदंडनाथयोः ॥ ददाति वापि ॥ १९४ ॥
तरणं भिन्नेनस्यापि नान्यथा ॥ ३६ ॥ अथ बुद्धिमहासालोत्तरे मारुतयोजने ॥

तस्याममृतवापींतु वर्तते तोयदागतं ॥ तद्गंधाघ्राणमात्रेण सिद्धिकांतापतिर्भवेत्
५ ॥ अस्य शब्दमपि विंध्यारे पुरुषक्षीणकल्मषः ॥ उभयोः सालयोः पार्श्वे स्रुधावापित
टद्वयं ॥ ६ ॥ अर्धक्रोशखमायाममन्यत्सर्वं च वारिका ॥ चतुर्योजनदूरा तु तत्रांतरख
जलांतिके ॥ ७ ॥ सोपानवलयास्तस्यां नानारत्नविचित्रिताः ॥ स्वर्णवर्णा रत्नवर्णा
तस्यां हंसाश्च सारसाः ॥ ८ ॥ आस्फाल्यते तटहृद्धस्तरंगैरतिचंचलैः ॥ पक्षिणस्तज्ज
लं पीत्वा रसायनमयं नवं ॥ ९ ॥ अजरामरणं प्राप्तास्तत्र विध्यनिषूदन ॥ सदाकू
जितलक्ष्येयतत्र कारंडकद्विजाः ॥ १० ॥ जपंति ललितादेव्या मंत्रमेव महत्तरं ॥ परितो
वापिकं चक्रपरिवेषेण भूयसा ॥ ११ ॥ न तत्र गंतुं मार्गोस्ति नौकावाहनमंतरा ॥
आज्ञाया केवलं तत्र मंत्रिणीदंडनाथयोः ॥ १२ ॥ नारानामहाशक्तिर्वर्ततेतरणी

॥ल॥ शं तेजस्ताद्दक्रमप्रबोधय॥४५॥ तन्मध्यकक्ष्यवसुधारवचिनाकुरुविंदकैः॥ तत्र

॥३९५॥ बालातपोद्गारः सर्वदा वर्त्तते मुने॥४६॥ तस्य स्पर्शनमात्रेण स्फुरसिद्धतरा स्फुराः॥

सूर्यवश्च प्रकाशं ते तेजोरूपत्वमागताः॥४७॥ तत्र बालातपोद्गारे ललितापरमेश्व

रीं॥ प्रतितीव्रं तपस्तप्त्वा सूर्यो लब्धवतंतां द्युतिं॥४८॥ ग्रहराशिगणाः सर्वे नक्षत्रा

ण्यपि तारकाः॥ तत्रैव हि तपस्तप्त्वा लोकभास्करतां गताः॥४९॥ मार्तंडभैरवस्तत्र

भिन्नो द्वादशधा मुने॥ शक्तिभिस्तेजसीभिश्च कोटिसंख्याभिरन्वितः॥५०॥ महाप्रका

शरूपश्च मदारुणविलोचनः॥ कंकेलीतरुषंडेषु नित्यक्रीडारसोत्सुकः॥५१॥ वर्त्त ॥श्री॥

ते विंध्यदर्परिपारे बलमसे स्थितः॥ महाप्रकाशनामास्ति तस्य शक्तिर्महीयसी॥५२॥ ३९५॥

तक्ष्मात्यपराशक्तिछाया देव्यपराजिता॥ रथं तिस्रभिरन्याभिः शक्तिभिः परिवा

रितः॥५३॥ ललितायां महेशान्यां सदाविद्यां तु हृदा जपन्॥ तद्भक्तानामिंद्रियाणि भा

स्वराणि प्रकाशयन्॥५४॥ बहिरंतस्तमोजालं समूलमवमर्दयन्॥ तत्र बालातपोद्गारे

भाति मार्त्तंडभैरवः॥५५॥ सूर्यबिंबमहासालांतरे मारुतयोजने॥ चंद्रबिंबमयः सालः

चतुर्योजनमुच्छ्रितः॥५६॥ पूर्ववद्गोपुरद्वारकपाटार्गलसंयुतः॥ तन्मध्यभूः समस्ता

पि चंद्रिकोद्गारडाक्षितं॥५७॥ तत्रैव चंद्रिकोद्गारे तपस्तप्त्वा सुदारुणं॥ अत्रिनेत्र

समुत्पन्नश्चंद्रमाः कांतिमाययौ॥५८॥ तत्र श्रीसोमनाथाख्यो वर्त्तते निर्मलाकृतिः॥

देवत्रैलोक्यमितिरध्वंसि संसारवर्त्तकः॥५९॥ पिबन् चषकसंपूर्णां निर्मलं चंद्रिकामृ

तं॥ सप्तविंशतिनक्षत्रशक्तिभिः परिवारितः॥६०॥ सदा पूर्णो निजाकारो निष्कलंकनि

जाकृतिः॥ तत्रैव चंद्रिकोद्गारे वर्त्तते भगवान् शशी॥६१॥ ललिताया जपध्यानैस्तो

॥ल॥ द्रैः पूजाशतैरपि ॥ अश्विन्यादियुतस्तत्र कालक्षिपति चंद्रमाः ॥ ६३ ॥ अन्याश्च शक्त
॥१९६॥ यस्ताराना मधेयाः सहस्रशः ॥ संति तस्यैव निकटे सा कक्ष्या तत्प्रपूरिता ॥ ६४ ॥ अ
थ चंद्राख्यसालस्यांतरे मारुतयोजने ॥ शृंगारनाम सालोस्ति चतुर्योजनमुच्छ्रि
तः ॥ ६५ ॥ शृंगाररसरूपैस्तु कौस्तुभैरेव निर्मितः ॥ महाशृंगारपरिघा तन्मध्य
वसुधाखिला ॥ ६६ ॥ परिघावलये तत्र शृंगाररसपूरिते ॥ शृंगारशक्तयः संति
नानाभूषणभास्वराः ॥ ६७ ॥ तत्र नौकासहस्रेण संचरंतो मदोद्धताः ॥ उपा
सते सदा मत्ता नौकास्थाः कुंकुमायुधं ॥ ६८ ॥ स तु संमोहयत्येव विश्वसंमो ॥श्री॥
हकारिभिः ॥ विशिखैरखिलान्लोकानूललिताज्ञावशंवदः ॥ ६९ ॥ तत्प्रभावे ॥१९६॥
न संमूढा महापद्माटवीस्थली ॥ न गंतुं पारयत्येव स्मरसिद्धनराक्षसः ॥ ७० ॥

॥

अथाहंकारमहासालः पूर्ववद्गोपुरान्वितः ॥ ३७ ॥ तयोस्तु सालयोर्मध्ये कक्ष्याभूर
खिला मुने ॥ विमर्शवापिका नाम सुषुम्नामृतरूपिणी ॥ ३८ ॥ यन्महायोगिनामंतर्मनो
मारुतपूरिते ॥ सुषुम्नादंडविवरे जागर्ति परमामृते ॥ ३९ ॥ तदेव तस्याः सलिलं वा
पिकायास्तपोधन ॥ पूर्ववत्तटसोपानपक्षिनौकाभिदा स्मृता ॥ ४० ॥ तत्र नौकेश्वरी दे
वी कुरुकुल्लेति विश्रुता ॥ तमालश्यामयाकारा श्यामकंचुकधारिणी ॥ ४१ ॥ नौकेश्व
रीभिरन्याभिस्स्वसमानाभिरावृता ॥ कहरिद्रकरा नित्यमुल्लसन्मदमांसला ॥ ४२ ॥
प्रियंकरेण संयुक्ता प्रियेणाश्रक्तमोस्कक्ता ॥ परितो भ्राम्यति मुने मणिनौकाधि
रोहिणी ॥ ४३ ॥ वापिका——सोगाधः पूर्ववत्परिकीर्तितः ॥ अथाहंकारसालस्यां
तरे मारुतयोजने ॥ ४४ ॥ सूर्यबिंबमयः सालः चतुर्योजनमुच्छ्रितः ॥ सूर्यस्य याह

॥रु॥ जनसंमितं ॥ पद्माटवीस्थलं वक्ष्ये सावधानं मुने शृणु ॥ ८१ ॥ समस्तरत्नखचिते तत्र षड्
॥१९७॥ योजनांतरे ॥ परितः स्थलपद्मानि महाकांडानि संति वै ॥ ८२ ॥ कांडास्तु योजनायामा मृदु
भिः कंटकैर्वृताः ॥ पत्राणि तालदशकमात्रायामानि संति वै ॥ ८३ ॥ केशराश्च सरोजानां
पंचतालसमायताः ॥ किंजल्काश्च समुन्नम्राः कार्णिकाः परिकीर्तिताः ॥ ८४ ॥ अत्यंतको
मलान्यत्र सदा विकसितानि च ॥ नवसौरभहृद्यानि विशंकटदलानि च ॥ ८५ ॥ बहु
शः संति पद्मानि कोटिनामपि कोटिशः ॥ महापद्माटवीकक्ष्या पूर्वभागे घटोद्भव ॥ ८६ ॥
धूम्रार्चिप्रमुखा भांति कला दश विभावसोः ॥ कोशोन्नता वह्निरूपा वर्तुलाकारसंस्थि ॥श्री॥
ताः ॥ ८७ ॥ अर्धयोजनविस्तारः कलाभिर्दशभिर्युतः ॥ अर्घ्यपात्रमहाधारो वर्त्तते कुंभसं ॥१९७॥
भव ॥ ८८ ॥ तस्याधारस्य परितः शक्तयो दीप्तविग्रहाः ॥ धूम्रार्चिप्रमुखा भांति कला दश वि

भावसोः ॥ दीप्ततारुण्यलक्ष्मीका नानालंकारभूषिताः ॥ ८९ ॥ आधारपृष्ठे श्रीमंतं भग
वंतं हविर्भुजं ॥ परिव्रज्यैव परितो वर्त्तंते मन्मथालसाः ॥ ९० ॥ धूम्रार्चिरूष्मा ज्वलिनी ज्वा
लिनी विस्फुलिंगिका ॥ सुश्रीः स्वरूपा कपिला हव्यकव्यवहा अपि ॥ ९१ ॥ एता दश कलाः प्रो
क्ता वह्नेराधाररूपिणः ॥ तत्राधारे स्थितो देवः पात्ररूपं समाश्रितः ॥ ९२ ॥ सूर्यस्त्रिलोकति
मिरध्वंसी विप्रथितोदयः ॥ सूर्यात्मकं तु तत्पात्रं सार्धयोजनमुन्नतं ॥ ९३ ॥ योजनामा
त्रविस्तारं महाज्योतिःप्रकाशितं ॥ तस्याश्च परितः सक्ताः वपुषः पुत्रिका इव ॥ ९४ ॥ वर्त्तंते
द्वादश कला अतिभास्वररोचिकाः ॥ तपिनी तापिनी धूम्रा मरीची ज्वालिनी रुचिः ॥ ९५ ॥
सुषुम्ना भोगदा विश्वा बोधिनी धारिणी क्षमा ॥ तस्मिन्पात्रे महानंदकारणं परमामृतं ॥ ९६ ॥
सर्वौषधिरसाढ्यं च तद्घसौरभ्यसंयुतं ॥ नीलोत्पलैश्च कल्हारै रक्तानैरतिशोभनैः ॥ ९७ ॥

॥ ल ॥ यास्यमानं सदाह्लाद्यं शीतलं लघु निर्मलं ॥ चलद्वीचीशतोदारं ललिताभ्यर्चनोचितं
॥ १९८ ॥ ॥ ९८ ॥ सदा शब्दायमानेन भासनेशुध्धिकारणं ॥ तदर्घ्यममृतं प्रोक्तं निशाकरकला
मयं ॥ ९९ ॥ तस्मिन्न नीयसीं नौका मणिकुंभां समास्थिताः ॥ निशाकलकलाह्लाद्याः की
र्तीं नवयौवनाः ॥ १०० ॥ अमृता मानदा पूषा पुष्टिस्तुष्टिरतिर्धुतिः ॥ शशिनी चंद्रिका का
ति ज्योत्स्ना प्रीतिनदंगदा ॥ १०१ ॥ पूर्णा पूर्णामृता चेति कलाः पीयूषरोचिषः ॥ नव
यौवनसंपूर्णाः सदा प्रहसिताननाः ॥ २ ॥ सृष्टिर्ऋध्धिः स्मृतिर्मेधा कीर्तिर्लक्ष्मीर्द्यु
तिर्धृतिः ॥ जरा सिधिरिता प्रोक्ताः कीर्तुंति ब्रह्मणः कलाः ॥ ३ ॥ स्थितिर्विश्वपालिनी ॥ श्री ॥
शांतिरैश्वरी रतिः कामिके ॥ वरदा ह्लादिनी प्रीतिर्दीर्घा चेति हरेः कलाः ॥ ४ ॥ तीक्ष्णा ॥ १९८ ॥
रौद्री भया निद्रा तंद्री क्षुत्क्रोधिनी क्रिया ॥ उत्कारी मृत्युरित्येता रौद्रास्तत्र स्थिताः कलाः ॥ ५ ॥

ब्रह्मा विष्णु महेशास्तु श्रुध्धचिंतास्वभावतः ॥ तस्यास्तया परे यांति महापद्माटविस्थ
ले ॥ ७१ ॥ संसारिणश्चरागोधा बहु संकल्प कल्पनाः ॥ मोहाकुलाश्च पुरुषा विकल्पक्षो
भधूसराः ॥ ७२ ॥ प्रभूतरागा गहनाः प्रौढव्यामोहदायिनी ॥ महाश्रृंगारपरिखाधिकारी
वर्त्तते स्मरः ॥ ७३ ॥ तस्य तत्समतिक्रम्य महतामपि मोहने ॥ महापद्माटवीं गंतुं न को
पि भवति क्षमः ॥ ७४ ॥ अथ श्रृंगारसालस्यांतराले रसयोजने ॥ चिंतामणिगृहं नाम
चक्रराजमहालयं ॥ ७५ ॥ तन्मध्यभूः समस्तापि परितो रत्नभूषिता ॥ महापद्माटवी
नाम सर्वसौभाग्यदायिनी ॥ ७८ ॥ श्रृंगाराख्यमहासालपर्यंतगापुरं मुने ॥ चतुर्दि
क्ष्वप्येवमेव गोपुराणां व्यवस्थितिः ॥ ७९ ॥ सर्वदिक्षु तथोक्तानि गोपुराणि शतं मुने
सालास्तु विंशतिः प्रोक्ताः पंचसंख्याधिकाः शुभाः ॥ ८० ॥ सर्वेषामपि सालानां मूलयो

॥ल॥ नापरिचारक शक्तयः॥ अणिमादिकशक्तीनां अपर्यैतिम दोधताः॥ ३४॥ महाप
॥३११॥ झाटवीकस्या पूर्वभागेर्घ्येकल्पने॥ इत्थं समीरितं पश्चात तत्रान्यदपि कथ्यते॥ ३५॥
इति श्री ब्रह्मांडपुराणे उत्तरभागे ललितोपाख्याने हयग्रीवागस्त्यसंवादे महापद्मा
टव्यर्घ्यस्थापनकथनं नाम एकोनविंशोध्याय॥ २९॥ हयग्रीव उवाच॥ चिंतामणि
गृहस्याग्निदिग्भागे कुंडमानलं॥ योजनायामविस्तारं योजनामात्रखानकं॥ १॥
तत्रज्वलति चिद्वह्निः स्रुधाधाराशतान्वितः॥ परमैश्वर्यजनकः पावनो ललिताज
या॥ २॥ अनिंधनो महाज्वालः स्रुधया तर्पिताकृतिः॥ कंकेलिपल्लवछायस्तत्रज्व ॥श्री॥
लति चिच्छिखी॥ ३॥ तत्र होत्री महादेवी होता कामेश्वरः परः॥ उभौ तौ नित्यहोतारौ ॥३११॥
रक्षितः सकलं जगत॥ ४॥ अत्युत्तरपराधीना ललिसेनौ प्रवर्त्तिता॥ ललिताचोदितः

कामाशंकरोपि प्रवर्त्तितः॥ ५॥ चिंतामणिगृहेंद्रस्य रक्षोभागे बुजारवौ॥ चक्रराजरथ
श्रेष्ठस्तिष्ठत्युन्नतविग्रहः॥ ६॥ नवभिः पर्वभिर्युक्तः सर्वरत्नमयाकृतिः॥ चतु
र्योजनविस्तारो दशयोजनमुन्नतः॥ ७॥ तथोत्तरंङ्गासयुक्तः स्थूलतः कूबरोज्वलः॥
चतुर्वेदमहाचक्रः पुरुषार्थमहाहयः॥ ८॥ तत्त्वरूपध्वजश्रेण्या चामरैरपि मंडितः॥
पूर्वोक्तलक्षणैर्युक्तः मुक्ताछत्रेण शोभितः॥ ९॥ भंडासुरमहायुद्धे कृतसाहसिक
क्रियः॥ वर्त्तते रथमूर्धन्यः श्रीदेव्यासनपावितः॥ १०॥ चिंतामणिगृहेंद्रस्य वायुभा
गे बुजारवौ॥ गेयचक्ररथेंद्रस्तु मंत्रिण्या प्रतिष्ठति॥ ११॥ चिंतामणिगृहेंद्रस्य रुद्र
भागे बुजारवौ॥ वर्त्तते दंडनाथायाः किरिचक्रमहारथः॥ १२॥ एतद्रथत्रयं सर्वेषु
श्रीपुरपंक्तिषु॥ समानमेव विज्ञेयमेतस्या देवताय था॥ १३॥ आनंदकुंडमाजेय

॥ल॥ यत्तिष्ठति समुज्ज्वलन् ॥ १३ ॥ तत्पश्चिमे तु गायत्री तत्पश्चादभयंकरः ॥ घृणिः सूर्य
॥२०७॥ स्तत्पश्चाद्दोंकारस्य च मंदिरं ॥ १४ ॥ देवी तुरीयगायत्री चक्षुष्मत्यपि तापस ॥ अ
थ गंधर्वराजश्च परिषत्कुद्र एव च ॥ १५ ॥ तारांबिका भगवती तत्पश्चाद्भागतः स्थि
ता ॥ चिंतामणिगृहे ह्यस्य रक्षोभागे समाश्रिता ॥ १६ ॥ नाममंत्रय महामंत्रवाच्यो
क्ति भगवान् हरिः ॥ महागणपतिस्तस्योत्तरे कृतनिकेतनः ॥ १७ ॥ पंचाक्षरीमंत्र
वाच्यैस्तस्य चाप्युत्तरे शिवः ॥ अथ मृत्युंजये शश्च वाच्यत्र्यक्षमंत्रतः ॥ १८ ॥ धा
रणाख्या सरस्वत्यप्यस्य चोत्तरवासिनी ॥ अकारादिक्षकारांत वर्णमूर्तेस्तु मं ॥श्री॥
दिरं ॥ १९ ॥ मातृकाया उत्तरस्यां तस्या विंध्यनिषूदन ॥ तदुत्तरे संपदीशी काल ॥२००॥
संकर्षणी तथा ॥ २० ॥ श्रीमहाशंभुनाथश्च देव्याविर्भावकारणं ॥ श्रीपरांबा च विशद

ईश्वरस्य कलाः पीताः श्वेता चैवारुणासिता ॥ चतस्र एव प्रोक्तास्तु सदाशिवकल
अथ ॥ ६ ॥ निवृत्तिश्च प्रतिष्ठा च विद्याशांतिस्तथैव च ॥ इंधिरा दीपिका चैव रेचिका
चैव मोचिका ॥ ७ ॥ परा सूक्ष्मा च विध्यारे तथा सूक्ष्मामृता कला ॥ ज्ञानामृता व्यापिनी च
व्यापिनी व्योमरूपका ॥ ८ ॥ एताः षोडश संप्रोक्ताः स्तत्र क्रीडंति शक्तयः ॥ क्षुद्रनौका
समारूढा नतश्चेतश्च चंचला ॥ ९ ॥ शक्तिरूपेण खेलंती तत्र विद्याः सहस्रशः ॥ अ
र्घ्यसंशोधनार्थाय कल्पिताः परमेष्ठिना ॥ १० ॥ तदर्घ्यममृतं पीत्वा सदामाद्यंति शक्त
यः ॥ महापद्माटवी सोवां महाचक्रस्थिता अपि ॥ ११ ॥ मुहुर्मुहुः पीयमानमुपर्युप
रि वर्धते ॥ मुहुर्मुहुर्नवनवं मुहुश्चावध्यसौ ह्रदं ॥ १२ ॥ सत्त्वकुंभसहस्रैश्च स्व
र्ण घटकोटिभिः ॥ आपूर्यापूर्य सततं तदर्घ्यममृतं महत् ॥ १३ ॥ चिंतामणिगृहस्था

॥ल॥ इत्थं श्रीरश्मिमालायां मणिकॢप्ता महाग्रहाः॥ उच्चध्वजोच्चशालाश्च सोपानाश्च त
॥२०३॥ पोधन॥ ३०॥ चिंतामणिगृहेंद्रस्य पूर्वद्वारस्य सिंधुप॥ दक्षिणे पार्श्वभागे तु मंत्रिनाथा
गृहं महत्॥ ३१॥ वामभागे दंडनाथाभवनं रत्ननिर्मितं॥ ब्रह्मविष्णुमहेशानाम
र्घ्यस्थानस्य पूर्वतः॥ ३२॥ भवनं दीपिताशेषदिग्चक्रं रत्नरश्मिभिः॥ समस्ता देवता
एता ललिताभक्तिनिर्भराः॥ ३३॥ ललितामंत्रजाप्यश्च श्रीदेवीं समुपासते॥ पूर्वो
क्तमर्घ्यस्थानं च पूर्वोक्तं चार्घ्यकल्पनं॥ ३४॥ याम्यद्वारप्रभृतिषु सर्वेष्वपि समं स्मृतं
अथ चिंतामणिगृहं वक्ष्ये शृणु महामुने॥ ३५॥ श्रीपट्टणस्य मध्यस्थं योजनद्वयवि ॥श्री॥
स्तृतं॥ तस्य चिंतामणिमयी भित्तिः क्रोशकविस्तृता॥ ३६॥ चिंतामणिशिलाभिश्च ॥२०३॥
छादिनीभिस्तथोपरि॥ संवृता कूटरूपेण तत्रस्थापी समुन्नता॥ ३७॥ गृहभित्ति

रस्तथोन्नत्या चतुर्योजनदूरतः॥ विशंतिर्योजनस्तत्र चोन्नत्या स्थूपिरुच्यते ३७
यथोर्ध्वे ह्रासंयुक्ता स्थलीत्रिमकुरोज्वला॥ तानि चेच्छाक्रियाज्ञानरूपाणि मुकुरा
न्वृषे॥ ३८॥ सदा देदीप्यमानानि चिंतामणिमयान्यपि॥ चिंतामणिगृहे सर्वं चिंताम
यं स्मृतं॥ ३९॥ तस्य द्वाराणि चत्वारि क्रोशार्धायामभांजि च॥ क्रोशार्धार्धं च विस्तारो
द्वाराणां कथितो मुने॥ ४०॥ द्वारेषु सर्वेष्वपि च चिंतामणिगृहांतरे॥ पिंडिता ललिदेव्या
मूर्तिर्लौहित्यसिंधवः॥ ४१॥ तरुणार्कसहस्राभा चंद्रवल्लीतला अपि॥ मुहुःप्रवाह
रूपेण प्रसतिरे महामुने॥ ४२॥ पूर्वाम्नायमयं चैव पूर्वद्वारं प्रकीर्तितं॥ दक्षिणद्वार
देशस्तु दक्षिणाम्नायलक्षणः॥ ४४॥ पश्चिमद्वारदेशस्तु पश्चिमाम्नायलक्षणः॥ उत्त
रद्वारदेशस्या उत्तराम्नायलक्षणः॥ ४५॥ गृहराजस्यांतराले भित्तौ खचितदंडका॥

॥ रत्न ॥ रत्नप्रदीपाभास्वंतः कोट्यर्कसदृशत्विषः ॥ परितस्तस्य वर्त्तंते भासयंतो गृहांतरं
॥२०२॥ ४६ चिंतामणिगृहस्यास्य मध्यस्थाने महीयसी ॥ अत्युच्चवेदिकाभागे बिंदुचक्रं
महत्तरं ॥ ४७ ॥ चिंतारत्नगृहोत्तुंगभित्तेर्विदेश्च मध्यभूः ॥ भित्तिकोशं परित्यज्य क्रो
शतत्रयमुदाहृतं ॥ ४८ ॥ तत्र क्रोशत्रयीस्थानमणिमाद्यात्मरोचिषां ॥ क्रोशत्रयं स
मस्तं तथ्यस्त संख्याप्रकारतः ॥ ४९ ॥ चतुर्विंशतिसाहस्रं हस्तैः संमितमुच्यते ॥ बिं
दुपीठेश्वशपर्यंतं चतुर्दशविभेदतः ॥ ५० ॥ अंतरे भेदिते जाते हस्तसंख्यामयो
च्युते ॥ पद्माटवीस्थला चिंतामणिवेश्मांतरं मुने ॥ ५१ ॥ हस्तविंशतिरुन्नम्रेतस्य ॥श्री॥
स्यु रणिमादयः ॥ अणिमांतरविस्तारश्चतुर्नल्वसमन्वितः ॥ ५२ ॥ किष्कुः श्चतुशती ॥२०२॥
नल्वः किष्कुर्हस्त उदीर्यते ॥ तत्रांतरे णिमाद्यास्तु पूर्वादिकृतमंदिराः ॥ ५३ ॥

ज्योत्स्नानिर्मलविग्रहा ॥ २१ ॥ उत्तरोत्तरमेतास्तु देवताः कृतमंदिराः ॥ बालाचैवान्न
पूर्णा च हयारूढा तथैव च ॥ २२ ॥ श्रीपादुका चतस्रस्तु उत्तरोत्तरमंदिराः ॥ चिंताम
णिगृहेंद्रस्य पश्चिमद्वारभागतः ॥ २३ ॥ उत्तरोत्तरवासिन्यो देवता अपरा मुने ॥ लघुश्या
मा च वाग्वादिनी नित्या श्रीनकुलांबिका ॥ २४ ॥ शामला चैव तस्रस्ता वायव्यां तु समाश्रि
ताः ॥ चिंतामणिगृहेंद्रस्य वायव्य वक्र धाष्टिकः ॥ २५ ॥ महापद्माटवीत्वन्या देवताः कृ
तमंदिराः ॥ उन्मत्तभैरवी चैव स्वप्नवाराहिका परा ॥ २६ ॥ तिरस्करिणिका वा च तथा
न्या पंचमी परा ॥ यथापूर्वं कृतग्राहा एता देव्यो महोदयाः ॥ २७ ॥ श्रीमूर्तिश्च महादे
वी श्रीमहापादुकापि च ॥ यथापूर्वं कृतगृहे एतेह्न देवतोत्तमे ॥ २८ ॥ शंकरेण षड
न्वाय सागरे प्रतिपादिताः ॥ या विद्यास्ताः समस्ताश्च महापद्माटवीस्थले ॥ २९ ॥

॥ ल ॥ माहेश्वरी चैव कौमारी वैष्णवी तथा ॥ ६१ ॥ वाराही चैव माहेंद्री चामुंडा त्वथ सप्तमी म
॥ २०३ ॥ हालक्ष्मी रष्टमी तु नं चैता कृतमंदिराः ॥ ६२ ॥ नानाविधायुधान्याश्च नानाशक्तिपरिवृ
ताः ॥ पूर्वादिदिशमारभ्य प्रादक्षिण्यकृतालयाः ॥ ६३ ॥ अथ प्राम्याद्यंतरस्यापरिखा
त्कुंभसंभव ॥ हस्तविंशतिमुन्नम्रं चतुर्नल्वप्रविस्तरं ॥ ६४ ॥ मुद्रांतरमितिख्ये धंत
त्र मुद्रा कृतालयाः ॥ संक्षोभद्राविणीकर्षवश्योन्मादमहांकुशाः ॥ ६५ ॥ खेचरी बीज
योन्याख्याश्च त्रिखंडा दशमा पुनः ॥ पूर्वादिदिशमारभ्य मुद्रा एताः प्रतिष्ठिताः ॥ ६६ ॥
अत्यंतसुंदराकारा नवयौवनविह्वलाः ॥ कांतिभिः कमनीयाभिः पूरयंतो गृहांतरं ॥ ॥ श्री ॥
६७ ॥ सेवंते मुनिशार्दूल ललितां परमेश्वरीं ॥ अंतरत्रयमेतत्तु चक्रं त्रैलोक्यमोहनं ॥ २०३ ॥
६८ ॥ एतस्मिन् शक्तयोपास्तु उक्ताः प्रकटाभिधाः ॥ एतासां समधिष्ठात्री त्रिपुरा च

क्रनायिका ॥ ६९ ॥ तच्चक्रपालनकरी मुद्रा संक्षोभणात्मिका ॥ अथ मुद्रांतरस्योर्ध्वं प्रो
क्तं नित्याकलांतरं ॥ ७० ॥ हस्तविंशतिमुन्नम्रं चतुर्नल्वप्रविस्तरं ॥ पूर्ववच्चैव सोपान
मुत्तरोत्तरमिष्यते ॥ ७१ ॥ नित्याकलांतरे तस्मिन् कामाकर्षणिकामुखाः ॥ परितः कृ
तसंस्थानाः षोडशेंदुकलात्मकाः ॥ ७२ ॥ तर्पयंत्यो दिशां चक्रं सुधास्यंदैः सुशीतलैः ॥
तासान्नामानि मत्तस्त्वमवधारय कुंभज ॥ ७३ ॥ कामाकर्षणिका नित्या बुध्याकर्षणिका
वका ॥ ७४ ॥ चित्ताकर्षणिका नित्या धैर्याकर्षणिका कला ॥ स्मृत्याकर्षणिका नित्या
नामाकर्षणिका कला ॥ ७५ ॥ एता चक्रे पालिकास्तु मुद्रा द्रावणिकाभिधा ॥ नित्याक
लांतरादूर्ध्वं धिष्ण्यमस्त्यंतरसुंदरं ॥ ७६ ॥ हस्तविंशतिमुन्नम्रं चतुर्नल्वं प्रविस्तरं ॥
प्राग्वत्सोपानसंयुक्तं सर्वसंक्षोभणाभिदं ॥ ७७ ॥ तत्राष्टौ शक्तयस्तीव्रा मदारुणवि

॥ ल ॥ लोचनाः॥ नवतारुण्यमत्ताश्च सेवंते परमेश्वरीं॥ ७७॥ कुसुमा मेखला चैव मदना
॥२०४॥ मदनातुरा॥ रेखा वेगिन्यं कुशा च मालिन्य हौ च शक्तय॥ ७८॥ कोटीशस्त्त परीवा
राः शक्तयो नंगपूर्विकाः॥ सर्वसंक्षोभणमिदं चक्रं तदधिदेवता॥ ७९॥ सुंदरी नाम वि
ज्ञेया नाम्नागुप्ततराश्च ताः॥ तच्चक्रपालनकरी सुद्राकर्षिणिका स्मृता॥ ८०॥ अनंग
शक्त्यंतरस्योपरिष्टात्कुंभसंभसंभव॥ हस्तविंशतिमुन्नम्रं चतुर्नल्वप्रविस्तरं॥ ८१
संक्षोभिण्याद्यंतरस्यात्सर्वसौभाग्यदायकं॥ सर्वसंक्षोभिणी शक्तिः सर्वविद्राविणीत
था॥ ८२॥ सर्वाकर्षणिका शक्तिः सर्वाल्हादिनिका तथा॥ सर्वसंमोहिनीशक्तिः सर्व ॥श्री॥
स्तंभनशक्तिका॥ ८३॥ सर्वजंभिनिशक्तिश्च सर्वोन्मादिनिशक्तिका॥ सर्वार्थसाधकी ॥२०४॥
शक्तिः सर्वसंपत्तिपूरिणी॥ ८४॥ सर्वमंत्रमयी शक्तिः सर्वद्वंद्वक्षयंकरी॥

अणिमा महिमा चैव गरिमा लघिमा तथा॥ ईशित्वा च वशित्वा च प्राकाम्या भुक्तिरेव च
॥ ९४॥ इच्छा प्राप्तिः सर्वकामेत्येता सिध्धय उत्तमाः॥ रससिध्धिर्मोक्षसिध्धिर्बलसिध्धि
स्तथैव च॥ ९५॥ खड्गसिध्धिः पादुकाया सिध्धिरंजनसिध्धिका॥ वाक्सिध्धिर्लोकसि
ध्धिश्च देहसिध्धिरनंतरं॥ ९६॥ एता ह्यष्टयासिध्धयस्तु बल्ध्योन्यायोगिसंमताः॥ तत्रांत
रेतु परितः सेवंते परमेश्वरीं॥ ९७॥ कोटिशः सिध्धयस्तस्मिन् अणिमाद्यंतरे शुभे॥ न
वलावण्यसंपूर्णाः स्मयमानमुखांबुजाः॥ ९८॥ ज्वलच्चिंतामणिकराः सदा षोडश
वार्षिकाः॥ अत्युदारप्रकृतयः खेलंति मदविह्वलाः॥ ९९॥ तस्याणिमाद्यंतरस्योप
रिष्टात्सुमनोहरं॥ हस्तविंशतिरुन्नम्रं चतुर्नल्वप्रविस्तरं॥ चतुर्दिक्षु च सोपानपं
क्तिभिः सुमनोहरं॥ १००॥ ब्राह्म्याद्यंतरधिष्ण्यं स्यात्तत्र देवीस्थिताश्च शृणु॥ ब्राह्मीमा

॥ ल ॥ शक्तिश्च सर्वैश्वर्यप्रदायिनी ॥ १३ ॥ सर्वज्ञानमयी देवी सर्वव्याधिविनाशिनी ॥ स
॥ २०५ ॥ र्वाधारस्वरूपा च सर्वपापहरा तथा ॥ १४ ॥ सर्वानंदमयी देवी सर्वरक्षास्वरूपिणी
सर्वेप्सितप्रदा चैव निर्गर्भा योगिनीश्वरा: ॥ १५ ॥ मालिनी चक्रिणी प्रोक्ता मुद्रा सर्वम
हांकुशा ॥ इति चिंतामणिगृहे सर्वज्ञाद्यंतरावधा ॥ १६ ॥ चक्राणि कानि चित्प्रोक्ता
न्यन्यान्यपि मुने शृणु ॥ १७ ॥ इति श्रीब्रह्मांडपुराणे उत्तरभागे ललितोपाख्याने ह
यग्रीवागस्त्यसंवादे चिंतामणिगृ त कतनं नाम त्रिंशोध्याय: ॥ ३० ॥ हयग्रीव उ
वाच ॥ सर्वज्ञाद्यंतरालस्योपरिष्टात्कलशोद्भव ॥ हस्तविंशतिमुन्नम्रं चतुनल्वप्र ॥ श्री ॥
विस्तरं ॥ १ ॥ वशिन्याद्यंतरं ज्ञेयं प्राग्वत्सोपानमंदिरं ॥ सर्वरोगहरं नाम्ना तच्चक्र ॥ २०५ ॥
मिति विश्रुतं ॥ २ ॥ वशिन्याद्यास्तत्र देव्या पूर्वादिदिगनुक्रमात् ॥ स्वरैस्तु सहिता तत्र
प्रथमा वशिनीश्वरी ॥ ३ ॥ कवर्गसहिता पश्चात्कामेश्वर्याख्यवाङ्मयी ॥ चवर्गजुष्टा
वागीशी मोदिन्याख्या तृतीयका ॥ ४ ॥ टवर्गमंडिता कारा विमलाख्या सरस्वती
तवर्गेण ततो या ना पंचमी वागथारुणा ॥ ५ ॥ पवर्गेण परिस्फीता षष्ठी तु जयिनी म
ता ॥ यादिवर्णचतुष्केण सर्वैश्वर्याख्यवाङ्मयी ॥ शशादिकाक्षरषट्केन कौलि
नी लक्ष्मी मता ॥ एता देव्यो जपारक्तामुक्ताभरणमंडिता: ॥ ७ ॥ सदास्फुरद्धय
द्यलहरीललितानना: ॥ काव्यैश्च नाटकैश्चैव मधुरै: कर्णहारिभि: ॥ ८ ॥ विनो
दयंत्य: श्रीदेवीं वर्तंते कुंभसंभव ॥ एता रहस्यनाम्नैव ख्याता वातापितापन ॥ ९ ॥
नायिका त्वस्य चक्रस्य सिद्धा नाम्नी प्रकीर्तिता ॥ अस्य चक्रसंरक्षाकारिणी खे
चरी मता ॥ १० ॥ वशिन्याद्यंतरालस्योपरिष्टाद्विंध्यमर्दन ॥ हस्तविंशतिमुन्नम्रं

॥ल॥ चतुर्नल्वप्रविस्तरं॥ अस्त्रचक्रमिति ज्ञेयं तत्र वादिदेवताः॥ ३१॥ पंचकामेश्वरीबा
॥२०६॥ णाः पंचकामेश्वरास्तु गाः॥ अंकुशद्वितयं दीसंमादिस्त्रीपुंसयोर्द्वयोः॥ ३२॥ धनुर्द्व
यं च विंध्यारेन वपुंद्वंद्वेषु कल्पितं॥ पाशद्वयं दीताभं चत्वाय स्त्राणि कुंभज॥ ३३॥
कामेश्वर्यास्तु चत्वारि चत्वारश्रीमहेशनुः॥ ३४॥ आहत्याशयुधानीति प्रज्वद्दीप्ति
भाजि च॥ भंडासुरमहायुद्धे दुष्टदानवशोणिते॥ ३५॥ पीते रक्तीवत्तु सानि दिव्या
स्त्राण्यत्र जाग्रती॥ एतेषामायुधानां तु परिवारात्युधात्यलं॥ ३६॥ वर्त्तते स्त्रांतरेत
त्र तेषां संख्या तु को शिक्षः॥ वज्रं शक्तिः शतघ्नी च भृशुंडी मुसलं तथा॥ ३७॥ कणकः पट्ट ॥श्री॥
सं चैव मुद्गरं भिंडिपालकं॥ एवमादीव शस्त्राणि सहस्राणां सहस्रशः॥ ३८॥ अष्टा ॥२०६॥
युध महाशक्तिः सेवंते मदविह्वलाः॥ अथ शस्त्रांतरालस्योपरिवातापितापन॥ ३९॥

एताश्च संप्रदायाख्या चक्रिणीपुरवासिनी॥ ८५॥ मुद्रा च सर्ववश्याख्या तत्र कोर
क्षिका मता॥ कोटिशः शक्तयः स्तत्र तासां किं कर्षडुध्यता॥ ८६॥ संक्षोभिण्याद्यंतर
स्योपरिष्टात्कुंभसंभव॥ हस्तविंशतिमुन्नम्रं चतुर्नल्वप्रविस्तरं॥ ८७॥ सर्वसिद्ध्या
दिकानां तु मंदिरं धिष्ण्यमुच्यते॥ सर्वसिद्धिप्रदा चैव सर्वसंपत्प्रदा तथा॥ ८८॥
सर्वप्रियंकरी देवी सर्वमंगलकारिणी॥ सर्वकामप्रदा देवी सर्वसौभाग्यदायिनी॥ ८९॥
एता देव्यः कुलोत्तीर्णा योगिन्यो नामतः स्मृताः॥ चक्रिणी श्रीश्च विज्ञेया चक्रं सर्वा
र्थसाधकं॥ ९०॥ सर्वोन्मादनमुद्राख्या चक्रस्य परिपालिका॥ सर्वसिद्ध्याद्यंतरस्यो
परिष्टात्कुंभसंभव॥ ९१॥ हस्तविंशतिमुन्नम्रं चतुर्नल्वप्रविस्तरं॥ सर्वज्ञाद्यंतरं ना
म्ना सर्वरक्षाकरं स्मृतं॥ ९२॥ चक्रं महत्तत्र देव्यः सर्वज्ञाः प्रकीर्तिताः॥ सर्वज्ञा सर्व

॥९॥ महादेव्या योगशास्त्रप्रवर्त्तकाः ॥ सर्वे श्रीषां मंत्रगुरवः सर्वविद्यामहार्णवाः २८ चत्वा
॥२०७॥ रो युगनाथास्तु लोकानामभिगुप्तये ॥ सृष्टाः कामेशदेवेन तेषां नामानि मच्छृणु २९
मित्रेशोड्डीशषष्ठीशश्चर्याख्याः कुंभसंभव ॥ तैः सृष्टा बहवो लोकरक्षार्थं पादुकात्मकाः
३० दिव्यौघा मानवौघाश्च सिद्धौघाः स्फुरतापसाः ॥ प्राप्तसालोक्यसारूप्यासायु
ज्यादिकसिद्धयः ३१ महांतो गुरवस्तास्तु सेवंते चतुरो गुरून् ॥ अथ नाथांतरालस्यो
परिष्टाधिष्ण्यमुत्तमं ३२ हस्तविंशतिमुन्नम्रं चतुर्नल्वप्रविस्तरं ॥ नित्यांतरमि
ति प्रोक्तं नित्याः पंचदशात्र वै ॥ ३३ ॥ अथ कामेश्वरी नित्या नित्या च भगमालिनी ॥ ॥श्री॥
नित्यक्लिन्नापि च तथा भेरुंडा वह्निवासिनी ॥ ३४ महावज्रेश्वरी दूती त्वरिता कु ॥२०७॥
लसुंदरी ॥ नित्या नीलपताका च विजया सर्वमंगला ॥ ३५ ज्वालामालिनी काचि

त्रे त्येताः पंचदशोदिताः ॥ कालत्रितयरूपाश्च कालग्रासविचक्षणाः ॥ ३६ ब्रह्मा
दीनमशेषाणां चिरकालमुपेयुषां ॥ तत्तत्कालशतायुष्यरूपा देव्या जयास्थिताः
३७ ॥ नित्योद्यता निरातंकाः श्रीपरागसमुद्भवाः ॥ सेवंते जगतां मध्ये ललितां स्वे
कवरूपिणीं ॥ ३८ ॥ तासां भवंतो मामा दीप्ताः पंचदशस्वराः ॥ विसृष्टिबिंदुचक्रे
तु षोडश्या भवनमंते ॥ ३९ ॥ अथ नित्यांतरालस्योपरिष्टात्कुंभसंभव ॥ अंगदेव्यंत
रं प्रोक्तं हस्तविंशतिमुन्नतं ॥ ४० ॥ चतुर्नल्वप्रविस्तारं प्राग्वत्सोपानमंदिरं ॥ तस्मि
न्हृदयदेव्याद्याः शक्तयः संति वै मुने ॥ ४१ ॥ हृद्देवी च शिरोदेवी शिखादेवी तथैव च
वर्मदेवी दृष्टिदेवी शस्त्रदेवी षडीरिताः ॥ ४२ ॥ परितो बिंदुपीठं च भ्राम्यंतो दीप्त
मूर्तयः ललिताप्रवर्त्तिन्यो वर्त्तंते वशिनो वर ॥ ४३ ॥ अथांगदेव्यंतरस्योपरि

॥ल॥ ह्यात्मगत्वा कृतिः॥ बिंदुपीठमिदं ज्ञेयं श्रीपीठमपि पुष्यते॥ ४४॥ महापीठमिति ज्ञे
॥२०८॥ यं विद्यापीठमथोच्यते॥ आनंदपीठमपि च पंचाशत्सारूपधृक्॥ ४५॥ तत्र श्री
ललितादेव्याः पंचब्रह्ममयं महत्॥ जागर्ति मंचरत्नं तु प्रपंचत्रयमूलकं॥ ४६॥
तस्य पंचस्य पादास्तु चत्वारः परिकीर्तिताः॥ दशहस्तसमुन्नम्रा हस्तत्रितयवेष्टनाः
४७॥ ब्रह्मविष्णुमहेशानेश्वररूपत्वमागताः॥ शक्तिभावमनुप्राप्ता सदाशिवाध्या
नयोगतः॥ ४८॥ एकस्तु मंचपादस्याज्जपाकुसुमसन्निभः॥ ब्रह्मात्मकः स विज्ञे
यो वह्निदिग्भागमाश्रितः॥ ४९॥ द्वितीयो मंचपादस्तु महानीलोत्पलप्रभः॥ ॥श्री॥
विष्ण्वात्मकः स विज्ञेयो रक्षोदिग्भागमाश्रितः॥ ५०॥ तृतीयो पंचपादस्तु शुद्धस्फ ॥२०७॥
टिकनिर्मलः रुद्रात्मकः स विज्ञेयो वायुदिग्भागमाश्रितः॥ ५१॥ चतुर्थो पंचपादस्तु

हस्तविंशतिमुन्नम्रं चतुर्नल्वप्रविस्तरं॥ धिष्ण्यं तु समयेशीनां स्थानं चेतसृणाम
पि॥ २०॥ कामेशाद्यास्तत्र देव्यस्तिस्रोन्यास्तु चतुर्थिका॥ सेवंति शेषविश्वानां सावि
त्री ललितेश्वरी॥ २१॥ तिसृणां शृणु नामानि कामेशी प्रथमं मता॥ वज्रेशी भगमाला च
ताः सेवंते सहस्रशः॥ २२॥ सर्वेषां दर्शनानां च या देव्यो विविधाः स्मृताः॥ ताः सर्वास्तत्र
सेवंते कामेशादीर्महोदयाः॥ २३॥ एतासां च प्रसंगेषु नित्यानां च प्रसंजने॥ चक्रिणी
नां योगिनीनां श्रीदेवीपूरणात्मिका॥ २४॥ या कामेश्वरदेवानां कशायिनी ललितां
बिकां॥ कामेश्याद्दि चतुर्थी सा नित्यानां षोडशी मता॥ २५॥ योगिनीच देवीनां नवमी
परिकीर्तिता॥ समये संतरालस्यापरिष्टाद्दिल्वलांतिक॥ २६॥ नाथांतरमिति प्रोक्तं
हस्तविंशति चोन्नतं॥ चतुर्नल्वप्रविस्तारं प्राग्वत्सोपानमंडितं॥ २७॥ तत्र नाथा

॥रु॥ यत्तिः कालरोगौ च कलाविद्ये च मायया ॥ शुद्धविद्येश्वरद्रौसे शिवशक्तिः प्रिवायति
॥२००॥ ५९ एताः षट्त्रिंशदाख्यातास्तत्त्वसोपानपंक्तयः ॥ एषा सोपानपंक्तिश्च मं
च पूर्वदिशाश्रिता ॥६०॥ अथ पंचस्योपरिष्टाच्च सतूलिकतल्पकं ॥ हस्तमात्रसमु
न्नम्रं चतुर्हस्तप्रविस्तरं ॥६१॥ पादोपधानमूर्धोपधानद्वंद्व विराजितं ॥ गंडुकानां
चतुष्टय्य शोभितं पाटलत्विषा ॥६२॥ तस्योपरिष्टात्कौसुंभवसनेनोत्तरच्छदः ॥ शु
चीनां मृदुकुसुमयत्पराग मणि त्विषा ॥६३॥ तस्योपरि च सत्पूर्वदिङ्मुखोदयया
न्वितः ॥ शृंगारवेषरुचिरः सदा षोडशवर्षिकः ॥६४॥ उद्यद्भास्करबिंबाभश्चतु ॥श्री॥
र्हस्तस्त्रिलोचनः ॥ हारकेयूरमुकुटकटकाद्यैरलंकृतः ॥६५॥ कमनीयस्मितज्यो ॥२०१॥
त्स्नापरिपूर्णकपोलभूः ॥ जागर्ति भगवानादिदेवः कामेश्वरः शिवः ॥६६॥

तस्योत्संगे समासीनात्तरुणादित्यपाटला ॥ सदा षोडशवर्षा च नवयौवनदर्पि
ता ॥६७॥ आमृष्टपद्मरागाभचरणाब्जनखच्छटा ॥ पावकश्रानिव्यपेक्षपादलौहि
त्यवाहिनी ॥६८॥ कलनिःस्वानमंजीरउत्कंकणमनोहरा ॥ अनंगवीणातूणीर
दर्पोन्मथनजंघिका ॥६९॥ करिशुंडाकदलिकाकांतितुल्योरुशोभिनी ॥ अरुणेन
दुकूलेन सुस्पर्शेन तनीयसा ॥७०॥ अलंकृतनितंबाढ्यजघनाभासुरा ॥ अर्धोरुक
ग्रंथिमतीरत्नकांचिविराजिता ॥७१॥ नतनाभिमहावर्तत्रिवल्यूर्मिप्रभास्वरी
स्तनकुड्मलहिंदोलमुक्तादामशतावृता ॥७२॥ अतिपीवरवक्षोजभारभंगुरमध्य
भूः ॥ शरीषदामकोमलस्पशालितश्चतुरोभुजान् ॥७३॥ केयूरकंकणश्रेणीमंडि
तान्सोर्मिकांगुलीन् ॥ वहंती परिसंमृष्टशंखस्फुदरकंधरा ॥७४॥ मुखदर्पण

॥ ल ॥ हंताभचुबुकापाटलाधरा ॥ शुचिभिः पंक्तिबन्धैश्च विद्यारत्नैर्विभास्वरैः ॥ ७५ ॥ कुं
॥२१०॥ डकुड्मलसच्छायैर्दंतैर्दिशितचंद्रिका ॥ स्थूलमौक्तिकसन्तधनासाभरणभास्करा
॥ ७६ ॥ केनकोतदलद्रोणीदीर्घदीर्घविलोचना ॥ अर्धेंदुतुलिताभाले सम्यक्कॢप्ता
लकच्छटा ॥ ७७ ॥ पालिवृत्तसमाणिक्यकुंडलामंडितश्रुतिः ॥ नवकर्पूरकस्तूरीस
दामोदितवीटिका ॥ ७८ ॥ शरच्चारुनिशानाथमंडलीमधुरानना ॥ चिंतामणी
नां सारेण कॢप्तचारुकिरीटका ॥ ७९ ॥ स्फुरत्तिलकरत्नाभभालनेत्रविराजिता ॥
गाढांधकारनिबिडश्यामकुंतलसंहतिः ॥ ८० ॥ सीमंतरेखाविन्यस्तसिंदूरश्रेणि ॥श्री॥
भास्करा ॥ स्फुरच्चंद्रकलोत्तंसमदलोलविलोचना ॥ ८१ ॥ सर्वशृंगारवेषाढ्यासर्वा ॥२१०॥
भरणभूषिता ॥ समस्तलोकमाताच सदानंदविवर्धिनी ॥ ८२ ॥ ब्रह्मविष्णु

कर्णिकारकरूपधृक् ॥ ईश्वरात्मा सविज्ञेय ईशदिग्भागमाश्रितः ॥ ८३ ॥ एतेस
र्वे सायुधाश्च सर्वालंकारभूषिताः ॥ उपर्यधस्तंभरूपा मध्येपुरुषरूपिणः ॥ ८२ ॥
श्रीध्याननमीलिताक्षश्च श्रीध्यानानिश्चलांगकाः ॥ तेषामुपरि मंचस्य फलकस्तु
सदाशिवः ॥ ८३ ॥ विकासिदाडिमच्छायश्चतुर्नल्वप्रविस्तरः ॥ नल्वषट्कामेयावां
श्च सदाभारमूर्त्तिमान् ॥ ८४ ॥ अंगदेव्यंतरारंभामंचस्य फलकावधि ॥ चिंतामणि
मयोगान्नितत्वरूपाणि तापस ॥ ८५ ॥ सोपानानि विभासंते षट्त्रिंशत्मानि वेश
नेः ॥ आरोहस्य क्रमेणैव सोपानान्यभिदध्महे ८ ॥ भूरिरापोनलोवायुराकाशोगंध
रसवच ॥ रसोरूपंस्पर्शशब्दोपस्थपायुपदानिच ॥ ८७ ॥ पाणिवाक्घ्राणजिह्वा
श्च त्वक्चक्षुःश्रोत्रमेवच ॥ अहंकारश्च बुद्धिश्च मनःप्रकृतिपूरुषौ ॥ ८८ ॥ नि

॥८॥ हस्पतिसमा वक्ता रो यदि कुंभज ॥ तथापि तस्याः श्रीदेव्याः पादाब्जैकांगुलिद्युतिः ॥९१॥
॥२३३॥ सहस्रांशेषैवकांशवर्णना न हि जायते ॥ अतो वाग्वृत्तिरखिला निघृष्टा तद्गुणस्तु
तौ ॥ ९२ ॥ बिंदुपीठस्य परितश्चतुरस्रं तथा स्थिता ॥ महामाया जवनिका लंबते
मेचकप्रभा ॥ ९३ ॥ देव्या उपरि हस्तानां विंशतिर्हितयोर्ध्वतः ॥ इंद्रगोपवितानं तु
बध्नं त्रैलोक्यदुर्लभं ॥ ९४ ॥ तत्रालंकारजालं तु वर्तमानं सुदुर्लभं ॥ मद्वाणी वर्त
यिष्यंति केदरविहिया हता ॥ ९५ ॥ सैव जानाति तत्सर्वं तन्नृत्यमतुलं गुणं ॥ मनसो
पि हि दूरे तत्सौभाग्यं केन वर्ण्यते ॥ ९६ ॥ इत्थं भंडमहादैत्यवधाय ललितांबिका ॥श्री॥
प्रादुर्भूता चिदनलाद्धतनिःशेषदानवा ॥ ९७ ॥ दिव्यशिल्पिजनैः क्लृप्तं षोडशक्षे ॥२३३॥
त्रवेष्टितं ॥ अधिष्ठाय श्रीनगरं सदा रक्षति विष्टपं ॥ ९८ ॥ इत्थमेवं प्रकारेण श्री

पुराण्यन्यकान्यपि ॥ न भवेत्कोपि विद्वासो नाममात्रे पुरां भिदा ॥ ९९ ॥ नानावृत्धम
होद्यानमारभ्येति क्रमेणये ॥ पठंति श्रीपुरकथास्ते यांति परमां गतिं ॥ ३०० ॥ आ
कर्णयंति पृच्छंति विचिन्वंति च ये नराः ॥ ये पुस्तके धारयंति ते यांति परमां गतिं
१ ॥ ये श्रीपुरप्रकारेण तत्तत्सालान्विभेदतः ॥ कृत्वा शिल्पिजनैः सर्वं श्रीदेव्या
यतनं महत् ॥ २ ॥ संपादयंति सद्भक्तास्ते यांति परमां गतिं ॥ ३ ॥ इति श्री ब्रह्मांडा
डपुराणे उत्तरभागे ललितोपाख्याने हयग्रीवागस्त्यसंवादे गृहराजतारकथनं ना
म एकत्रिंशोध्यायः ॥ ३१ ॥ अगस्त्योवाच ॥ श्रुतं मे तन्महावृत्तमाविर्भावादिकं म
हत् ॥ भंडासुरवधश्चैव देव्याः श्रीनगरस्थितिः ॥ १ ॥ इदानीं श्रोतुमिच्छामि तस्य मं
त्रस्य साधनं ॥ तद्भक्तानां लक्षणं च सर्वं मे तन्निवेदय ॥ २ ॥ सर्वेभ्योपि हि वै देव्या

॥ल॥ हयग्रीव उवाच ॥ सर्वेभ्योपि पदार्थेभ्यः शाब्दं वस्तु महत्तरं ॥ सर्वेभ्योपि शाब्देभ्यो वेद
॥२३२॥ राशिर्महामुने ॥ २॥ सर्वेभ्योपि हि वेदेभ्यो वेदमंत्रा महत्तराः ॥ सर्वेभ्यो ------
विष्णुमंत्रा महत्तराः ॥ ४॥ तेभ्योपि दौर्गमंत्रास्तु महांतो मुनिपुंगव ॥ तेभ्योपि गाणपत्या
स्तु मंत्रा वीर्यमहत्तराः ॥ ५॥ तेभ्योप्यर्कस्य मंत्रास्तु तेभ्यः शैवा महत्तराः ॥ तेभ्योपि ल
क्ष्मीमंत्रास्तु तेभ्यः सारस्वता वराः ॥ ६॥ तेभ्योपि गिरिजामंत्रास्तेभ्यस्त्वाम्नायदेवताः ॥
सर्वाम्नायमनुभ्योपि वाराही मनुजो वराः ॥ ७॥ तेभ्यः श्यामामनुवरा वरिष्ठा इव लांतकं ॥
तेभ्योपि ललितामंत्राः दशभेदविभेदिताः ॥ ८॥ तेषु द्वौ मनुराजो तु वरिष्ठौ विंध्य ॥श्री॥
मर्दन ॥ लोपामुद्रा कामराज इति ख्यातिमुपागतौ ॥ ९॥ हादिस्तु लोपामुद्रास्या काम ॥२१२॥
राजस्तु कादिका ॥ हंसादेवाच्यतो यातः ॥ ॥ ॥ ॥

गिरीशो शमसद्दाक्षिवनिर्दानभूः ॥ अपांगरिंखत्करुणानिर्झरीतर्पिताखिला ॥ ८३॥
भासते सा भगवती पापघ्नी ललितांबिका ॥ अन्यदेवतपूजानां पश्चात्पूजाफलं वि
दुः ॥ ८४॥ यस्याः पूजाफलं प्राहुर्यस्याः खलु हि पूजनं ॥ तस्याः श्रीललितादेव्या वर्णयामि
कथं वपुः ॥ ८५॥ वर्षकोटिसहस्रेणाप्येकांशो वर्ण्यते न हि ॥ वर्णनानामसावाग्रूपावा
चस्तस्यां कुतो गतिः ॥ ८६॥ यतो वाचो निवर्त्तंते अप्राप्य मनसा सह ॥ बहुनाकिमिहो
क्तेन तत्स्वभूतमिदं शृणु ॥ ८७॥ न पक्षपातान्न हस्ते हा भमो हा ह्यमर्यो च्यते ॥ संतु
कल्पतरोः शाखा लेखिन्यस्तपसान्निधे ॥ ८८॥ मणिपात्राणि सर्वेपि सप्तसंतु म
हार्णवाः ॥ पंचाशत्कोटिविस्तीर्णा भूमिः पत्रत्वमिच्छतु ॥ ८९॥ तत्र स्थले खकालो स्तु
परार्धाधिकवत्सरैः ॥ लिखंतु सर्वलोकाश्च प्रत्येकं कोटिवाहवः ॥ ९०॥ सर्वेह

॥ल॥ त्वा प्रसन्नं करुणालयं ॥ ततो बहिर्विनिर्गत्य कुर्याच्छौचादिकाः क्रियाः ॥ १८ ॥ अथा
॥२१२॥ गत्य वर्त्तैलेन सामोदेन विलेपितः ॥ उद्वर्त्तितश्च संस्नातः शुद्धेनोष्णेन वारिणा ॥ १९ ॥
आपो निसर्गतः पूताः किं पुनर्वह्निसंयुताः ॥ तस्मादुष्णोदके स्नायात्तदभावे यथोद
के ॥ २० ॥ परिधाय पटौ शुद्धौ कौसुंभौ वाथ चारिणो ॥ आचम्य प्रयतो विद्वान् हृदि
ध्यायन् परांबिकां ॥ २१ ॥ ऊर्ध्वपुंड्रं त्रिपुंड्रं वा पवर्धनमेव वा ॥ अगस्त्यपत्राकारं वा
धृत्वा फालिनियोजितं ॥ २२ ॥ अंतर्बहिश्च शुद्धात्मा संध्यावंदनमाचरेत् ॥ अश्व
त्थपत्राकारेण पात्रेण सकुशाक्षतं ॥ २३ ॥ सपुष्पचंदनं चार्घ्यं मार्तंडाय समुत्क्षि ॥श्री॥
पेत् ॥ तथार्घ्यं भानवे दत्वा ललितायै निरर्घ्यकं ॥ २४ ॥ तर्पयित्वा यथाशक्ति मूलेन ॥२१३॥
ललितेश्वरीं ॥ देवर्षिपितृवर्गांश्च तर्पयित्वा विधानतः ॥ २५ ॥ दिवाकरमुपस्थाय

देवीं च रविबिंबगां ॥ मौनी विशुद्धहृदयः प्रविश्य मखमंदिरं ॥ २६ ॥ चारुकर्पु
रकस्तूरीचंदनादिविलेपितः ॥ भूषणैर्भूषितांगश्च चारुशृंगारवेषधृक् ॥ २७ ॥ आ
मोदिकुसुमस्रग्भिरवतंसितकुंतलः ॥ संकल्पभूषणो वाथ यथाविभवभूषणः ॥
२८ ॥ न्यासखंडे वक्ष्यमाणान् कृत्वा न्यासाननुक्रमात् ॥ मृद्वासने समासीनो ध्याये
च्छ्रीनगरं महत् ॥ २९ ॥ नानावृक्षमहोद्यानमारभ्या ललितावधि ॥ ध्यायेच्छ्रीनगरं दि
व्यं अबहिर्मौनसः शुचिः ॥ ३० ॥ पूजाखंडोक्तमार्गेण पूजां कृत्वा विचक्षणः ॥ अक्षमालां
समादाय चंद्रकस्तूरिवासितां ॥ ३१ ॥ उदङ्मुखः प्राङ्मुखो वा जपेत् सिंहासनेश्वरीं ॥
षड्भिः शतसहस्रस्य संख्यानु जपेद्धि यो प्रसिध्यति ॥ ३२ ॥ तद्दशांशश्च होमः स्यात्तद्दशांशं
च तर्पणं ॥ तद्दशांशं ब्राह्मणानां भोजनं समुदीरितं ॥ ३३ ॥ एवं संसिद्धमंत्रस्तु कु

॥ल॥ र्याकाम्यजपेत्पुनः॥ लक्षमात्रंजपित्वातुमनुष्यान्वशमानयेत्॥३४॥लक्षद्वितय
॥२३४॥ जापेननारीःसर्वावशंनयेत्॥ लक्षत्रितीयजापेनसर्वान्वशयत्नेनृपान्॥३५॥चतु
र्लक्षजपेजातेलभ्यंतिफणिकन्यकाः॥ पंचलक्षजपेजातेसर्वाःपातालयोषितः॥३६॥
भूलोकस्वर्गवर्गौवश्यःषट्लक्षजायतः॥ लभ्यंतिसप्तलक्षेणस्वर्गलोकमृगी
दृशः॥३७॥देवयोनिभवाःसर्वेप्यष्टलक्षजपाद्दृशाः॥ नवलक्षेणगंधर्वीणांनरवि
त्तान्वशमानयेत्॥३८॥दशलक्षेणशक्रादीन्दिक्पालान्वशमानयेत्॥ लक्षै
कादशजापेनब्रह्मविष्णुमहेश्वरान्॥३९॥लक्षद्वादशजापेनसिद्धांरक्षोवशंनये ॥श्री॥
त्॥ इंद्रस्येंद्रत्वमेतेनमंत्रेणप्राप्तभवत्पुरा॥४०॥ विष्णोर्विष्णुत्वमेतेनशिवस्यशि ॥२३४॥
वतामुना॥ इंद्रोश्वेंद्रत्वमेतेनभानोर्भानुत्वतास्कृताः॥४१॥सर्वासांदेवतानांच

कामैराजमहेश्वरः॥१०॥स्मरादेवार्च्यतांयातादेवीश्रीललितांबिका॥ हादिकाद्यौमे
त्रयोस्तुभेदौवर्णत्रयोद्भवः॥ तयोस्तुकामराजोयंसिद्धिदोभक्तिशालिनां॥११॥
शिवेनशक्त्याकामेनक्षित्याचैवतुमायया॥ हंसेनभृगुणाचैवकामेनशशिमौलि
ना॥१२॥शक्रेणभुवनेशाचचंद्रेणाचमनोभुवा॥ क्षित्यात्हल्लेखयाचैवप्रोक्तोहंसा
दिमंत्रराट्॥१३॥कामादिमंत्रराजस्तुस्मरयोनिश्रियामुखे॥ पंचत्रिकमहावि
द्यांललितांबाप्रवाचिकां॥१४॥येयजंतिमहाभागास्तेषांसर्वत्रसिद्धयः॥सद्गुरो
स्तुमनुंप्राप्यत्रिपंचार्णपरिष्कृतं॥१५॥सम्यक्संसाधयेद्विद्वान्वक्ष्यमाणप्रकारतः
तत्केनचप्रवक्ष्यामिसावधानोमुनीश्रृणु॥१६॥प्रातरुत्थायशिरसीस्मृत्वाकमे
लमुज्वले सहस्रचंद्रशोभाढ्यंसकेसरस्फुकर्णिके॥१७॥तत्रश्रीसद्गुरुंध्या

॥ल॥ दुः॥ तत्वं जानाति निखिलं सार्वज्ञं चापि गच्छति ॥५०॥ सद्भासा ईदृशं यत तस्यैव कुर्वंतु
॥२९५॥ तुषु ॥ तत्कोपाग्नेर्विषयतां गंतुं नालं जगत्त्रये ॥५१॥ तस्य दर्शनवेलायां श्लथनीवि
बंधनाः ॥ विस्रस्तरशनाबंधा गलत्कुंतलसंचयाः ॥५२॥ घर्मवारिकणश्रेणीमु
क्ताभूषितमूर्तयः ॥ अत्यंतरागतरलव्यापारनयनांचलाः ॥५३॥ स्रस्ते समाने कराम्भो
जमणिकंकणपंक्तयः ॥ ऊरुस्तंभेन निष्पंदा नमितास्याश्च लज्जया ॥५४॥ कुलं जा
तिं च शीलं च लज्जां च परिवादनं ॥ लोकोद्भवं बंधुभयं परलोकभयं तथा ॥५५॥ मुं
चंत्यो हृदि चिंतयंत्यो भवंति हरिणीदृशः ॥ अरण्ये पट्टणे वापि देवालयमठेषु वा ॥५६॥ श्री॥
यत्र कुत्रापि तिष्ठंतं तं धावंति मृगीदृशः ॥ वात्याहतं यथा पांडुपत्रं भवति पुष्करे ॥५७॥ ॥२९५॥
तद्भ्रमंति चित्तानि दर्शने तस्य सुभ्रुवां ॥ वनिता नवनीतानां विद्रावणमहाब

लं ॥५८॥ संसेवंते समस्तानां विद्यानामपि पंक्तयः ॥ चंद्रार्कमंडलद्वंद्वकुचमंडलशो
भिनी ॥५९॥ त्रिलोकीललना तस्य दर्शनादनुरंजति ॥ अत्यासां तु वराकीणां वक्तव्यं
किं तपोधन ॥६०॥ पट्टणेषु च वीथीषु चत्वरेषु वनेषु च ॥ तत्कीर्त्तिघोषणा पुण्या स
दा धुधुधुमायते ॥६१॥ तस्य दर्शनतः पापजालं नश्यति पापिनां ॥ तद्गुणा एव घुष्यंते
सर्वत्र कविपुंगवैः ॥६२॥ भिन्नैर्वर्णैरायुधैश्च भिन्नैर्वाहनभूषणैः ॥ ये ध्यायंति म
हादेवीं तास्ता सिद्धिं भजंति हे ॥६३॥ मनोज्ञा हिमखंडस्य कुंदेंदुधवलद्युतिः ॥ आत्त
चक्रांचलज्वाला चिंतनीयस्तु मूलके ॥६४॥ इंद्रगोपकसंकाशो हृती यो मनु खंडकः ॥
विभावनीयो हृच्चक्रे आपालोतज्ज्वलच्छविः ॥६५॥ अथ ललाटपट्टस्थद्विदलांबुज
कोटरे ॥ विभावनीयस्तातीर्यः खंडो दुरितखंडकः ॥६६॥ मुक्तो ध्येया शशिज्यो

॥९८॥ स्नाधवलाकृतिरंबिका॥ रक्तसंध्यकरोचिस्याद्वशीकरणकर्मणि॥ ६७॥ सर्वसंप
॥२३६॥ त्तिलाभेतु श्यामलांगीविचिंत्यते॥ नीलाचमूकीकरणे पीतास्तंभनकर्मणि॥ ६८॥
कवित्वेविशदाकारस्फटिकोपलनिर्मला॥ धनलाभेसुवर्णाभा चिंत्यतेललितां
बिका॥ ६९॥ आमूलमाब्रह्मबिलंज्वलन्माणिक्यदीपवत्॥ येध्यायंतिमहःपुंजं
तेस्युःसंसिद्धसिद्धयः॥ ७०॥ एवंबहुप्रकारेणध्यानभेदेनकुंभज॥ विभावयंतः
श्रीदेवींभजंतिमहतींश्रियं॥ ७१॥ प्राप्यतेसद्भिरेवैषानासद्भिस्तुकदाचन॥
येस्तुतप्तंतपस्तीव्रंतैरेवात्मनिधीयते॥ ७२॥ तस्यनोपश्चिमंजन्मस्वयंयोवानशं ॥श्री॥
करः॥ नतेनलभ्यतेविद्याललितापरमेश्वरी॥ ७३॥ वंशेतुयस्यकस्यापिभवे ॥२३६॥
देषमनुर्यदि॥ तद्वंश्याःसर्वएवस्युःमुक्तास्त्तानसंशयः॥ ७४॥

तास्तासिद्धउज्वलः॥ अनेनमंत्रराजेनजातास्त्यवधारय॥ ८२॥ एतन्मंत्रस्यजा
पीतुसर्वपापैर्विवर्जितः॥ त्रैलोक्यसुंदराकारोमन्मथस्यापिमोहकृत्॥ ८३॥ सर्वा
भिःसिद्धिभिर्युक्तःसर्वज्ञःसर्वपूजितः॥ दर्शनादेवसर्वेषामंतरानंदपूरकः॥ ८४॥
वाचावाचस्पतिसमःश्रियाश्रीपतिसंन्निभः॥ बलेमरुत्समानस्यात्स्थिरत्येहिमवानि
व॥ ८५॥ औनत्येमेरुतुल्यस्यात्गांभीर्येणमहार्णवः॥ क्षयात्क्षोभकरोमूर्त्याग्रा
मपल्लीपुरादिषु॥ ८६॥ ईषत्तुभ्रूभंगमात्रेणस्तंभकोजंभकस्तथा॥ उच्चाटकोमोहकु
श्चमारकोदुष्टचेतसां॥ ८७॥ क्रुद्धःप्रसीदतिहयत्रतस्यदर्शनहर्षितः॥ अष्टादश
सुविद्यासुनिरूढिमधिगच्छति॥ ८८॥ मंदाकिनीप्रूरसमामधुरातस्यभारती॥ नत
स्याविदितंकिंचित्सर्वशास्त्रेषुकुंभज॥ ८९॥ दर्शनानिवसर्वाणिकर्तुंखंडयितुंप

॥ल॥ यी मूर्त्तिस्तेजोविजृंभिता ॥ कामाक्षी त्रिविधा चातु प्रस्तुता ललितेश्वरी ॥ ८८ ॥ ध्या
॥२३७॥ यत्येवं परया भक्त्या तां परां ललितांबिकां ॥ सदाशिवस्य मनसो ललनाल्ललिताभिधा
८९ ॥ यद्यत्स्तनवतीकृत्यं तत्सर्वं विनिवेदितं ॥ पूजाविधानमखिलं शास्त्रोक्तेनैव व
र्त्मना ॥ ९० ॥ स्वेष्टेतरे वदिष्यामि तदिह्लासं महाद्युते ॥ ९१ ॥ इति श्री ब्रह्मांडपुराणे हयग्री
वागस्त्य संवादे ललितोपाख्याने मंत्रराजसाधनप्रकारकेनाम द्वित्रिंशोध्यायः ॥ ३२ ॥
प्रविश्य तु जपस्थानमानीय निजमानसं ॥ अभ्यर्च्य विधिवन्मंत्री गुरुक्रमयो
गतः ॥ १ ॥ स्वात्मानं देवतामूर्त्तिं ध्यायं स्तत्राचशेततः ॥ प्राङ्मुखो दृढमाबध्य ॥श्री॥
पद्मासनमनोषधा ॥ २ ॥ त्रिखंडामनुबध्नाथ गुर्वादीनभिवंद्य च ॥ हृल्लेखा ॥२३७॥
लाबीजानि मध्यांगुलिषु क्रमात् ॥ ३ ॥ करयोरपि विन्यस्य करशुद्धिपुरःस

रं ॥ अग्निप्राकारपर्यंतं कुर्यात्स्वास्त्रेण मंत्रवित् ॥ ४ ॥ प्रतिलोमेन पादाद्यमनुलो
मेन कादिकं ॥ व्याथयामास मारोप्य व्यापयन्वाग्भवादिभिः ॥ ५ ॥ व्यक्तेसकारणः
सूक्ष्म स्थूलरूपाणि कल्पयेत् ॥ नाभौ हृदि भ्रुवोर्मध्ये बालाबीजान्विन्यसेत् ॥ ६ ॥
मातृकामूलपुटितान्यासेनाभ्यादिषु क्रमात् ॥ बालाबीजानि तान्येव हृद्गतानि त्या
थ विन्यसेत् ॥ ७ ॥ मध्यादिकरशाखासु तलयोरपि तान्यथ ॥ नाभ्यादावथ वि
न्यस्य न्यसेदथ पदद्वये ॥ ८ ॥ जानूरुस्फिग्गुह्यमूलनाभिहृन्मूर्धसु क्रमात् ॥
नवाम नानि ब्रह्माणं विष्णुं रुद्रं तथेश्वरं ॥ ९ ॥ सदाशिवं पुष्पमल्लिकोत्पलाज्ञान
प्रकाशनं ॥ विद्यासनं च वित्यस्य हृदये दर्शयेत्ततः ॥ १० ॥ पद्मत्रिखंडयोन्या
ख्या मुद्रा ओष्ठपुटानि च ॥ वायुमापूर्य हुंहुंहु मिति प्राबोध्य कुंडलीं ॥ ११ ॥ रु

॥ल॥ द्रशक्त्या समुन्नीय द्वादशांते शिवे कृतां ॥ भावयित्वा पुनस्तां च स्वस्थाने विनिवे
॥२३८॥ शच ॥१२॥ वाग्भवादीनि बीजानि मूलत्रिं दुषु न्यसेत् ॥ समस्तं मूर्ध्नि दोर्मूलमध्या
ग्रेषु यथाक्रमं ॥१३॥ व्यस्तं विन्यच्चांगेस्वैरं गुह्यादितलावधि ॥ हृदयादौ च विन्यस्य
कुंकुमन्यासमाचरेत् ॥१४॥ शुद्धा तृतीयबीजेन पुटितां मातृकां पुनः ॥ अद्यबीजद्व
यान्याद्यामेत्यबीजां ततो न्यसेत् ॥१५॥ पुनर्भूतलिपिन्यासमाचरेन्नातिविस्तरं ॥ वर्गा
ष्टकं न्यसेन्मूले नाभौ हृदयकाष्ठयोः ॥१६॥ प्राद्यास्येषु भषसा मूलस्त्रिन्मूर्ध्नि विन्य
सेत् ॥ दक्षकद्व्यंसवामांसकटिहृत्सु च विन्यसेत् ॥१७॥ प्रभूताद्याः षडंगानि हृदि ॥श्री॥
वर्गे प्रविन्यसेत् ॥ ऋषिस्तु भद्रब्रह्मास्य छंदो भूतलिपिर्मता ॥१८॥ श्रीमूलप्रकृ ॥२३८॥
तिस्त्वस्य देवता कथिता मनोः ॥ अक्षस्रक्पुस्तका वृद्ध्ये पुष्पबाणेक्षुकार्मुके ॥१९॥

गुप्तागुप्ततरैवैषा सर्वशास्त्रेषु निश्चिता ॥ वेदाः समस्ताः शास्त्राणि स्तुवंति ललिते
श्वरीं ॥७५॥ परमात्मेयमेवस्याद्दियमेव परागतिः ॥ इयमेव महत्तीर्थमियमेव महत्फ
लं ॥७६॥ इमां गायंति मुनयो ध्यायंति सनकादयः ॥ अर्चंतीमां सुरश्रेष्ठा ब्रह्माद्या
पंचसिद्धिदां ॥७७॥ न प्राप्यते कुचारित्रैः कुत्सितैः कुटिलाशयैः ॥ वेदबाह्यैर्वृथातत
र्कैर्वृथाविभ्रांतबुद्धिभिः ॥७८॥ नष्टैरश्लीलैरुच्छिष्टैः कुलभ्रष्टैश्च निष्ठुरैः ॥ दर्शनद्वे
षिभिः पापशीलैराचार्यनिंदकैः ॥७९॥ चार्वाकमतनिष्णातैर्गर्वितैः परदूषकैः ॥ अ
नात्मज्ञैरनल्पेष्वः क्रोधनैर्गुरुबाधकैः ॥८०॥ उद्धतैरुद्धताल्लापैर्दांभिकैरतिमा
निभिः ॥ एतादृशानां मर्त्यानां देवानां चातिदुर्लभा ॥८१॥ देवतानां च पूज्यत्वमस्याः
श्रीकंघरोद्भव ॥ भंडासुरवधायेषा प्रादुर्भूता चदग्नितः ॥८२॥ महात्रिपुरसुंद

॥ल॥ शषसा इति विख्याता श्चत्वारिंशदक्षराः॥ आद्यः पंचाक्षरो वर्गो द्वितीयश्च चतु
॥२३९॥ रक्षरः॥२९॥ पंचाक्षरैस्तु षड्वर्गाः त्रिवर्णो नवमो मतः॥ ब्रह्मा विष्णुश्च रुद्रश्च प्रजे
शेंद्रयमाः क्रमात्॥३०॥ वरुणश्चैव सोमश्च शक्तिश्च यमिमे नव॥ वर्गाणामीश्वराः
प्रोक्ताः क्रमो भूतलिपेरयं॥३१॥ एषु हि स्युर्द्वौ पादौ विपरिसंहृता वध्न्येव॥ स्थाना
नि योजनीयो विसर्गविंदु च वर्ण्यते॥३२॥ ध्यानपूर्वं ततः प्राज्ञो रत्यादिन्यासमाचरेत्
जपाकुसुमसंकाशाः कुंकुमारुण्यविग्रहाः॥३३॥ कामावामाधिरूढांका ध्येयाः शरध
नुर्धराः॥ रतिप्रीतियुतो कामो कामिन्या कांत इष्यते॥३४॥ कांतिमान्मोहिनीयु ॥श्री॥
क्तः कामुकः श्यामवर्णया॥ शुचिस्मितान्विता कामं बंधको विस्मितायुतः॥३५॥ का ॥२३९॥
मांगे कलहप्रिया॥ अन्वेति कामाचारस्तु विलासिन्या समन्वितः॥३६॥ रमणो

विस्मिताक्ष्या च रामोयं स्त्रोलिहानया॥ रमणेपि रतीनाथो दिगंबरास्त्यो रतिप्रि
यः॥३७॥ वामया कुब्जिकायुक्तो रतिनाथो धरायुतः॥ रमाकांतो रिल्ययोत्स्योत् म
मागो निशाचरः॥३८॥ कल्याणो मोहिनीनाथो नंदकश्चोत्तमासितः॥ नंदी स्फरोत्त
माढ्यो नंदनानंदयितायुतः॥३९॥ रकाख्या पुष्पधन्वापि स्मुखीशो महाहनुः॥
नीलीजटीस्त्यो भ्रमयाः क्रमशः पालिनीपतिः॥४०॥ भ्रममाणः शिखाकांतो भ्रम
ांतश्च मुग्धधा॥ भ्रमिकोरमया ज्ञोभ्रामिको भृंगरयिष्यते॥४१॥ भ्रांताचालोली
चनया दीर्घजिह्विकयायुतः॥ भ्रमावहः समन्वेति मोहनस्तु रतिप्रियां॥४२॥ मो
हनश्चपलाशास्मांगृहिण्यो मोहयिष्यते॥ विकरेड्यो मोहधरो वर्धनोथ वरा
युतः॥४३॥ मदनाख्यो नृपमस्तु मन्मथो मलयान्वितः॥ मातंगोल्हादिनीयुक्तः स

॥ल॥ मिंदं तिछती मुखी ॥४४॥ नायको भृंगपूर्वस्तु गायको नंदिनीयुतः ॥ गीतिको नाम
॥२४०॥ याज्ञेयः कल्यानर्तक इष्यते ॥४५॥ क्ष्वेलकः कालकंठीज्वः कायीमत्त च इष्यते ॥ नर्त नृ
कः श्यामलाकांतो विलासी उषयान्वितः ॥४६॥ उन्मत्तामुपसंगम्य मोदते कामवर्धकः ॥
ध्यानपूर्वं ततः श्रीकंठादिविन्यासमाचरेत् ॥४७॥ सिंदूरकांचनसमो भयभागमर्ध
नारीश्वरं गिरिसुता हरभूषचिह्नं ॥ पाशद्वयाक्षवलयेष्टदहस्तमेवं सांत्वन्यसेल्लिपि
वदेषु समाहितार्थः ॥४८॥ श्रीकंठोनंत सूक्ष्मौ च त्रिमूर्तिरमरेश्वरः ॥ अर्धीशो भारभू
तिश्च कृत्तिशः स्थाणुको हरः ॥४९॥ झिंटी भौतिकः सद्योजातश्चानुग्रहेश्वरः ॥ ॥श्री॥
अक्रूरश्च महासेनः सुरेते स्वरमूर्तयः ॥५०॥ ततः क्रोधीशचंडीशौ पंचांतकशिवो ॥२२॥
तमो ॥ तथैकरुद्रकूर्मैकनेत्राश्च चतुराननाः ॥५१॥ अजेशसर्वसोमश्च राश्च लांग

॥ वराभीतिकरान्नैश्च धारयंतीमनूपमां ॥ रत्नाक्षरमयीं मालां वहंतीं कंठदेवताः
॥२१॥ हारकेयूरकटकछन्नवीरविभूषणां ॥ दिव्यांगरागसंभिन्नां मणिकुंडलमं
डितां ॥२२॥ लिपिकल्पद्रुमस्याधो लिपिपंकजवासिनीं ॥ साक्षाल्लिपिमयीं देवीं
भैरवीं भक्तवत्सलां ॥२३॥ अनेककोटिद्युतीभिः समंतात्समलंकृतां ॥ एवं ध्यात्वा
न्यसेद्भूयो भूतलिप्यक्षरान्क्रमात् ॥२४॥ मूलाधाराज्जावसानेषु वर्गाष्टकमथन्यसेत्
शषसान्मूर्ध्नि संहत्या स्वरानेवेवविन्यसेत् ॥२५॥ ह्रींदीर्घूर्ध्वादिपंचास्ये ष्वग्रे मूले च
मध्यतः ॥ अंगुलीमूलमणिबंधयोर्दोष्णोश्च पादयो ॥२६॥ जठरे पार्श्वयोर्दक्षवामयो
नाभिपृष्ठयोः ॥ शषसा मूलहृन्मूर्ध्नस्त्वेतान्बालादिकान्यसेत् ॥२७॥ ह्रस्वाः पंचा
थ संध्यार्णाश्चत्वारो हयरावलो ॥ इकोरवधेन गश्चादौ क्रमोयं शिष्टवर्गके ॥२८॥

॥ ल ॥ गर्जिनी काली रात्री कूर्दन्य एव च ॥ कपर्दिनी तथा वज्री जया च सुमुखेश्वरी ॥ ६० ॥
॥२२१॥ रेवती माधवी चैव वारुणी वायवी तथा ॥ रक्षोवधारिणी चान्या तथैव समजाङ्कया ॥ ६१ ॥ ल
क्ष्मीश्च व्यापिनी माये त्याख्याताः स्वरशक्तयः ॥ ह्रिरुका बाला षट्बीजे रंगं कला च केव
ले ॥ ६२ ॥ षोढान्यासं प्रकुर्वीत देवनात्मत्वसिध्धये ॥ विघ्नेशादिं च तत्रादौ विन्यसेध्या
पूर्वकं ॥ ६३ ॥ अरुणारुणसंकाशान् गजवक्त्रांस्त्रिलोचनान् ॥ पाशांकुशवराभीति
हस्तांश्छक्तिसमन्वितान् ॥ ६४ ॥ विघ्नेशो विघ्नराजश्च विनायकशिवोत्तमो ॥ विघ्नकृ
द्विघ्नहर्ता च विघ्नराड् गणनायकः ॥ ६५ ॥ एकदंतो द्विदंतश्च गजवक्त्रो निरंजनः ॥ श्री॥
कपर्दवान् दीर्घमुखः शंकुकर्णो वृषध्वजः ॥ ६६ ॥ गणनाथो गजेंद्रश्च शूर्पकर्णस्त्रि ॥२२१॥
लोचनः ॥ लंबोदरो महानादश्चतुर्मूर्तिः सदाशिवः ॥ ६७ ॥ आमोदो दुर्मुखश्चैव

सुमुखश्च प्रमोदकः ॥ एकपादो द्विजिह्वश्च शूरो वीरश्च षण्मुखः ॥ ६८ ॥ वरदो वा
मदेवेशश्च वक्रतुंडो द्विरंडकः ॥ सेनानीर्ग्रामणीर्मत्तो विमत्तो मत्तवाहनः ॥ ६९ ॥ जटी
मुंडी तथा खड्गी वरेण्यो वृषकेतनः ॥ भक्ष्यप्रियो गणेशश्च मेघनादो गणेश्वरः ॥ ७० ॥
एते गणेशवर्णानामेकपंचाशतः क्रमात् ॥ श्रीश्च ह्रीश्चैव पुष्टिश्च शांतिः स्तुष्टिः
सरस्वती ॥ ७१ ॥ रतिर्मेधा तथा कांतिः कामिनी मोहिनी जटा ॥ तीव्रा च ज्वालिनी नंदा
सुयशाः कामरूपिणी ॥ ७२ ॥ उग्रा तेजसिधिरम्या मानुषी मकरध्वजा ॥ विकर्णा भ्रु
कुटी लज्जा दीर्घघोणा धनुर्धरा ॥ ७३ ॥ तथैव रजनी रात्रिश्चंद्रकांता शशिप्रभा ॥ लो
लाक्षी चपला ऋज्वी दुर्भगा सुभगा शिवा ॥ ७४ ॥ दुर्गा गुहप्रिया काली कालजिह्वा च
शक्तयः ॥ गृहेन्यासं ततः कुर्याद्ध्यानपूर्वं समाहितः ॥ ७५ ॥ वरदाभयहस्ताढ्यान्

॥ ल ॥ शक्त्यालिंगितविग्रहान् ॥ कुंकुमक्षीररुधिरकुंदकोचकबुभिः ॥ ७६ ॥ अमोदधूम
॥२२२॥ तिमिरैः सूर्यादीन्संस्मृत्यानुस्मरेत ॥ हृदयाधारविन्यस्यात् शीर्षे सोमं दृशोः कुजं
॥ ७७ ॥ हृदि शुक्रं तदूर्ध्वे च बंधुकं तद्गुहस्पतिं ॥ नाभौ शनैश्चरं वक्त्रे राहुं केतुं पद
द्वये ॥ ७८ ॥ ज्वलत्कालानलप्रख्या वरदाभयपाणयः ॥ स्तराल्पस्यास्त्रपो ध्याये
सर्वाभरणभूषिता ॥ ७९ ॥ फालेनयनयोः कर्णद्वयेनासापुटद्वये ॥ कंठस्कंधद्वये प
श्चान्नकपोल्यां मणिबंधयोः ॥ ८० ॥ स्तनयोर्नाभिकद्वूरुजानुजंघापदद्वये ॥ योगि
नीन्यासमादध्याद्धितुल्धोत्दहृदये तथा ॥ ८१ ॥ ऊर्ध्वकेशी ऋधिरूणा त्वकालुषानथै ॥श्री॥
वच ॥ एकपादात्मिकाश्चर्यौ कारिणीचौषधात्मिका ॥ ८२ ॥ ततो बिंकाथाक्षरात्मिके ॥२२२॥
तिषोडशभक्तयः ॥ कालिकाखेचरीगायत्रिघंटाधारिणी तथा ॥ ८३ ॥ नादात्मिका च चामुंडी ॥

लिदारुको ॥ अर्धनारीश्वरः श्रीमाकांतः श्वाषाढदंडिनौ ॥ ८४ ॥ अत्रिमेशिनश्च मे
षश्च लोहितश्चशिखी तथा ॥ छगलंडद्विरंडौ च समाकीलववालिनौ ॥ ८५ ॥ भुजंगे
शः पिनाकी च खड्गीशश्चकस्तथा ॥ श्वेतो भृगुश्च त्कुली शिवः संवर्तकस्ततः ॥ ८६ ॥
पूर्णोदरी च विरजा तृतीया शाल्मली तथा ॥ लोलाक्षी वर्तुलाक्षी च दीर्घघोणा त
थैव च ॥ ८७ ॥ सुदीर्घमुखि गोमुख्यौ नवमी दीर्घजिह्विका ॥ कुंडोदर्यो र्ध्वकेशी
च मुखी विकृतपूर्विका ॥ ८८ ॥ सज्वालोल्का श्रियाविद्यामुख्यस्फः परशक्तयः ॥
महाकाली सरस्वत्यौ सर्वसिद्धिसमन्विते ॥ ८९ ॥ गौरी त्रैलोक्यविद्या च तथा मंत्रा
त्मशक्तिके ॥ भूतमातालंबोदरी द्राविणी नगरी तथा ॥ ९० ॥ खेचरी मंजरी चैव रू
पिणी वीरिणी तथा ॥ कोटरी पूतना भद्रा काली योगिन्य एव च ॥ ९१ ॥ शाखिनी

॥ल॥ नगरं केदारं चद्रयुकूपरं ॥ श्रीपर्वतं चैव वीरं च जंभं मालवंतं तथा ॥९२॥ कुलांतं देवि
॥२२३॥ कोटं च गोकर्णं मारुतेश्वरं ॥ अट्टहासं च विरजं राजगृहं महापथं ॥९३॥ कोल्ला
पुरमेलापुरं ओंकारं तु जयंतिका ॥ उज्जयन्यपि चित्रा क्षीरकं कंहस्तिनापुरं ॥९४॥
उड्डीशं च प्रयागाख्यं षष्ठी मायापुरी तथा ॥ गौरेशं मलयगिरिं श्रीशैलं मेरुमेव
च ॥९५॥ पुनर्गिरिवरं पश्चान्महेंद्रं वामनं गिरिं ॥ स्यास्थिरयपुरं पश्चान्महालक्ष्मी
पुरं तथा ॥९६॥ परोड्याख्या तथा छायाछत्रनाङ्कुमनीषियाः ॥ लिपिक्रमसमायुक्ता
लिपिस्थानेषु विन्यसेत् ॥९७॥ अन्यो न्यथोक्तस्थानेषु संयुक्ते लिपिसंक्रमात् ॥ पी ॥श्री॥
ठान्यासोयमाख्यातः साक्षादीश्वरभाषितः ॥९८॥ एवं विन्यस्तदेहस्तु देवतावि ॥२२३॥
ग्रहो भवेत् ॥ ततः षोढां पुरः कृत्वा श्रीचक्रन्यासमाचरेत् ॥९९॥ चक्रेश्वरीश्चक्रस

मावर्णभ्रान् त्वहदिन्यसेत् ॥ अन्यान्यथोक्तस्थानेषु गणपत्यादिकान्यसेत् ॥१००॥
दक्षिणोर्वंसयोर्वामांसोर्वोश्चक्रमशोन्यसेत् ॥ गणेशं क्षेत्रपालं च योगिनीं बटुकं त
था ॥१॥ आदावंते द्वयोर्न्यस्याः पादांगुष्ठद्वयाग्रके ॥ जानुपार्श्वौ समूर्धस्थितपार्श्व
जानुषु मूर्धनि ॥२॥ मूलाधारे च दक्षादि सिद्धिनां दशकं पुनः ॥ न्यस्तव्यं संसदोः
ष्ठस्फिक्स्व प्रपदयोः स्फि. जि ॥३॥ दोरंसपृष्ठयोर्हृदि पादहृत्तयोः क्रमात् ॥ यष्ठासि
द्धिरसं सिद्धिर्मोक्षसिद्धिरपिस्मृताः ॥४॥ ततः प्रविन्यसेद्धीमान् मातॄणामष्टकं
क्रमात् ॥ पादौ गुह्यपुटे रक्षःपार्श्वे मूर्धनि वामतः ॥५॥ पार्श्वे जान्वोर्दक्षजानौ दक्षवा
मांसयोस्तथा ॥ ब्रह्माणी चैव माहेशी कौमारी वैष्णवी तथा ॥६॥ वाराही च तथें
द्राणी चामुंडा चैव सप्तमी ॥ महालक्ष्मीश्च विज्ञेया मातरोष्टौ क्रमाद्बुधैः ॥७॥

॥ ल ॥ मुद्रादेवींन्यसेत्पश्चाद्देवे बध्येच ते पुनः॥ मूर्धास्योरपि मुद्रास्तु सर्वसंक्षोभिणीत
॥२२४॥ था॥ ८॥ सर्वविद्राविणी पश्चात्सर्वाद्याकर्षिणी तथा॥ सर्वाद्याच वशीकरणी सर्वा
द्याप्रियकारिणी॥ ९॥ महांकुशा च सर्वाद्या सर्वाद्या खेचरी तथा॥ सर्वत्रिखंडा सर्व
बीजा मुद्रा सर्वप्रपूरका॥ १०॥ योनिमुद्रेति विज्ञेया स्ततश्चक्रेश्वरींन्यसेत्॥ त्रैलो
क्यमोहनं चक्रं समर्पेत्याप्यवर्ष्मणि॥ ११॥ ततः कलानां नित्यानां क्रमात्षोडशक
न्यसेत्॥ कामाकर्षणरूपा च बुध्याकर्षणरूपिणी॥ १२॥ चिताकर्षणरूपा च धैर्याकर्ष
णरूपिणी॥ स्मृत्याकर्षणरूपा च मनआकर्षिणी तथा॥ १३॥ श्रध्याकर्षणरूपा च ॥श्री॥
आत्मकर्षणरूपिणी॥ अमृताकर्षिणीरूपा शरीराकर्षिणी तथा॥ १४॥ स्थानानि ॥२२४॥
दक्षिणश्रोत्रपृष्ठमंसं च कूर्परं॥ दक्षिणस्तलमस्यार्थपृष्ठं तस्फिक्च जानु च॥ १५॥

छत्रिका च जया तथा॥ संकारिणी च ज्ञाना च टंकहस्ता ततः परे॥ ८४॥ टंकारिणी
च ज्ञेया च शक्तयो द्वादश क्रमात्॥ पापरटंकारिणी च यामिनी तामसी तथा॥ ८५॥
थंकारिणी दया धात्री नादिनी पार्वती तथा॥ फट्कारिणी च विज्ञेया शक्तयो दश
पन्नगाः॥ ८६॥ बंधिनी च तथा भद्रा मज्जा चैव यशस्विनी॥ रमा च लाकिनी चेति श
क्तयः षडथ क्रमात्॥ ८७॥ वरदा श्री तथा षण्णा सरस्वती च शक्तयः॥ चतस्रोथ तथै
व हि हाकिनी च क्षमा तथा॥ ८८॥ ततः पादे च लिंगे च कुक्षौ हृदि शिरस्कु च॥ दक्षा
दि वामपादांतं राशीन्मेषादिकान्न्यसेत्॥ ८९॥ ततः पीठानि पंचाशद्देके चक्रमतोन्य
सेत्॥ कामरूपं वाराणसी नैपालं पौंड्रवर्धनं॥ ९०॥ पुरस्थिरं कान्यकुब्जं कर्णाशै
लं तथार्बुदं॥ आम्रातकेश्वरैकाम्रं त्रिस्रोतः कामकोष्ठकं॥ ९१॥ कैलासं भृगु

॥ल॥ रिणी ॥२३॥ सर्वमंत्रमयीशक्तिः सर्वद्वंद्वक्षयंकरी ॥ चक्रेशीन्यस्य चक्रं च समर्प्य
॥२२८॥ व्याप्य वर्ष्मिणि ॥२४॥ सर्वसिद्धिप्रदादीनां दशकं चाथ विन्यसेत् ॥ दक्षनासा
पुटे दंतमूले दक्षस्तने तथा ॥२५॥ वृषणे चैव सीविन्यां तथा वामे विलोमतः ॥ सर्व
सिद्धिप्रदा देवी सर्वसंपत्प्रदा तथा ॥२६॥ सर्वप्रियंकरी देवी सर्वमंगलकारिणी
सर्वकामप्रदा देवी सर्वदुःखविमोचनी ॥२७॥ सर्वमृत्युप्रशमनी सर्वविघ्ननिवा
रिणी ॥ सर्वांगसुंदरी देवी सर्वसौभाग्यदायिनी ॥२८॥ चक्रेशीन्यस्य चक्रं च
समर्प्यास्य च वर्ष्मणि ॥ सर्वज्ञादीन्यसेद्वक्षसीमीषदंतस्थलेष्वथ ॥२९॥ सर्वज्ञा सर्व
शक्तिश्च सर्वैश्वर्यप्रदायिनी ॥ सर्वज्ञानमयी देवी सर्वव्याधिविनाशिनी ॥३०॥
सर्वाधारस्वरूपा च सर्वपापहरा तथा ॥ सर्वानंदमयी देवी सर्वरक्षास्वरूपिणी ॥३१॥

विज्ञेया दशमी देवी सर्वेप्सितफलप्रदा ॥ चक्रेशीन्यस्य चक्रं च समर्प्य व्याप्य
वर्ष्मणि ॥३२॥ वाग्देवताष्टकं पश्चाद्वशिन्यादीन्यसेत्सुधीः ॥ दक्षे तु चुबुके कं
ठे स्तने नाभौ च पार्श्वतः ॥३३॥ वामे विलोमतो विद्याद्वशिनी प्रथमा मता ॥ कामेश्व
री पराजेया मोहिनी विमला तथा ॥३४॥ अरुणा जयिनी पश्चात्तथा सर्वेश्वरी मता
कौलिनीति समुक्तानि तासां नामानि सूरिभिः ॥३५॥ चक्रेश्वरीं न्यसेच्चक्रं समर्प्य
व्याप्य वर्ष्मणि ॥ हृदि त्रिकोणं संभाव्य दिक्षु प्रागादिषु क्रमात् ॥३७॥ तद्बहिर्विन्य
सेद्धीमान्नाधारगनाचतुष्टयं ॥ न्यसेदग्न्यादिकोणेषु मध्ये पीठचतुष्टयं ॥३८॥
मध्यवृत्ते हृदि ध्यात्वा नित्याषोडशकं न्यसेत् ॥ कामेश्वरी तथा नित्या नित्या च भ
गमालिनी ॥३९॥ नित्यक्लिन्ना तथा नित्या नित्या भेरुंडयोदिता ॥ वह्निवासिनि

॥ल॥ कानित्या महाविद्येश्वरी तथा॥ ४०॥ नित्या चद्रूती नित्या च त्वरिता तु ततः परं॥ ४१॥
॥२२६॥ नित्या नीलपताकाख्या नित्या तु विजया परा॥ ततस्तु मंगला चैव नित्या पूर्वा प्रच
क्षते॥ ४२॥ ज्वालामालिनि नित्या च चित्रा नित्या तथैव च॥ एतास्तु कोणांतरेण परितो
त्हदि विन्यसेत्॥ ४३॥ नित्या तु षोडशी साक्षान् महात्रिपुरसुंदरी॥ त्हन्मध्ये वि
न्यसेद्देवीमखंडजगदात्मिकां॥ ४४॥ चक्रेश्वरीं त्हदि न्यस्य कृत्वा चक्रसमर्पणं॥
मुद्रां प्रदर्श्य योन्याख्यां सर्वानंदमतुं न्यसेत्॥ ४५॥ इत्यात्मन्यस्तचक्रस्तु साक्षा
द्देवी भविष्यति॥ १४६॥ य इदं शृणुयादिव्यमाख्यानं कुंभसंभव॥ तस्य सि श्री
द्धिकरस्थैव न सम्भूयोभिजायते॥ १॥ आख्यानं ललितादेव्याः पठेद्यः शृणुयाद्यदि
विधूय सर्वपापानि देवीलोके महीयते॥ २॥ कन्यार्थी लभते कन्यां जयार्थी जय २२६

त्जंघाप्रपदे वामप्रपदादि विलोमतः॥ चक्रेशीं न्यस्य चक्रं च समर्प्य व्याप्य वर्ष्मणी
१६॥ न्यसेदनंगकुसुमा तृदेव्यादीनामथाष्टकं॥ शंखजत्रूरुजंघासु वामे तु प्र
तिलोमतः॥ १७॥ अनंगकुसुमा पश्चाद्द्वितीयानंगमेखला॥ अनंगदमना पश्चा
दनंगदमनातुरा॥ १८॥ अनंगरेखा तत्पश्चाद्वेगा चानंगपूर्विका॥ ततोनंगांकु
शा पश्चात् अनंगाद्या च मालिनी॥ १९॥ चक्रेशीं न्यस्य चक्रं च समर्प्य व्याप्य वर्ष्मनि॥
शक्तिदेवीं न्यसेत्सर्वसंक्षोभिण्यादिका अथ॥ २०॥ ललाटगंडयोरंसे पादमू
लेच जानुनी॥ उपर्यधश्च जंघाया स्तथा वामे विलोमतः॥ २१॥ सर्वसंक्षोभि
णी शक्तिः सर्वविद्राविणी तथा॥ सर्वाघाकर्षणी शक्तिः सर्वाद्यावशिकारिणी॥ २२॥
सर्वमंत्रमयी शक्तिः सर्वोद्योन्मादिनी तथा॥ सर्वार्थसाधनी शक्तिः सर्वाशापरिपू

माप्नुयात् ॥ मोक्षार्थी लभते मोक्षं धर्मार्थी धर्ममाप्नुयात् ॥ ३ ॥ अर्थकामो लभेद
र्थं पुत्रकामो बहून् सुतान् ॥ विद्यार्थी लभते विद्यां योगार्थी योगमाप्नुयात् ॥ ४ ॥
राज्यार्थी लभते राज्यं ग्रामार्थी ग्राममाप्नुयात् ॥ गर्भिणी लभते पुत्रं कन्या विंदति स
त्पतिं ॥ ५ ॥ यान्यान् कामयते कामान् मानवः श्रवणादिह ॥ तत्सर्वं शीघ्रमाप्नोति दे
वानां च प्रियो भवेत् ॥ ६ ॥ श्रुत्वा चरित्रं श्रीदेव्याः संग्रामं प्रविशेन् नृपः ॥ स निर्जित्य भ
यं शत्रून् कल्याणैः परिपूर्यते ॥ ७ ॥ सर्वव्याधिविनिर्मुक्तः पुत्रपौत्रैः प्रतिष्ठितः ॥
ललितायाउपाख्यानं यमुद्दिश्य पठेत् सकृत् ॥ ८ ॥ तस्य रोगा न बाधंते वातपित्तादि
संभवाः ॥ नाकालमरणं तस्य नसर्पैश्चापि दश्यते ॥ विषं नाक्रमते देहे ॥ ९ ॥ न जड
त्वं न मूकता ॥ नोपसर्गभयं तस्य न चोत्पातभयं न धा ॥ १० ॥ नाभिचारकृते दोषे लि

॥ल॥ प्यतेन कदाचन॥ सर्वकामसमृध्धार्थो यः पठेदनुदिने दिने॥११॥ नित्यमूर्जितभक्त्या
॥२२७॥ चद्रुव्यो घानादिवर्जितः॥ यत्पुण्यं सर्वतीर्थानां गंगादीनां विशेषतः॥१२॥ तत्पुण्यं
कोटिगुणितं प्राप्नोति श्रवणादिह॥ दशानां राजसूयानां अग्निष्टोमशतस्य च॥१३॥
श्रवणात्फलमाप्नोति कोटिकोटिगुणान्वितं॥ अवध्यः सर्वभूतानामन्येषां च विशे
षतः॥१४॥ जीवेद्वर्षशतं साग्रं सर्वव्याधिविवर्जितः॥ गोघ्नश्चैव कृतघ्नश्च भ्रूणहा
गुरुतल्पगः॥१५॥ शरणागतघाती च मित्रविश्वासघातकः॥ दुष्टपापसमाचा
री मातृहा पितृहा तथा॥१६॥ श्रवणादस्य भावेन नमुच्यते सर्वपातकैः॥ तीर्थेषु पूजा ॥श्री॥
वेलासु विषुवत्ययनेपि च॥१७॥ पंचपर्वसु जन्मर्क्षे पुण्ये चायतनेषु च॥ राज्यक्षो ॥२२७॥
भे रोगभये मारीचोरभयादिषु॥१८॥ ये पठंतीदमाख्यानं ते संसिद्धिमवाप्नुयुः॥

यत्रेदं लिखितं पुस्तं वर्त्तते कुंभसंभव ॥ १९ ॥ तस्मिन्देशे न रोगश्च न च दुर्भिक्षसंभ
वः ॥ इदं द्वात्रिंशदध्यायसंमितं दर्शनोत्तमं ॥ २० ॥ कारणं सर्वसिद्धीनां नास्मात्पर
तरं महत् ॥ द्वात्रिंशिकाया अस्यास्तु सकृदावर्तनादपि ॥ २१ ॥ चंडिकाकोटिपाठ
स्य सदृशं फलमुद्भवेत् ॥ आख्यानेमे तदवदा –– भक्त्याः पठंतः ॥ २२ ॥ सत्से प्रदा
यकमपाकृतसर्वदुःखं विज्ञानदीपिकलिकां ललितां महेशीं मा साधयेत सिवहं
ति सदाभिलाषिं ॥ इत्यध्यायः ॥ इति श्री ब्रह्मांडपुराणे हयग्रीवागस्त्यसंवादे ल
लितोपाख्याने न्यासविधिर्नाम मंत्री त्र्यंशोध्यायः ॥ २३ ॥ यादृशं पुस्तकं दृष्ट्वा तादृ
शं लिखितं मया ॥ यदि शुद्धमशुद्धं वा मम दोषो न विद्यते ॥ शके १७७४ पौषशुक्ल १२
मंदवार इदं पुस्तकं समाप्तं ॥ श्रीमहालक्ष्मीप्रियामस्तु ॥ ॥ शुभं भवतु ॥ ॥ श्री ॥

ल
२२८

114
8

॥इतिश्रीललिताखंडःसमाप्तः॥

श्री
२२८